भगवान् तर्हि परिश्रमोऽस्य महान्भविता वितानेन पाकस्य

अस्य शचीदेव्या एतेनेश्वरसमीपे लिङ्गभेदो नास्तीति ध्वनितम्

अद्वैत अस्येति किमुच्यते अस्या इत्युच्यताम् (इति कश्चिदात्मनीन तत्र प्रेषयति स चोज्जीत बुद्ध्वा निष्क्रा त)

(अद्वैत श्रीवासस्य कर्णे गति)

भगवान् किमाहाचार्य आर्य

श्रीवास नित्यान देन देवस्य षड्भुज रूपमवलोकितम् तद्भवते दर्शनीयमिति स्वरूपदर्शनाय यदङ्गीकृत मद्य मद्य तत्कथ न दृश्यते भगवताऽवताऽदृश्य मे कीदृशमिति

(नेपथ्ये)

भो भो. षड्भुज रूपमवलोकितम्

भगवान् (सावाहत्थम्) मम स्वरूपमिदमेव यदिदमद्वैतप्रेमपात्रम् [1]

अद्वैत (स्वगतम्) किमत्र ब्रूमहे महेच्छ प्रति यदि तवैतदेव स्व रूप तदा दर्शनीयम् श्यामसुन्दरविग्रहाभिलाषो विश्रा त' यदि स एव स्वरूपमित्युच्यते तदास्मिन्प्रेमहानि (इति क्षण परामृशति)

श्रीवास अस्माकमिदमेव भवद्वपु प्रेमपात्रमत्र क' सदेहः किंतु स्वयमेवोक्तम् तद्भवते दर्शयि यामि इति कृत्वासौ निवेदयति

भगवान् उ माददशाया केन किं न भण्यते

श्रीवास भगवन् अन्योन्मादस्तु व्याधिरेव अय तु तवो मादो द्रष्टृश्रोतृणामपि व्याधिनिर्मूलकः किंच जीवस्तु वस्तुत क्षुद्रान देनापि विलुप्तधीरधीर एव भवति ईश्वरस्य त्वान दस्वरूपत्वाज्ज्ञानस्वरूपत्वाच्च किं केन पि बाध्यताम् तेन स्वाधीनान द स्वाधीनज्ञानश्चायम्

भगवान् (सस्मितम्) तत्खलु मदधीनं न भवति य मया दर्शयि ष्यते स्वयमेव भावचक्षुषा दृश्यताम् (इति तद ्त करणे स्वरूपमाविर्भा वयति)

(अद्वैतश्चक्षुषी निमील्य प्रणिधान नाटयति)

श्रीवास' (चिरं निर्वर्ण्य) अहो चित्रम् अद्वैतोऽद्वैतोपरि परिवर्त ते तथा हि

---

१ भयगौरवलज्जादेर्हर्षं चाकारगोपनम् इति साहित्यदर्पणलक्षणघटितावहित्थया सहितम्

यद्वाह्येन्द्रियवृत्तयोऽस्य गलिता स्वानन्दसा द्रो लय
कोऽप्य त.करणस्य ह त नितरा स्प देन म द वपु'
आत्मा येष लय ययावनुभवास्याद्ये परे वस्तुनि
प्रायोऽय श्वसितीति बोधविषय प्राप्नोति रोमोद्गमै २५

भगवान् एवमेव तदास्वादसवाद

श्रीवास भगवन् तवैव नाट्यमिदम् बहिर्न दर्शितमस्माभिरपि न दृश्यते इति भवत्वस्माक तवैतदेव स्वरूप महाधनम् किंत्वधु ना धुनातु भवान् माऽत पर पर तप चेतोऽस्य तिरोधापयान्त करण तोऽस्य तद्रूपम् अन्यथा समाधिसमा धिषणास्य न पर बहिश्चारिणी भवि यति पृच्छामश्चैत किं दृष्टमिति

भगवान्—स्वयमेवासौ प्रबोध्यताम् (इति तद त करणात्तद्रूप तिरोधा पयति)

(अद्वैतो ह्राद स्फुरद्रूप त किमप्यनालोकय सुप्तोत्थित इव चक्षुषी उ माल्य क्षण तदेव पश्यनिव दशा कामप्यभिनयति)

भगवान् अद्वैत किमाक्ष्यते

अद्वैत (स्वप्नायमान इव ग्रहग्रस्त इव किमपि पठति)

अकस्मात्तु मीलन्नवकुवलयस्तोमसुरभि
र्घनश्रेणीस्निग्ध स्तबकिततमालावलिघन
प्ररोहन्नीलाश्मव्यतिकरविशेषोऽवलतरो
मह पूर कोऽय नयनपदवी चोरयति नः २६

अपि च

प्रश्यामचित्स्किरणम डलमध्यवर्ति-
प्रत्यङ्गक मधुरिमामृतपूरपूर्णम्
वंशीकलक्वणितकेलिकलाविदग्ध
माद्य महो घनसहोदरमाविरास्ते २७

श्रीवास अहो वर्तमानप्रयोगादतीतमपि प्रत्यक्षमन्यमानोऽय नि ग ति

भगवान् आनन्दस्य वर्तमानत्वात् तदाकर्णय भूयोऽपि विवक्षुरयम् सर्वे तूष्णीं तिष्ठन्तु

अद्वैत

सुश्यामदीर्घघनकुञ्चितकेशपाश
सुभ्रूलत स्खलकमुन्नतचारुनासम्
आलोलशोणविपुलायतनेत्रपद्म
ब धूकबा धवसुरेखशुभाधरौष्ठम् २८
श्रीवत्सकौस्तुभरमासुषमासमेत
वक्ष स्थलस्खलदुदारसुतारहारम्
आपादलम्बिवनमाल्यसुपाल्यमान
सद्वृत्तदीर्घतरपीवरबाहुदण्डम् २९

श्रीवास कथमकस्मादस्यैवमभिनिवेशो जात.

भगवान् श्रूयताम्

ध्यानाभ्यासकृता स्फूर्ति स्फूर्ति. सा तु चिराद्भवेत्
याकस्मिकी हृदि हरे. सावतार इवापर. २

श्रीवास एवमेव

सकृद्यद्दर्शित रूपमेतत्कामायतेऽनघ

इति नारदस्य प्राग्ज मनि दर्शितमित्यवतारसूचकम् ध्रुवस्य त्वभ्यास कृता स्फूर्ति. किंतु भगवन् विना चिराभ्यासयोगेन कथ भगवत्प्रकाशयोग्यतान्त करणस्य

भगवान् अवधेहि

पुरोऽनुग्रह एवास्य स्वोदयाधारधावन
उदयात्पूर्वमर्कस्य विनिहन्ति तमोऽरुण[1] २१

श्रीवास किमयमद्यापि साक्षादेव वीक्षते किं वेक्षितमनुवदति

भगवान् पृच्छ्यताम्

श्रीव स (अद्वैत प्रति) भो भो महानुभाव किं पश्यसि किंवा मनुवदसि

---

१ सूर्यसारथि

अद्वै (आनन्दाब्युत्थित इव किञ्चिद्वाह्यमवगाह्य)

अस्माद्विभोर्बहिरुपेत्य महोऽतिनील
म तर्ममाविशदहो क्षणतस्तिरोऽभूत्
तेनातिदुःखितमना बहिरात्त दृष्टिः
पश्यामि तत्पुनरिहैव निमग्नमासीत् ३२

श्रीवास (सोल्लासम्) भगवन् फलितमस्माद्वच

भगवान् त द्रादोषोऽयमस्य

श्रीवास आनन्द्रतन्दा खल्वियम् कुतोऽस्य दोषः

भगवान् (अद्वैत प्रति) अद्वैत जाग्रत्स्वप्नोऽय भवत[1]

अद्वैत (साभ्यसूयमिव)

नवकुवलयदामश्यामलो वामजङ्घा
हिततदितरजङ्घ कोऽपि दिव्यः किशोर
त्वमिव स स इव त्व गोचरो नैव भेदः
कथय कथमहो मे जाग्रत. स्वप्न एषः २२

भगवान् अद्वैत तवैवाय वासना ग ही दोष यतस्त्वमेवैव पश्यसि नापर कोऽपि

श्रीवास क एवंविधभाग्यवानास्ते यस्त्वा तथा पश्यतु

भगवान् (सोपहासम्) श्रीवास, भव नप्यद्वैतपथपतितोऽभूत्

श्रीवास कृष्णेन सह तवाद्वैत यत्तत्पथपातिन एव वयम् कोऽत्र सदेह

भगवान् एव चेद्भवतोऽपि तेन सहाद्वैतम्

श्रीवास भगवन् भैव वादी त्वच्चरणारविन्दमकरन्दकणा स्वादभाजा नैष पन्था

भगवान्—तर्हि मयि कथं तदारोपयसि

श्रीवास न हीदमारोपणं स्वभावोऽपि भावो नापह्नोतु शक्यते

---

१ जाग्रत्स्वप्नो हि निद्रितस्यैव विषयानुभव तल्लक्षण यथाह दर्पणकार
ो निद्र मुपेतस्य विषयानुभवस्तु य इति

किंतु नायमद्वैताचार्यस्य दोष अपि तु तवैव यतस्त्वयोक्तम् ह्लवते दर्शयि ये इति

(नेप थ)

सत्य सत्यम्

श्रीवास जितमस्माभि. यदिद दैववच इव नरेङ्गितमभूत्

(पुनस्तत्रैव)

अये सत्यमेव शचीदेव्या कृतप कक्रियया तनयेन सममद्वैतागमन प्र तीक्ष्यते गगनमध्यमध्यारूढश्चाय भगवान्मार्त ड

श्रीवास (श्रुतिमभिनीय) मात· परमत्र विलम्बनीयम् भो क थय विश्वजनन्यै एते वय श्रीविश्वभरेण सममद्वैतादयश्चलिता

(इति सर्वे यथायथ निष्क मन्ति)

(इति नि क्रान्ता सवे)

इति सव वतारदशनो नाम द्वितायो ङ्क

तृतायो ङ्क

(तत प्रविशति मैत्री)

मैत्री हद्धी हद्धी पराणमेत्तउ वरिओ जो एक्को अम्हवसस्स क डम्बो विराओ जीवदित्ति सुदम् त ण आणे कहिं वट्टदि अह पि ज नाममेत्तेण जीवामि मंपि सो ण आणेदि ता उद्देस करेमि (इति प रितो विलोक्य) अम्मो का इय पुरदो आअच्छदि ( ) (सस्कृतमाश्रित्य)

आनन्दमूर्तिरमृतद्रववत्समन्ता

दङ्गप्रभा तत इत· सरसा किरन्ती

(क) हा धिक् हा धिक् प्रणमात्रसुद्वृत्तो य एकोऽस्मद्वशस्य कडम्बो विरागो जीवतीति श्रुतम् त न ज ने त्र वर्तते अहमपि यन्नामम त्रेण जीव मि मा मपि स न जानाति तदुद्दश करोमि अहो केय पुरत आगच्छति

---

१ नरेङ्गित ह कस्यचित्प्रस्तावस्य कथासमकाल तदनुकूल सहसोत्थितम् अन्यार्थे प्रयुक्त यद्वाक्य तन्नरेङ्गित भवति अत्र च तद्भवते दर्शयिष्ये लदु नास्याद्वै तस्य चनसगतिप्रस्तावे नेप योक्तस्य सत्य सत्यमि त्याम्याथ प्रयुक्तानुकूलतया सहसो त्थितेर्नरेङ्गितत्व ज्ञेयम्

आसादयन्त्यतितरा करुणाकटाक्षै
रन्तर्विशुद्धिमखिलस्य पुरोऽभ्युपैति १

(इति सविस्मयमालोकयति)

(तत प्रविशति प्रेमभक्ति)

प्रेमभक्ति (पुरो वलोक्य) अहो केयम्

नामैकमात्र वपुरादध ना विम्लानकान्ति परितोषहीना
सोत्क ठमसन्मुखमीक्षमाणा शनै.शनैर्मत्पुरतोऽभ्युपैति २

मैत्री (निपुण निभाल्य) अम्महे इय जेअ पेम्मभत्तीजननी कहि एण लच्छणेण लच्छीअदि ता उपसप्पिअ पणमामि (इत्युपसृत्य) देवि वन्दिज्जसि मेत्तीणामधेआए मए (क)

प्रेमभक्ति (सचमत्कारम्)कथ मैत्री त्वमसि एहि वत्से एहि (इत्यालिङ्ग्य) मैत्रि कथय कथमेकाकिना दुरवस्थिता भ्रमसि

मैत्री कलिपरिअणेहिं णिज्जिदेसु अम्हसप-च्छेसु भअभेम्हलिदा जीविद गेण्हिअ पलाइदा अदो मे दुरवत्थ किं पुच्छसि (ख)

प्रेमभक्ति वत्से निर्भयमत· पर स्थीयता मत्सङ्गेनैव तव माता महभगिन्यसि

मैत्री कह विअ (ग)

मभक्ति आमूलमाकलय

भगवदनुग्रहनामा जनको भगवज्जनासक्तिः
जननी तयोस्तु समयेऽजनिषत भूरीण्यपत्यानि ३

अपि च

एको विवेकनामा तनयो बह्व्यस्तु भक्तिसञ्ज्ञिका कन्या·
तस्य विवेकस्य मतेरनसूया न म दुहि ीत् ४

(क) अहो इयमेव प्रेमभक्तिजननी कथितेन लक्षणेन लक्ष्यते तस्मादुपसर्प्य प्रणम मि देवि वन्द्यसे मैत्रीनामधेयया मया

(ख) कलिपरिजनैर्निर्जितेष्वस्मत्सपक्षेषु भयविह्वलिता जीवित गृहीत्वा पलायिता अतो मे दुरवस्था किं पृ सि

(ग) कथमिव

अपि च

अनसूया समभाव पतिमासाद्य स्वभावज शुद्धम्
मैत्रीमसूत पुत्रीं भवतीं मत्तोषसधात्रीम् ५

अपि च

कन्यका सरसनीरसभावादाययुर्द्विविधता प्रथम ता
नीरसास्तु बहुधा गुणयोगाद्भेजिरेऽथ दशता रसभाज ६
उज्ज्वलाद्भुतशमाश्च हसश्च प्रेम वत्सल इतीह रसा षट्
उत्तमा इति तदाश्रयभाजो भक्तयश्च षडमूरतियोग्या ७

मैत्री चरमा हि पेम्मरसभत्ती (क)

प्रेमभक्ति अथ किम् तथा हि

सर्वे रसाश्च भावाश्च तरङ्गा इव वारिधौ
उन्मज्जन्ति निमज्जन्ति यत्र स प्रेमसज्ञक ८
ख डान दा रसा सर्वे सोऽख डान द उच्यते
अख डे ख डधर्मा हि पृथक्पृथगिवासते ९

एष ते व्य ख्यातो निजा वय

मैत्री देवि दाणीं तुम एआइणी कहि वच्चसि (ख)

प्रेमभक्ति मैत्रि अस्माकमाश्रयभूतस्य भगवतः कस्यापि श्रीविश्व भरस्य विहितसर्वावतारलीलस्य सम्प्रति वृन्दावनेश्वरीभावमनुचिकीर्षोरनु ज्ञया सकललोकस्य हृदयशोधनाय साधयामि

मैत्री कहिं (ग)

प्रेमभक्ति यत्र खलु तद्भावभावुकसुभगभावुकतया सर्वभुवनप्रि यभावुकस्य तस्य तन्नित्यानुकरण भविष्यति

मैत्री सो ज्जेव को पदेसो (घ)

( ) चरमा हि प्रेमरसभक्ति
(ख) देवि इदानी त्वमेकाकिनी कुत्र व्रजसि
(ग) कुत्र
(घ) स एव क. प्रदेश·

प्रेमभक्ति आचार्यरत्नस्य पुराङ्गणम्

मैत्री कध दाव ईसरो हुविअ इत्थीभावेण णं स्सदि (क)

प्रेमभक्ति बाले न जानासि ईश्वर खलु सर्वरस सर्वेषा भ क्तान माशयानुरोधाद्विचित्रामेव ली । करोति स्वस्ववासनानुसारेण भक्तास्तां तामनुकुर्वन्ति अत केषांचिन्निभृताना भागवताना चेतसि तद्भावमावेशयितु सर्वोत्तमा तदनुकारलीला करिष्यति यत परमन्य त्सरस नास्ति

मैत्री कधेहि त णच्चं कें अङ्करूव किंवा पइण्णअम् (ख)

प्रेमभक्ति अङ्करूपमेव

मैत्री कधेहि को कस्स भूमिअ गहिस्सदि (ग)

(क) कथ तावदीश्वरो भूत्वा स्त्रीभावेन नर्तिं यति

(ख) कथय तन्नत्य किमङ्करूप किंवा परिणयम्

(ग) कथय क कस्य भूमिका ग्रहिष्यति

---

१ अङ्कलक्षणमिति भाव तल्लक्षण **दर्पणे** यथा

प्रत्यक्षनेतृचारतो रसभावसमुज्ज्वल
भवेदगूढश दार्थ क्षुद्रचूणकसयुत
विच्छिन्नावान्तरैकार्थं किंचित्सलग्नबिन्दुक
युक्तो न बहुभि कार्यै जिसहृतिमान्न च
नानाविधानसयुक्तो नातिप्रचुरपद्यवान्
आवश्यकाना कार्याणामविरोधाद्विनिर्मित
नानेकदिननिर्वत्यकथया संप्रयोजित
आसन्ननायक पात्रैर्युतस्त्रिचतुरैस्तथा
दुराह्वान वधो युद्धं राज्यदेशादिविप्लव
विवाहो भोजनं शापोत्सर्गो मृत्यू रत तथा
दन्तच्छेद्य नखच्छेद्यमन्यद्वीडाकरञ्च यत्
शयनाधरपानादिं नगराद्युपरोधनम्
नानुलेपने चैर्मिर्वर्जितो नातिविस्तर
देवीपारजनादीनाममात्य णिजामपि
प्रत्यक्षचित्रचरितैर्युक्तो भावरसोद्भवै
अन्तर्निष्क्रान्तनिखिलपात्रो ङ इति कीर्तित इति

२ वेषभि त्यर्थ

प्रेमभक्ति वत्से अवधारय अद्वैतस्य रुद्रत्वेनात्मत्व स्वस्य च श्री राधास्वरूपग्रहणमन्यजनाशक्यं परमरहस्यत्वेनायोग्य च मत्वा

अद्वैतमापादयदीशवेश स्वय च राधाकृतिमग्रहीत्स.
इति प्रतीतिः किल वस्तुतस्तु स एव देवो द्विविधो बभूव १

अद्वैतो वेशमात्रेण केवल चरितार्थताम्
अगमत्किंतु तत्रासीदाविर्भूत स्वय हरि ११

अपि च

हरिदास सूत्रधारो **कुन्द** पारिपार्श्वक·
वासुदेवाचार्यनामा नेपथ्यरचनाकरः १२
श्रीराधाकृष्णसयोगकारिणी जरतीव सा
योगमाया भगवती नित्यान दतनु श्रिता १३

मैत्री सामाइआओ केऽमा (क)

प्रेमभक्ति अधिकारिणो ये अस्मिन्नथे स्वयमेव भगवानवादीत्प्रा गेव यथा

हे **श्रीवास** स्वयमवहितेनाद्य भाव्य त्वयास्मि
न्यो यो य स्यात्स विशति यथा नापरस्तद्विधेयम्

इत्यधोक्ते **श्रीवासे**णाभाणि देव कस्मिन्कर्मणि यो यायो यव्यवस्था करणीया कुत्र वा प्रवेशः कारयितव्य. इति पुनर्देवेनाप्यवादि

श्रीराधात्र स्वयमियमहो नूनमाचार्यरत्न
स्यावासस्याङ्गणभुवि रसाद्वयक्तमाविर्भवित्री १४

मैत्री तदो तदो (ख)

`मभक्ति** तत. **श्रीवा`न मनसि सदिहानेन भगवद्वच इति विहितनिश्चयेनापि **गङ्गादास**नामा भगवतः परमासो भूसुरवरो द्वारपाल स्वेन न्ययोजि

(क) सामाजिकाः के अमी

(ख) ततस्ततः

मैत्री ततो ततो (क)

प्रेमभक्ति भगवता पुनरपि **श्रीवासो** निजगदे 'श्रीवास भवता नारदेन भवितव्यम् शुक्लाम्बरेण तव स्नातकेन भाव्यम् गाथका' श्रीरामादयस्तव सहोदर स्रय आचार्यर विद्यानिधी चेति देवेनैव नियोजिता' अत' पर न केषामपि तत्र प्रवेश किंतु श्रीवासादिसहोदरवधूभिः सहाचार्यरत्न रारिवधूप्रभृतय प्रागेव तत्र प्रविश्य स्थिता अधिकारभाजश्च ता'

(नेपथ्ये मृदङ्गता ादिध्वनि)

प्रेमभक्ति वत्से श्रुतम् अयमारब्धः पूर्वरङ्गाङ्गभूतः प्रत्याहारः

(पुनर्नेपथ्ये)

जयति जननिवासो देवकीज मवादो
यदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्मम्
स्थिरचरवृजिनघ्नः सुस्मितश्रीमुखेन
व्रजपुरवनिताना वर्धयन्कामदेवम् १५

अपि च

सपूर्णेन्दुमुखी सरोजनयना कोकस्तनी कैरव
स्माया कम्बुशिरोधिरम्बुधिभुवो गर्वस्य सर्वकषा
मङ्गल्यैरिह वस्तुभिर्विरचिता ना दीव वृन्दावन
क्रीडाकौतुकनाटकस्य दिशतु श्रीराधिका व' शुभम् .६

प्रेमभक्ति सत्यमेवैतत् यन्निरटङ्कि मया यदसौ सूत्रधारभूमिको **हरिदास श्रीभागवत**पद्य मङ्गल कुर्वन्नान्दी पपाठ तन्मन्ये एक ङ्को भाणो व्यायोगो वा रूपकमत्र निरूपयितव्यमनेन यतः नेपथ्ये गीयते नन्दी इत्यादि तयोर्लक्षणम् तद्वत्से तवास्य दिदृक्षा वर्तते

(क) ततस्तत.

---

१ गृहस्थमिदा २ पूवरङ्गस्याभिनयात्पूर्वं रङ्गवि ोपशा स्यर्थं क्रियमाणं माङ्गलिक मनुष्ठ नम् तल्लक्षण यथा **द णे**

यत्र व्यवस्तुन पूर्वं रङ्गवि ोपशान्तय
कुशी वा प्रकुर्वन्ति **पूर्वरङ्ग** स उच्यते इति

३ स्तुतिविशे

मैत्री कहिं मे त रिस भाअधेअम् (क)

प्रेमभक्ति का ते चि ता मया सह वतितव्यम् मत्प्रभावा त्केनापि भवती न लक्षणीया त्वदनुरोध मयापि त्वन्निकट एव तथा भूत्वा स्थातव्यम्

मैत्री अणुगहीदम्हि (ख)

प्रेमभक्ति तदेहि

(इति नि क्रा ते)

ति वेशक

(तत प्रविशति गृहीतसूत्रवारभूमिको **हरिदास** क्रिय ूरे उपविष्टे अलक्षिताकारे भक्ति- यौ च)

सूत्रधार (पु पाञ्जलिमञ्जलौ कृत्वा)

भासा भास्वरयन्दिशो विशदया कां ित द्विजश्रेणिजा
बिभ्राण परितो लसत्परिमलः प्रोद्दामसतोषभू
शुद्धः पादसरोरुहे भगवतः पु ष्टिं नखे दुश्रिया
त व ेास इवैष नाट्यरहस पुष्पाञ्जलि· कीर्यते १७

(इति तथा करोति)

प्रेमभक्ति. (निर्वर्ण्य) सुविहितमेव विहित भवता यद्यपि नेपथ्य एव ना दी पठिता तथापि रङ्गपूजाप्रसङ्गेन भगवत्पद एव पुष्पाञ्जलि कीर्ण. पश्य वत्से पश्य

हारी कण्ठे श्रवणयुगले कु डली चावतसी
स्रग्वी भूयस्युरसि भुजयोरङ्गदी कङ्कणी च
अप्यु णीषी शिरसि पदयोर्नपुरी नाट्यलक्ष्म्या
मूर्तस्तेजोभर इव पुरो हारिदासप्रतीक १८

मैत्री देवि ण क्खु अअ सत्थीओ मग्गो (ग)

( ) कदा मे तादृश भागधेयम्

( ) अनुगृहीतास्मि

(ग) देवि न खल्वय शास्त्रीयो मार्गः

प्रेमभक्ति श्रूयताम्

शास्त्रीय· खलु मार्ग पृथगनुरागस्य मार्गोऽन्य·
प्रथमोऽर्हति सनियमतामनियमतामन्तिमो भजते १९

मैत्री अणिअदमग्गेण चल तस्स विल म्बेण ज्जेव ग मलाहो होइ ( )

प्रेमभक्ति ९दमनैकान्तिकम् था हि

वन्यासु तरणिसरणिर्जवेन गम्य नयत्यनियत पि
न सहजकुटिलेषु पुनर्नदीप्रवाहे वतिनियतापि २

तदलमनया वार्तया श्रृणुमस्तावत्किमय प्रस्तौति

सूत्रधार अलमतिविस्तरेण भो भो अद्याह भगवत. कमलयोने श्चरणोपक ठाद्दैनदिनव दनादिक निर्वाह्य निवर्तमानो मानोन्नतेन दैवा त्तत्रैवोपसीदता नारदेनादरेण समादि ष्टोऽस्मि यथा हहो ग धर्वराज राजमानोऽतिचिराय मम मनोरथो वरीवर्ति भवद्भिर्नरीनृत्यमाना भग वत श्रीवृ दावनविहारिणः कापि केलिकौमुदी नयनविषयीकर्तव्येति तद्यथा सपद्यतेऽद्य ते तथा कौशलेन भवितव्यम् दह तत्र यति ये (इति पुरतो वलोक्य). भो भो. इत इत

(प्रविश्य)

पारिपार्श्व किमाज्ञापयसि भाव

सूत्रधार मारिष अद्याहमुपरोधितोऽस्मि तत्रभवता भगवता नारदेन

पारिपार्श्वक कथमिव

सूत्रधार भगवत कमलयोने (इत्यादि पठति)

पारिपार्श्वक भाव कथमयमात्मयोनेर्भगवत आत्मज. सनकसन न्दनादीनामवरज आत्मारामो ब्रह्मभूत सततब्रह्मान दानुभवभविकसुभ गभावुक, श्रीकृष्णस्य लौकिकी केलिमनुबद्धतृ णस्त्वामिदमभ्यर्थितवान्

सूत्रधार अस्ति रहस्यम्

आत्मारामाश्च मुनयो निर्ग्र था अप्युरुक्रमे
कुर्वन्त्यहैतुकीं भक्तिमित्थभूतगुणो हरि २१

इति भागवतीया गाथा

(क) अनियतमार्गेण चलतो विलम्बेनैव गम्यलाभो भवति

पारिपार्श्वक भवतु नाम भक्तिं कुर्वन्तु कथ लौकिकाचारि तेऽनुरज्यन्ति

सूत्रधार मैव मदी

अलौकिकीतः किल लौकिकीय ली । हरेरेति रसायनत्वम्

लीलावतारानुकथातिमृद्वी विश्वस्य सृष्ट्यादिकथापलिक्नी २२

अत उक्तम्

भजते तादृशी क्रीडा या· श्रुत्वा तत्परो भवेत्

इति स धारणजनपरमे विशेषतस्त्वय श्रीनारदो वृन्दावनविनोद प्रिय [1]श्रीगोपालमह मनोर्ऋषिरपि तेन युक्तमेवैतत् तदविलम्बितमेव सपद्यता [2]पात्रवर्गस्य [3]भूमिकापरिग्रह·

पारिपार्श्वक भाव क्षणमपेक्ष्यता यावदसौ मुनिवरः समायाति

सूत्रधार आगतप्र य एव न खलु तान्शामन्तरीक्षचारिणा पर्यटनविलम्ब

पारिपार्श्वक एव चेत्क· प्रयोगोऽनुष्ठातव्य तदप्यनुज्ञायताम्

सूत्रधार

गृहीत्वा जरतीभाव या देव्या योगमायया

सपद्यते दानलीला सैव राधामुकु दयो २३

पारिपार्श्वक कथमेषा त्वरित सपादयितु शक्यते

सूत्रधार कथमिव

पारिपार्श्वक श्रूयत म्

तस्मि प्रयोगे भवतस्तनूजाः सर्वा विशेषाद्गणनाप्रवीणा·

सूत्रधार (साशङ्कम्) कथय तासा खस्त्यस्ति

पारिपार्श्वक खस्त्येव किंतु

वृन्दावन ता प्रययु· प्रमोदात्समूय गोपीश्वरपूजनार्थम् २४

सूत्रधार किं करोमि कथमेतन्नारद. प्रत्येतु अहो तदभिशापाद्भयेन भाव्यम्

श्रीगोपा स्य श्रीकृष्णच द्रस्य महामनोर्महामन्त्रस्य ऋषि सततजापक·

२ नटगणस्य ३ नेप थ्यग्रहणम्

प रिपार्श्वक अलमल चिन्तया ता अपि समागतप्राया एव

सूत्रध र —ह त मारिष न जानासि

वर्त्मानभिज्ञा किल ताः कुमार्यो न चोपयुक्त· कतमोऽस्ति ब धु
दानद्रवोत्सिक्तकर· करालस्तम्बेरमो यत्र समेघधामा २५

पारिपार्श्वक भाव अस्ति तासा स ेयोगमायाप्रभावा जरता भवच्छ्रु·

सूत्रधार (विहस्य) तदा निश्चिन्त एवास्सि

या न पश्यति प थान न शृणोति च या वच
सा किं करोतु साहाय्य या जरेव शरारिणी २६

पारिपार्श्वक मैव वादी.

महाप्रभावा खलु योगिनी सा वयो न तस्या मतिविभ्रवाय
श मेण वृद्धा विधुमण्डलीय न लायति द्योतत एव कामम् २७

(नेप थे)

हहो ग धर्वपते को विलम्बस्तदभिनयस्य

सूत्रधार (श्रुतमभिनीय) म रिष पश्यायमुत्कण्ठम नो मुनिवर सप्रमोदमभिने यमाणविलोकनार्थं त्वरमाण आगच्छति अस्माक तु न कापि सामग्री सपद्यते तद्वयमितो गत्वा तासामेव कुमारीणामनुमधा नाय याम.

पारिपार्श्व यथा रुचित भवते

(इति क्षण नर्तित्वा नि क्रान्तौ)

इति

(तत प्रविशति स्नातकेनानुगम्यमानो नारद)

नारद अये गन्धर्वराज किमपर विलम्बसे (इति तमनुसदधा ति)

प्रेमभक्ति वत्से मैत्रि पश्य पश्य

असे निधाय महतीं रणयन्प्रकोष्ठे वामेतरे वलयवत्कलिताक्षमाल·
विद्युद्विकस्वरविकीर्णजटाकलाप कैलासक न्तिरयमेति रषिरग्रे २८

वत्से प्रणमैनम् महाभागवतोत्तमोऽय मुनिवर स्य खल्वित्थ गाथ

अहो देवर्षिर्धन्योऽय यत्कीर्तिं शार्ङ्गधन्वन.
ग यन्माद्यन्निदं त या रमयत्यातुर जगत् २९

मैत्री (प्रण य) देवि तुए भणिदम् **सिरिवासो णारदो हुवि स्सदि** कह द णिं सअ ज्जेव **णारदो** आअओ (क)

प्रेमभक्ति अस्य सहजनारदावेशत्वान्नारदरूपता व्यक्तैव अ द्वैतादेस्तु तत्तदारोप· तत्त्वया यथादृष्टमेव प्रतीयताम्

नारद भो भो. स्नातक कथमत्र कोऽपि न दृश्यते

स्नातक सुरर्षे गन्धर्वराजस्तु वृ दावन एव नर्तितव्यमिति तत्रै ससामग्रीको गतवानस्ति एहि तत्रैव गच्छाव·

नारद इद वृन्दावन न भवति

ात भो महात्मन् अतिशयहर्षोत्कर्षेण स्वात्मापि विस्मृतो भवता यच्च तथा वृ दावनपरिचयचातुर्यधुर्योऽपि वृ द वन न परि चिनोषि

नारद भो· स्नातक सत्यमेवोक्त भवता

आनन्दोन्मादलुप्ता तर्बहि करणवृत्तय:
परिचि व तु के स यगात्मान किमुतापरम् ३

तदादिश तस्य प थानम्

स्नातक भो इत इत:

(इत्युभौ नाट्येन परिक्रामत)

प्रेमभक्ति (निरूप्य) अहो म०भागवतस्य नैसर्गिकी वृन्द वनरति

नारद (नाट्येन कियदूर गत्वा) ह त भो

यत्पारे विरज विराजि परमव्योमेति यद्गीयते
नित्य चिन्मयभूमिचिन्मयलताकुञ्जादिभिर्मञ्ज म्
सा द्र नन्दमहोमयै· खगमृगव्र तैर्वृतं सर्वत
स्तद्वृ दावनमीक्ष्यते किमपरं सभाव्यमक्ष्णो फलम् ३

(क) देवि त्वया भणितम् श्रीवासो नारदो भविष्यति मिद नीं स्वयमेव नारद आगत·

यत्र स्वय स्वयमूर यस्सत्पिता यत्किंचिदेव ज म भि षितवान् तथा च पौराणिकी गाथा

तद्भूरिभा यमिह जन्म किमप्य ।
यद्गोकुलेऽपि कतम ह्रिरजोऽभिषेकम्

इत्यादि (इत्येतदेव पद्यमुपवीणयन्नटति)

तक एव चेत्प्रतिपदमेव भवता प्रेमानन्दवि लेन भूयते तदा कथ ग यताम्

नारद (धैर्यमवष्टभ्य) आदिश मार्गम्

इत त

(इत्युभौ पुननाट्येन पार मत)
(नेप थे मुरलीध्वनि)

। क देवर्षे इदमेव वृन्दावनम् यदेष भगवतो मुरलीकल आकर्ण्यते

नारद (श्रुतिमभिनाय) अये सत्यमेवात्थ तथा हि

मधुरिमरसवापीमत्तहंसीप्रजल्प
प्रणयकुसुमवाटीभृ सगीतघोष
सुरतसमरभेरीभाकृति पूतनारे
र्जयति हृदयदंशी कोऽपि वशीनिनादः ३२

भक्ति वत्से भगवत श्रीकृष्णचन्द्रस्य प्रवेशो भविता तदिदानीं विसर्यतामाज मदु'खम् सफलीक्रियता च नयने

मैत्री स व तुह चरणपसादादो ज्जेव ( )

नारद (निपुण निभाल्य)

क सत्यमेव व्रजराजकुमारस्यैव वंशीनिनादोऽयम् यत'

विततिरपि गिरीणां मुञ्चतीवाश्रधारा
पुलकयति तरूणा वारुधा चैष वर्गम्

(क) सर्व तव चरणप्रसादादेव

---

१ दयाकर्षी

विदधति रितोऽपि गोतस स्तम्भमुच्चै
र्हरिहरि हरिवंशीनाद एवोज्जि हीते ३३

(इत्येतदेव पद्यं पूर्ववदुपवीणयन्नृत्यति)

यथार्थमेवैतन्नटनम् यत
श्रुतिभिरपि विमृग्यं ब्रह्मसपत्तिभाजा
मपि पुरु रसनीय मूर्त आनन्दसार
यदहह भविताद्य श्रीलशभुखयभू
प्रभृतिभिरभिवन्द्य पादपद्म दृशोर्न ३

तद्देवषे क्षणमपवार्य स्थातु युज्यते किमसौ सहचरैरेगोपसर्पति किंवा सौभाग्यरसगभीराभिराभीरभीरुभिरिति सहसोपसर्पणमसांप्रतम्

नारद सत्यमात्थ तदेवमेव कुर्व

(इति तथा स्थितौ)

(तत प्रविशति कद बत का कृताल बहि भङ्गीललितो रलीं वादयन्कतिपयै सखिभि सह श्रीकृष्ण)

श्रीकृष्ण सखे र यमिद वृन्दावनस्य सौभा यम् तथा हि

हसन्ती वासन्ती वलितमुकुलो बालबकुलो
विशोकश्चाशोक सुलभविचयश्चम्पकचय
अन ग पुनाग स्तबककमन पश्य सुमन
कुटीर पाटीरश्चसनसुरभिर्भाति सुरभि ३५

वय भो वअस्स तुज्झ एद कालाक णण कध रमणिज्ज ण विस्सदि (क)

प्रेमभक्ति (निर्वर्ण्य) अहो किमे त्
अय नैवाद्वैतो बत न तदिदं वेशरचना
कलाशिल्प किंतु स्वयमिह हरि प्रादुरभवत्
यथ र्थं वस्त्वेव प्रथयति चमत्कारमधिक
य र्थस्याकार' सुखयति च संदेहयति च ३६

(क) भो वयस्य तवेद क्रीडाकाननं कथ रमणीय न भविष्यति

१ हरिहरीति हर्षसूचकमव्ययम्

(पुननिभाल्य सपरामर्शम्)

अ ष्ण कृष्णत्व व्रजितुमसमर्थो हि भवति
स्वय णो नानाकृतिकृतिसमर्थोऽपि भवति
ग्रहीतु गो य स्यादवयवकलाप वयवी
कथकार धत्तामवयवविशेषोऽवयविताम् ३७

तदयमद्वैत एव न भवति नापि वेशरचनाकौशलम् किंतु स्वय कृष्ण एवावतार्ण

नारद (दूराभिभाल्य सान दम्) अहो किमेतत्

सान्द्रानन्दरसाब्धिम थविदित सद्भक्तगो । कृपा
मोहिन्या परिवेषित रतिमता वृ देन तत्राभितः
नानारुच्यनुपानत. प्रतिमुहु पीत च पूर्ण सद्
नो जीर्यत्यपि नोपयाति विकृतिं श्यामामृत किंचन ३८

अपि च

नवजलधरधामा कोटिकामाभिराम
परिणतशरदिन्दुस्फि धमुग्धाननश्री
नवकमलपलाशद्रोणिदीर्घारुणाक्षो
दशनकुसुमकान्तिश्रान्तबि बाधरौ · ३९

इत एवाभिसर्पति तदेहि कुञ्जा तरितौ भूत्वा पश्याव

स्नातक एवमेव

(इति तथा कुरुत)

श्रीकृष्ण सखे **सुबल,** सखे **श्रीदामन्** सखे **सुदामन्,** **सुमासवो** नाम बटु प्रियसखो मे कथ न दृश्यते तदेत मृगयत

सखाय यथाज्ञ मृगयाम

(इति तदन्वेषणं नाटयन्ति)

(विश्यापटीक्षेपेण सभ्रान्तो विदूषक)

विदूषक भो वअस्स परित्ताहि परित्ताहि ( )

(क) भो वयस्य परित्राहि परित्राहि

श्रीकृष्ण कथ भीत इव लक्ष्यसे

विदूषक वअस्स एआ जोइणी जरदीव्व दीसमाणा दैवोपस णल लिदबाललालणाओ पञ्चसाओ वणमज्झम्हि आणिअ गोवासरपूअणत्थ किदारम्भा दिट्ठा तुह पुण्णेण अह उ वरिओ म गहिअ णूण बलिं द स्सदि त्ति मे भअ जादम् (क)

श्रीकृष्ण (विहस्य) वयस्य सुबल किमेतत्

सुबल ज्ञातमिहस्थैनैव मया अद्य खलु गोपीश्वरपूजनकृते गुरु जनकृते गुरुनिवारणेऽपि मातामह्या मह्याश्चरणया बलतो बलतो हर्षो त्कर्षतः स्वच्छ दतो वनगमनाय प्रवर्तयि यते राधा तत्र तामेव जरती मालोक्य योगिनीभ्रान्त्य य बटुर्बिभ य विभाऽयता हि सा स्वभावा देव देवमायेव

विदूषक ही ही जइवि ए व तहवि पिअवअस्सहत्थे णिपडि-स्सन्ति स वाओ ज गोउलवासिणीण इत्थीकुरङ्गि ण रङ्गिणं क्खु पिअ वअस्सस्स गुणगणो वाउराजालो (ख)

नारद भो. स्वातक अत परमत्रावस्थ तु न युज्यते तदेहि योगप्रभावेण नभश्चरौ भूत्वा पश्याव

(इत नि क्रा तौ)

(नेप थे)

हन्त अज्जे केण पहेण गोवीसर अणुसरेम्म जदो
विरइअ ठाणे ठाणे दाण सो वणगओ धूत्तो
क इ सदालिवग्ग हेलाकण्डूलकरदण्डो (ग)

(क) वयस्य एका योगिनी जरतीव दृश्यमाना दैवोपसन्ललितबाललना स्वषा वनमध्य आनीय गोपीश्वरपूजनार्थं कृतार भा तव पुण्येनाहमु-द्धृत. मा गृहीत्वा नूनं बलिं दास्यतीति मे भय जातम्

(ख) ही ही यद्य येव तथ पि प्रियवयस्यहस्ते निपतिष्यन्ति सवाः यतो गो कुलव सिनीन स्त्रीकुरङ्गिणीना रङ्गिणीन खलु प्रियवयस्यस्य गुणगणो वागुर जाल.

(ग) हन्त आर्ये केन पथा गोपीश्वरमनुसर म· यत.

विरच य स्थाने स्थाने दानं स वनगजो धूत
कषेति सदालिवर्गं हेलाकण्डूलकरद ड:

सुबल वयस्य फलितमस्मद्वच

सुमासव मए ज उत्त वअण त किं ण फलिस्सदि ता अलीअ ज्जेव ग वसु वहसि (क ण ात) वअस्स तुम्हेवि तेण उज्जमेण चिट्ठध ( )

श्रीकृष्ण —कोऽसावुद्यम

कुसुमासव ण सुद विरइअ ठ णे ठाणे (३ ४) इत्यादि ज पढिदम् किंतु वणगओ (३) त्ति ज भणिद त उद्दद ज्जेव धुत्तो (३ ४) त्ति जं भणिद त क्खु मे दुक्खाअरम् ( )

श्रीकृष्ण (विहस्य सावहित्थम्) वनगजो धूर्तः (३ ४) इति कथ ते दु खाक्षरम्

सुमासव एत्थ वणे को अबरो वणगओ (ग)

(पुनर्नेप ये)

अवगाहिअ उण म ग सो विविणे सहअरेहिं कलहेहिं
विहरइ दाणविणोई ह त कध तत्थ ग त वम् ४१ (घ)

सुमासव वअस्स अम्हे क्खण कुञ्जे ओवारिअ चि ह्म जाव ह्मओ वि विस्सत्था हुविअ इध आअच्छन्ति (ङ)

सर्वे एवमेव (इति श्रीकृष्णेन सह जप्रवेश ना यन्ति)

(तत प्रविशति पूजोपकरणपात्रपाणिभि सह ेचरीभिर्जरत्योपगम्यमाना पाण्डु-पत्रावृता नवकिस यश्रीरव श्रीराधा)

राधा सहीओ गोवीसरपूअणत्थ स वो ज्जेव संभारो आणीदो (च)

(क) मया यदुक्त वचन तत्किं न फलि यति तदलीकमेव गर्वमुद्वहसि वयस्य यूयमपि तेनोद्यमेन तिष्ठत

(ख) न श्रुत विचरय्य स्थ ने स्थाने इत्य दि य पठितम् किंतु वनगज· इति यद्भणित तदुचितमेव धूत· इति यद्भणित तत्खलु मे दु.ख रम्

(ग) अत्र वने कोऽपरो वनगज·

(घ) अवगाह्य पुनम र्ग स विपिने सहचरै· कलभै·
विहरति द नविनोदी हन्त थ तत्र गन्तव्यम्

( ) वयस्य वय क्षण कुञ्जेऽपवार्य तिष्ठ म यावदि । अपि विश्वस्ता भूत्वेत अ न्ति

(च) ख्य· गोपीश्वरपूजन र्थ र्व एव संभार आनी

सख्य अध २ किंतु मिलाण हुविस्सदित्ति कुसुम जेव ण आह रिदम् इदो जेव अवचिणिस्सम् ( )

राधा पिअं मे पिअ मे ता एहि अ चिणह्ह ( )

(इति न व्येन पु पावचयन न टयन्ति)

प्रेमभक्ति (निर्वण्य) अहो चित्रम् स एवाय देव· नाम्य किमप्यशक्यम् यतः

मोहिन्येष बभूव य. स्वकलया देवद्विषो मोहय
न्नात्माराममपीश्वरेश्वरमपि श्रीशकरं लोभयन्
तस्याश्चर्यमिदं न किंचिदपि यत्कृ णाव ारोऽपि
०श्रीराधाकृतिमग्रहीत्स्व पुषा देव. स विश्वभर २

अथवा

हरिरयमथ लीलया स्वशक्त्या विदलयुगात्मकलायवन्न भिन्न·
अभवदिव पृथक्पुमान्वधूश्च स्वयमुभयाशसमानरूपयोगात् ३

(पुनरन्यतो वलोक्य)

२यमपि ललितैव राधिकाली खलु न गदाधर एष भूसुरेन्द्र
हरिरयमथवा स्वयैव शक्त्या त्रितयमभूत्स सखी च राधिका च ४

(पुनरन्यतो व ोक्य) अहो इयमपि योगेम याऽगमायादशमिनी ३शमिनी ३नीरजा नीरजाक्षी धवलबलता केशपाशेन तम इव शुद्धसत्त्वीकृत्य दधाना जरतीवेश विधाय प्रविष्टा नेय नि ानन्द नित्य नन्दत नुर्भगवान्हि स्वामेव योगमायामायापयामास स्य तु न चित्रमेतत् यत.

निवासशय्यासनपादुकांशुकोपधानवर्षातपवारणादिभि
शरीरभेदैस्तव शेषता गतैर्यथोचित शेष इतीरितो जनै ५

इति प्राचीनैर्भक्तैरुक्तम्

(क) अथ किम् किंतु लान भविष्यतीति कु ममेव नाहृतम् इत ए वच-यि याम

( ) प्रिय मे प्रिय मे तदेहि अवचय म

---

१ न च्छतीति अगा या माया विद्या तय ति पी ति लोकानिल्यग ायाद ससारस्तस्य शमिनी ाि कर्त्रीत्यर्थ शमगुण ती ३ रजो णातीत

श्रीकृष्ण (राधा निर्वर्ण्य) सखे

उत्कीर्णा किमु चारु कारुपतिना कर्मेन किं चित्रि ।
प्रेम्णा चित्रकरेण किं लवणिमा त्वष्ट्रैव कु दे धृता
सौ दर्याम्बुधिमन्थनात्किमुदिता माधुर्यलक्ष्मीरिय
वैचित्र्य जनयत्यहो अहरहर्दृष्टाप्यदृष्टेव मे ६

अथवा

शौटीर्यं स्मरभूपतेर्मधुमदो लावण्यलक्ष्म्याः स्मयः
सौभा यस्य विनोदभूर्मधुरिमोल्लासस्य हासश्रिय
अद्वैत गुणसपदामुपनिषत्केली विलासा ले·
केय लोचनचन्द्रिक चयचमत्कारश्चकोरेक्षणा ४७

(इति सस्पृहम लोकयति)

राधा एहि ललिदे लवङ्गकुसुम अवचिणुम्ह (क) (इति परिक्रामति)

जरती एसा लवङ्गवाडिआ वि कण्हस्स अदिपेअसी इमाए णिअड मा गच्छ पच्चा तुम मोआवेद ण सक्किस्सम्ह ( )

ललिता अज्जे तुम पडिभूत्तणेण सठाविअ अम्हे अ पाणअं मोआविस्सम्ह का चिन्ता (ग)

(इति सकौतुक सर्वा कुसुम चयनं नाटयन्ति)

राधा ललिदे परित्तहि परित्ताहि एसो दुट्ठो भमरो बाधेइ (घ)

सख्य

मुञ्चिअ लवङ्गलदिअं चवलो महुसूअणो एसो
पिअसहि अणिअदपेम्मो तुह मुहग धेण अन्धिओ भमई ८ (ङ)

(क) एहि ललिते लवङ्गकुसुममवचयाम

(ख) एषा लवङ्गवाटिका पि कृष्णस्य तिप्रेयसी अस्य निकट मा गच्छ पश्चात्त्व मोचयितु न शक्ष्यामः

(ग) आर्ये त्वा परिभूत्वेन स्थाप्य वयमात्मान मोचयिष्यामः का चिन्ता

(घ) ललिते परित्राहि परित्राहि एष दुष्टो भ्रमरो बाधते

(ङ) मुक्त्वा लवङ्गलतिका चपलो मधुसूदन एष.
प्रियसखि अनियतप्रेमा तव मुखगन्धेनान्धो भ्रमति ।

श्री ष्ण· (अवलोक्य सस्पृहम्) सखे पश्य पश्य

मुखमनुनिपतन्त वारयन्ता द्विरेफ

भयचकितचलाक्षी न्य खीय करेण

तमपि तदभिभूत घूर्णित धूनाते

स च रुजमभिनिन्ये झङ्कतै· णानाम् ९

कुसुमासव वअस्स अअ ओसरो अम्हाणम् अम्हलव कुसुम एसा आहरेदि इम ए आहरणं बल कदुअ तुम आहर ( )

श्रीकृष्ण एवंविधमालोकनमेवातिसुरसम् तथापि प्रियबटोर्वचो नुरोधेन तथा कुर्म (इति समुपसृत्य सदपम्) अयि ललिते दुर्ललितेऽदुः के तव साहसिक्यशिक्षामेताम् कस्ते मदो मदो सि वृ दावने कथ स्वात यमारभ्यते वारवारमेव मे वनमागत्य गत्यनवस्थया तत इत इतरजनावद्वात्रगर्वेण फलकुसुमसुमञ्जुललताविटपभङ्गमाचर त्यश्वर त्य परितोऽपरितोष मम जनयन्ति नय तिरस्त्य मामवजानन्ति च भवत्य· भद्रमद्य विलोकिता स्थ· अतः परमस्य फल भुज्यताम्

जरती अरे क हड कुसुमेहिं ज्जेव एदाण पओज म् ण क्खु फलभोअत्थ एदाहिं वणमज्झे आअदम् ( )

सुमासव· अज्जिए वअसेण सम तुज्झ बुद्धी च गदा जदो फल अवराहे दण्डोत्ति ण आणासि (ग)

जरती बम्हणडिम्ह ीरकण्ठो सि तुम किं ण जाणेसि विचारेहि को अवराहो अवराहे ज्जेव दण्डो ण क्खु सराहासु अम्हेसु (घ)

(क) वयस्य अयमवसरोऽस्माकम् अस्मद्वञ्चकुसुममेष हरति अनयाहृत बलं कृत्वा त्वमाहर

(ख) अरे कृष्ण कुसुमैरेवैतासा प्रयोज म् न ख फलभोगार्थमेताभिर्वन मध्य आगतम्

(ग) आर्ये वयस समं तव बुद्धिश्च गत यत· फलमपर धे दण्ड ति न जानासि

(घ) । णडिम्भ क्षीरकण्ठोऽसि त्व किं न जान सि विच रय कोऽप राध· अपराध एव द ड़ो न खलु राध सु

ललिता अये बडुअ तुम्ह वअस्सो अस्स वणस्स को ( )

कुसुमासव ललिदे अहिआरी अअम् ( )

ललिता होइ एव णेदम् अहिओ अरी जइ ण होइ तदो कध अम्ह पिअसहीए एदस्स वणस्स एदारिसी अवत्था (ग)

सुमासव ललिदे पण्डिद ण पआसेसि होदु होदु अम्ह वअस्सो एदस्स वणस्स अहिओ अरी ज्जेव एद वण तुम्ह पिअसहीए कध जादम् (घ)

ललिता उवभोओ ज्जेव पमाणम् अण्णधा कध णीसङ्क कुसुमाइ आहरेम्ह (ङ)

जरता सच्च ज्जेव भणिद लिद ए मह णत्तिणीए ज्जेव एद वणम् जाए एत्थ देअदारूएण णिओइदा अप्पाणो परिअणरूआ वु दा (च)

श्रीकृष्ण (वहस्य) आर्ये न्दा खलु तव नप्त्र्या परिजनरूपा

जरती अरे कन्हड एत्थ को सदेहो सा ज्जेव पुच्छीअदु ( )

सुमासव (कर्णे लगित्वा) भो वअस्स सा क्खु एदान ज्जेव पच्छवादिणी सा पम ण णेण ण पुच्छिद व (ज)

(क) अये बटुक तव वयस्योऽस्य वनस्य क.

( ) ललिते अधिक र्यम्

(ग) भवति एव न्वे त. अधिकोऽरियेदि भवेत्तदा कथमस्य प्रियसख्या एतस्य वनस्यैतादृश्यवस्था

(घ) ललिते पाण्डित्य प्रकाशयसि भवतु भवतु अ द्वयस्य एतस्य वनस्य धिकोऽरिरेव एतद्वन तव प्रियसख्याः कथ जातम्

(ङ) उपभोग एव प्रमाणम् अन्यथा कथ नि शङ्क कुसुमान्याहरामः

(च) सत्यमेव भणितं ललितय मम न य एवैतद्वनम् ययात्र देवतारूपेण नियोजितात्मन परिजनरूपा वृन्दा

( ) अरे कृ ण अत्र कः सदेह सैव पृच्छयत म्

(ज) भो वयस्य सा खल्वेतासामेव पक्षपातिनी । प्र माण्यत्वेन न प्र व्य

सुबल कुसुमासव म भेतव्यम् ललिते मद्वयस्यनाममुद्रैवात्र प्रम णम् या खलु प्रतिद्रुममेव विराजते

ललिता जइ एव तहवि अम्हे ण अपरज्झह सअल ओ ज्जेव लदाओ मह पिअसहीणामक्खरङ्कि दा तेण क्खु लदासु को अहिआरो तुह वअस्सस्स अम्हेहि लवङ्गलदिआण ज्जेव कुसुमाइ आहरीअन्ति ( )

जरती ललिदे णि मुञ्छण दे जामि भद्द ज्जेव भणिदम् क हड, कीस कलहाएसि आत्तणो अहिआरे चिट्ठन्तीहिं एदाहिं सद्धम् मग्गसि जइ तदो म ग मए ज्जेव दादव्वाणि वङ्गकुसुमाइ तुम कस्स ण पिओ होइ ( )

राधा (सस्पृहमात्मगतम् कृ णमुद्दिश्य स कृतेन)

श्यामीकरोति भुवन वपुषा दिग ता
पूर्णेन्दुमण्डलमयी कुरुते मुखेन
वाचा सुधारसभृतो विदधाति कर्णा
दृष्ट्या नभोऽम्बुजमयी कुरुते किमेतत् ५

जरती कन्हड लेहि कुसुमाइ (ग) (इति तासामञ्चलत कुसुमान्यादाय कृष्णोपकण्ठं विकिरति)

राधा (अञ्चलेन मु मार्जयित्वा किञ्चित्स्मिला) अज्जिए किं किदम् देअपूअणकिदे अवचिदस्स कुसुमस्स ईरिसी अवत्था किदा (घ)

(क) यद्येव तथापि वय नापर ध्याम सकला एव लता मम प्रियसखी न माक्षराङ्किता. तेन खलु लतासु कोऽधिकारस्तव वयस्यस्य अस्य भिर्लवङ्गलति कानामेव कुसुम न्याहिय ते

(ख) ललिते निर्मु न ते यामि भद्रमेव भणितम् कृष्ण किमर्थं कलहायस न त्मनोऽधिकारे तिष्ठ तीभिरेत भि. स र्धम् याचसे यदि तद याचस्व मयैव दातव्यानि लवङ्गकुसुमानि व कस्य न प्रियो भवसि

(ग) कृष्ण लभस्व कुसुम नि

(घ) अ र्ये किं कृतम् देवपूजनकृतेऽवचितस्य सुमस्येदृश्यवस्था कृता

श्रीकृष्ण (राधा निर्वर्ण्य स्वगतम्) अहो अतिरम्यत्व वर्तते वसना वृ मुखाया· यत

अ ली मृगदृशो दृगञ्चल. पञ्चरस्थ इव भाति खञ्जन
लेश एष हसितस्य दृश्यते वस्त्रपूत इव चन्द्रमोद्भव· ५१

ललिता अज्जिए अदिभआउलासि तुमम् किंत्ति चिरपरिस्स मेण अवचिद कु म णट्ठीकिदम् को एसो ₹मस्स वु दावणस्स (क)

जरता ललिदे समत्थासि तुम कलह कादुम् अलीअग भरकण्डूलं दे हिअअम् ता कुणह एतेहिं धिट्ठेहिं सह कलहम् एहि णत्तिणि एहि ( ) (इति राधामादाय ग वृत्ता)

राधा अज्जे कहिं ग त म् गोवीसरो ण अच्चिद ओ (ग)

कुसुमासव अज्जिए एत्थ वअस्सस्स दाण वट्टदि कुसुमचोरिअ तुह मुह दट्ठूण समत्थिद दाण दाउण सवाओ गच्छन्तु (घ)

जरता अरे बम्हणबडुअ क रे दाणम् (ङ)

कुसुमासव वअस्स सुअल भणीअदु (च)

सुबल आर्ये श्रूयताम्

यो य मत्वा स्मरनरपति· पश्य दत्त्वा प्रसून
वृ दारण्ये नवकुलवधूवृन्दघट्टाधिपत्ये

(क) आर्ये अतिभयाकुल सि त्वम् किमिति चिरपरिश्रमेणावचित कुसुम न ीकृतम् क एषोऽस्य वृन्दावनस्य

( ) ललिते समर्थ सि त्व कलह कर्तुम् अलीकगर्वभरकण्डूलं ते हृदयम् त त्कुर्वैतैर्धृष्टै सह कलहम् एहि नप्त्रि एहि

(ग) आर्ये कुत्र गन्तव्यम् गोपीश्वरो नार्चितव्य.

(घ) आर्ये अत्र वयसस्य द न वतते कुसुमचौर्यं तत्र ख दृष्ट्वा सम र्थित द न दत्त्वा सर्वा गच्छन्तु

( ) अरे ब्र णबटुक किं रे दानम्

( ) वय सुब भ यताम्

यन्नादस्थापयदयमिम मद्वयस्य यशस्य
दत्त्वा शुल्क जत सुहृशो म स्तु शुष्को विवाद ५२

जरती होदु दे वअस्सो दानी अम्हाण किं तेण सुमरणरवइणो वसाओ ण अम्हे ( )

कुसुमासव होइ बुड्ढिआए तुह कहिं तस्स अहीणदा ( )

जरती (सक्रोधम्) अरे दाणयोग्गपअत्थो जइ होइ तदो स । करीअदि (ग)

सुबल प्रियवयस्य स्वयमस्योत्तर दीयताम्

श्रीकृष्ण (सगाम्भीर्यम्) हन्त भो. श्रूयताम्

रत्नाद्य वः कुवलय शामस्तु वा मास्तु वस्तु
प्रेङ्खालेऽस्मिन्भुजलतिकयोर्भागधेयो विधेय
मर्यादेय मम निगदिता किंतु रत्नान्यपीमा
न्यानीयन्ते पुरटपुटिकामन्तरा दर्शयध्वम् ५३

सख्य पूओवकरणपुडिआ इअ गोवासरस्स (घ)

कुसुमासव अरे मुक्खा अअं ज्जेव गोवीसरो इम ज्जेव पूएध (ङ)

सख्य महाआलो गोवीसरो (च)

कुसुमासव अअ महाआलो किं ण होदि जस्स रुइपडलेहिं स ज्जेव वण तमालव ण किदम् ( )

सख्य चन्दअसेहरो ज्जेव अच्चि दव्वो (ज)

(क) भवतु ते वयस्यो द नी अस्माक किं तेन स्मरनरपतेर्वश्या न वयम्

(ख) भवति वृद्धायास्तव कथ तस्याधीनता

(ग) अरे दानयो यपदार्थो यदि भवति द शङ्क क्रियते

(घ) पूजोपकरणपुटिकेय गोपीश्वरस्य

(ङ) अरे मूर्खाः अयमेव गोपीश्वर इममेव पूजयत

(च) महाकालो गोपीश्वरः

(छ) अय महाकाल किं न भवति यस्य रुचिपटलै सर्वमेव वन तमालवर्ण कृतम्

(ज) चन्द्रकशे र एवा चितव्यः

कुसुमासव पेक्ख पेक्ख एसो च दअसेहरो ण होइ ( )
(इति हर्षवतस दर्शयति)

सख्य वाआल गोरापतिं पूअइस्सम्ह (ख)

कुसुमासव तुम्हे गोरीओ ण भवेध (ग)

जरता अरे बडुआ एदाणं पई तुह वअस्सो त्ति तुम जाणेसि चिट्ठ चिट्ठ गाममज्झे तुह दसण ण लम्भिस्सम् (घ)

रूप्य अरे वाआल पसुवई पूइदओ (ङ)

सुमासव हत भो एत्तिआओ धेणुओ जो पालेदि सो किं पसु ई ण होइ (च)

रूप्य ए भणध जस्स एदे अम्हे पसुओ सो किं पसुवई ण होइ ( )

सुबल भवतु वय सर्वे एव पशवः तेन भवन्मतेऽयमेव पशुपतिः तदयमर्च्यताम् किंच पुटिकाभिः कृत्वा किं नीयते तद्दर्शयित सुख गम्य ाम् किमनेन शुष्ककलहेन

राधिका भो सहीओ दसेध (ज)

(सख्यस्तथा कुर्वन्ति)

सुमासव (विलोक्य) अअ मिअमओ एद कुङ्कुमम् एद

(क) पश्य पश्य एष च द्रकशेखरो न भवति

(ख) व चाल गौरीपतिं पूजयि यामः

(ग) यूयं गौर्यो न भवथ

(घ) अरे बटुक एतासा पतिस्तव वयस्य इति त्व जानासि तिष्ठ ति आममध्य तव दशन न लप्स्ये

(ङ) अरे वाच ल पशुपतिः पूजि व्य

(च) हन्त भो. एतावतीर्धेनूर्य. प लयति स किं पशुपतिन भवति

( ) एव भणत यस्यैता वय पशव स किं प पतिर्न भवति

(ज) भो सख्य दर्शयत

कालागुरुअम् एद चन्दनम् अअ कप्पूरो अअ मोत्ताहारो सिप्पको सलेण फणिहारो व किदो (क)

जरती अरे फणिहारो इम बडुअ दंसेध (ख)

कुसुमासव अज्जिए कालिअमद्दणसहअरस्स मे कुदो फणिहारदो भअम् ता एदाण कर दाउण गच्छध (ग)

सख्य होदु अम्हे देअपूअ कदुअ घर गच्छम्ह तदो तुह वअस्सो तत्थ जइ गच्छदि तदा ज सक्कीअदि त ज्जेव दादव्वम् (घ)

कुसुमासव अरे दासीए धीदाओ अप्पणो अहिअ रपदेसं मुञ्चिअ तुम्ह घरं गदुअ मग्गिस्सदि मे वअस्सो ता चिट्ठध चिट्ठध (ङ) (इति पूजोपकरणान्यादातुमिच्छति)

ललिता अत्र गोवराअण दणेण देवद्दव्वाणि एद णि एव अपवित्ताणि कादुं ण जुज्जीअन्ति (च)

राधा ललिदे इमिणा प्फसिदाणि एदाणि कध देवस्स दादव्वाणि ता मुञ्च मुञ्च घर गदुअ अण्णोवअरणं अ णिअ देओ अच्चिदव्वो ता अज्जिए एहि घर गच्छम्ह (छ) (इति ग तुमिच्छति)

श्रीकृष्ण (प थानमाक्रम्य) अयि चतुरमन्ये क यासि

(क) अयं मृगमदः एतत्कुङ्कुमम् एतत्कालागुरुकम् एतच्च दनम् अयं कर्पूरः अय मुक्ताहार शिल्पकौशलेन फणिहार इव कृत·

(ख) अरे फणिह र इम टुकं दंशेत

(ग) आर्ये क लियमदनसहचरस्य मे कुत· फणिहारतो भयम् तस्मादेतेषा कर दत्वा ग·छत

(घ) भवतु वय देवपूजा कृत्वा गृह य म· ततस्तव वयस्यस्तत्र यदि ग·छति तद य·छक्यते तदेव दातव्यम्

(ङ) अरे दासा दुहितरः आत्मनोऽधिक रप्रदेश त्यक्त्वा तव गृहं गत्वा य चि ष्यति मे वयस्य· तस्मात्ति त तिष्ठत

(च) अत्र गोपराजन दनेन देवद्रव्य येत येवमपवित्राणि कर्तु न युज्य ते

(छ) ललिते अनेन र न्येतानि कथं देवस्य दातव्यानि तस्म मुञ्च मुञ्च गृह गत्वान्योपकरणमानीय देवोऽर्चितव्य तस्म दाय एहि गृह ग·छाम

राधा (सावहित्थमर्षम्) मूल ज्जेव दि णम् किं तस्स दाणं म गसि (क)

श्रीकृष्ण (सहासामर्षम्) किं मूल दत्तमस्ति मूल त्वेतदेव श्रूयताम्

एतत्स्वर्णसरोरुह तदुपरि श्रीनीलरत्नोत्पले
तत्पश्चात्कुरुविन्दक दलपुटे तत्रापि मुक्तावली
सर्वं श्यत एव किंतु निभृता या हेमकु भद्वयी
किं वान्यन्नयसेऽनयेति तदिद बाले विच र्य मम ५४

राधा को तुम विचारस्स ण हि अविच रेण विचारो कादु क्कीअदि (ख)

जरती (द्वयोर्मध्यमध्यास्य सस्कृतेन) अरे यशोदामातर् मा तरलो भव लोभवता हृदयेन कथमाचरसि दुर्विनीतत्वम् तत्त्व ते कथयामि यदि निराकुलकुलवधूपद्रवद्रवकथा क्रियते तदा न तेन ते भद्र भवि यति

ललिता (सक्रोधमुपसृत्य सस्कृतेन)

कस्त्व भो ननु माधवः कथमहो वैशाख आकारवा
मु धे विद्धि जनार्दनोऽस्मि तदिद ूते वनावस्थिति
मा गोवधनधारिणं न धरणौ को वेत्ति हु वर्धन
हिंसा हे वृषहन्बिभर्षि तदघद्व रैव गोवर्धनम्[२] ५५

प्रेमभक्ति अहो कौतूहलम्

(क) मूलमेव दत्तम् किं स दान य चसे

( ) कस्त्व विचारस्स नह्यविचारेण विचार, कतु शक्यते

अत्र भेदेऽप्यभेदरूपातिशयोक्तिरलकार तदुक्त साहित्यदपणे यथा सिद्धत्वे-ध्यवसायस्यातिशयोक्तिर्निगद्यते भेदेऽ यभेद सब धे सब धस्तद्विपययौ पौव ल्यय कार्यहेत्वो सा पञ्चधा तत इति

२ अत्र श्लेषाव क्तिर 'कार , तदुक्त साहित्यदपणे यथा अन्यस्यान्यार्थक मन्यथा योजयद्यदि अन्य श्लेषेण काक्वा वा सा वक्रोक्तिस्ततो द्विधा इति

येय नटैरप्यभिनीयमाना लीला हरेरेति रसायनत्वम्
सा यत्स्वकीयैः स्वयमीश्वरेणाभिनीयते तत्किमुदाहरामः ५६

अपि च

सामाजिकाना हि रसो नटाना नैवेति पथाः कृतिषु प्रसिद्धः
ह तोभयत्वे रसवित्त्वमेषामलौकिके वस्तुनि को विरोध ५७

अपि च

अलौकिकाल्लौकिकमेव शौरेर्वृत्त चमत्कारि तदेव लीला
अ कषकत्व हि जगज्जनानामलौकिकत्वस्य स कोऽपि हेतु ५८

(इति सविस्मयमालोकयति)

कुसुमासव अइ कुडिले दुव्विणीदे ललिदे मह वअस्सो दुट्ठाआरो किदो ता चिट्ठ चिट्ठ (क)

सुबल (सपरिहासामषम्) ह त भोः सत्यमेतत्

वक्र वो द्विजराजहिंसि मदिरालोले न्शौ रोचिषा
मूर्तिः काञ्चनहारिणी न विरमो गुर्वङ्गनासङ्गत
स ी प म एष पञ्चविशिखः शुद्धिस्तथापीह वो
यन्नामाप्यखिलाघनाशि स पर दुष्टोऽस्मदीयः सखा ५९

तद्वयस्य घट्टपाला हि विना धृष्टताप्रकटनेन स्वार्थकुशला न भवन्ति तदात्मनः प्रकटय शौटीर्यम्

(श्रीकृ णो तवर्तिना भूत्वा राधा पृष्ठत त्वा स्थितवर्ती जरतीं करेण निक्षिप्य बलाद्राधापटा तग्रहणमभिनयति जरती बला मोचयित्वा राधाम तथापय ता स्वयमप्य न्तदधात नित्यानन्द स्वरूपेण स्थितो नृत्यति)

मैत्री देवि किं न्विदम् कुदो अअ अअम्हादो णिच्चाण दो कहिं गदा सा जरदी ( )

(क) अयि कुटिले दुर्विनीते ललिते मम वयस्यो दु ाचारः कृत तस्मा त्तिष्ठ तिष्ठ

(ख) देवि कि न्विदम् कुतोऽयमकस्मान्नित्यान द. कुत्र गत सा जरती

---

१ अत्राथापत्तिरलकार . तदुक्त साहित्यदर्पणे यथा द ापूपिकयान्याथ गमो था त्तिरिष्यते' ति

प्रेमभक्ति अय खलु योगमायाप्रभ व स्वयमस्मिन्न विश्य जरती भूत्वा सप्रति रस. सावशेष एव सुरसो भवतीति यथासमयमन्त र्हितासौ ततः स्वरूपेणावतिष्ठतेऽय नित्यान द यत·

स्वतो बलीय सहजो हि भावः स कृत्रिम भावमध. करोति
अग्न्यातपाभ्या जनितो जलानां नैवोष्णभावश्चिरकालवर्ती ६

तदिदानामेत वतैव स्थित नाट्यम् भवति हि ईश्वरलीलैवेयम् न खलु नटरीतिः पश्याद्वैतो द्वैत एव

मैत्री ण आणे ण्णिं भअव कीदिसो होइ (क)

(नेप थे)

भो भोः सन्य सी सन्यासी

भक्ति अहो किमियमाकस्मिकी प्रतिकूलवाइ निरूपयामि (इति निरू य) अये भगवद्व टीं कश्चित्सन्यासी प्रविशति तमालोक्य कश्चि दाक्रोशति तदेहि सहैव नि क्रमाव

(इात नि तौ)

(इति निष्का ता)

इति दानावनोदो नाम तृतायोऽङ्क

च थोंऽङ्क

(तत प्रावशल्याचायरत्नप यानुगम्यमाना भगवती शची)

शची बहिणीए सण्णासिण पदि कध सिरिविस्संभरस्स एदा रिसो आअरो विजादीअवासणो क्खु स णासी (ख)

भगिनी आअरो कध जाणिदो (ग)

शची जदो तत्थ दिअहे केसवभारदीण मस्स कस्सवि सण्णासिणो

( ) न जाने इदानीं भगवा कीदृशो भवति

( ) भगिनि सन्य सिन प्रति कथ श्रीविश्वभरसैतादृश आदर. विज ती यवासन खलु सन्य सी

(ग) आदर· क ज्ञात

भिच्छत्थ सद्धालुओ हुविअ म उत्तवम् सअ च तस्सिं गुरुई भत्ती अणु राओ वि पअडिदो ( )

भगिनी सो वि भत्तो हुविस्सदि ( )

शची कम्पेदि मे हिअअं स णासीणाममेत्तेण अस्स अ गएणाह पढा२दा इम सद भ तस्स ठाणे पुच्छि सम् (ग)

भगिनी जुत्त णेदम् (घ)

शची ता जाणेहि कुदो सो मह हिअआण दणो चन्दण मो (ङ)

भगिनी (पुरो वलोक्य) देवि पेक्ख पे ख अअ दे पुण्णिमाच दो विअ पुव्वदिसाए उ गच्छदि ण दणो (च)

(शची सस्पृहमालोकयात)

(तत विशति भगवान्विश्वभर)

विश्वभर (अञ्जलिं बद्ध्वा) अम्ब प्रणमामि

शची चिरं जीअ (इात मूद्ध नमाघ्राय) ताद इअं आचारिअरअण ऋलत्तम् इम पणम (छ)

(देवस्तथा करोति सा ससाध्वसं सकुचति)

शची ताद एक्क पुच्छिस्सम् (ज)

देव आज्ञापय

(क) यदा तत्र दिवसे केशवभारतीन : कस्यापि सन्यासिनो भिक्षार्थं श्रद्धालुर्भूत्वा मामुक्तव न् स्वय च तस्मि गुवा भक्तिरनुरागोऽपि प्रकटितः

( ) सोऽपि भक्तो भविष्यत्येव

(ग) कम्पते मे हृदय सन्यासिन मम त्रेण अस्य प्रजेनाह पाठिता इम संदभ तस्य स्थाने प्रक्ष्ये

(घ) युक्तमिदम्

(ङ) तज्ज नीहि कु :स मम हृदय न दनश्चन्दनद्रुमः

(च) देवि पश्य पश्य अय ते पूर्ि म चन्द्र इव पूर्वदिश या उद्गच्छति न दनः

(छ) चिर जीव तात इयमाचायरत्नकलत्रम् एना प्रणम

(ज) तात एक प्रक्ष्ये

शची पुत्तअ सण्णासिण पदि कध दे एदारिसो आअरो ज तत्थ दिअहे केसवभारदीं पदि तादिसी भत्ती किदा तुमए (क)

देव अम्ब ते खलु परमभागवता भवन्ति

शची तत्त कधेहि स णासो वा कादव्वो तुमए (ख)

देव (विहस्य) अम्ब कुतोऽय ते भ्रम· इदमपि भवति किम्

शची वच्छ एदेण जेव दे अ गएण दि ण पुत्थअ मए असमए चूल्लीमज्झे दाउण जालिदम् (ग)

देव कें पुस्तक कथ वा प्रदीपितम्

शची विस्सरूएण मे कधिदम् अम्ब विश्वभरो यदा विज्ञो भवति तदा तस्मा एतत्पुस्तक देयम् इति मए दाव दाव जेव त रक्खिद जाव सो पव्वइदो ण भूदो पव्वइदे तत्थ अअ पि एद पुत्थअ लम्भिअ पव्वइदो हुविस्सदित्ति तुह स ाए जालिदम् (घ)

देव (क्षणमनुतप्य विहस्य च) अम्ब यद्यपि संविद्रूपैव भवती तथापि पुत्रवात्सल्येनेदमज्ञानविलसितमनुशीलितम्

शची ताद एसो अवराहो मम ण गहिदव्वो (ङ)

देव कोऽपराधो जनन्या पुत्रेषु किंतु ममापराधो यदि भवति तदा क्षन्तव्य एवासौ मातृचरणैरिति प्रसाद· क्रियताम्

(क) पुत्र सन्यासिन प्रति कथ त एतादृश आदर· यत्तस्मिन्दिवसे केशव-भारतीं प्रति त दृशी भक्तिः कृता वया

( ) तत्त्व कथय सन्यासो वा कर्तव्यस्त्वया

(ग) वत्स एतेनैव तेऽग्रजेन दत्त पुस्तक मय पाकसमये चुल्लीमध्ये दत्त्वा ज्वालितम्

(घ) विश्वरूपेण मे कथितम् मय तावत्तावदेव तद्रक्षित य वत्स प्रव्रजितो न भूत· प्रव्रजिते तत्रायमप्येतत्पुस्तक लब्ध्वा प्रव्रजितो भविष्यतीति तव शङ्कया ज्वालितम्

(ङ) तात एषोऽपराधो मम न ग्रहितव्य

शची वत्स ण कहिंपि दे अवर हो गहिदव्वो सो तुह णत्थि ज्जेव ( )

देव अ ब दिनानि कतिपयानि कुत्रापि मम गन्तव्यमस्ति त्वया मनसि खेदो न कार्य

शची कहं ग त म् (ख)

देव अ ब येन भवत्या. सर्वेषा च बन्धूनां सदा सुखायैव भूयते तदनुसधान कर्तुम्

शची त क्खु तुमं ज्जेव (ग)

देव यद्यप्येवमेव तथापि येन ममापि शोभातिशयो भवति दर्थ यति यते

शची वत्स जधा मह दुक्खं ण होइ तध करणिज्जम् (घ)

देव अम्ब

श्रीकृ ण परिपालकस्तव पिता माता च पुत्रोऽपि च
ज्ञातिश्च द्रविण च नित्यसुखदो बन्धुश्च देवोऽपि च
सङ्ग शाश्वत एव यस्य तमनुस्मृत्यानिश चेतसा
सपन्नासि तव धुना सुखमय जानीहि दिङ्मण्डलम् १

शची वत्स तुम ज्जेव सबम् तुह पसादादो मह दुक्ख णत्थि किंतु जधा सतत तुम पेक्खामि तह ज्जेव कादव्म् (ङ)

देव कृष्ण एव सततं त्वया द्रष्टव्य. स एव तव सर्वदुःख ध्वसी भविष्यति

शची तहस्तु ता तुम ज्जेव मम कन्हो ता उत्थेहि मज्ज हो

(क) वत्स, न कु ापि तेऽपराधो ग्रहितव्यः तव स्त्येव

( ) कथ गन्तव्यम्

(ग) तत्त्व त्वमेव

(घ) वत्स यथ मम दु:ख न भवति तथ कर्तव्यम्

( ) व स त्वमेव सर्वम् तव प्रस दतो मम दु:खं नास्ति किंतु यथ सतृत वा प्रेक्ष्यामि थैव कर्तव्यम्

जादो तुमपि सिणाणपूअणादिक कुणह अहपि प अत्थ जामि बहिणिए तुमपि घर गच्छ तवावि भअवदो पाअसेआसमओ जादो ( )

(इति सर्वे निष्कामन्ति)

(त विशल्यद्वैत)

अद्वैत भूतावेशविवशनिखिलेन्द्रियवृत्तिर्भगवदावेशविस श्च समा नमेव भावमादधाति यतः खलु यावत्तस्मिन्दिवसे भगवदावेशेन यन्मया नर्तितं तज्जनमुखादेव साम्प्रत श्रुत्वा प्रतीयते संदि ते च तेनाव्याहृतप्र भावोऽयं भगवान्विश्वभरः वस्तुतस्तु कोटिकोटिजगद घटघट विघ टननाटकपरिपाटीपाटवस्य निजचरितललितकीर्तिसुधाधावितजगज्जनहृद यावटघटमानतम.काटवस्य भगवतस्तथैव लीलायित खलु प्रत्यक्षानुमानो पमानशब्दार्थापत्त्यैति ादिप्रमाणनिवहैरपि न प्रम तु शक्यते विना तस्यै नुग्रहजन्यज्ञानविशेषम् तेन तदानींतनमलौकिकचमत्कारकारणमस्म न्निष्ठमपि नटनलीलायित नास्म कमनुभवगोचरस्तद्व्यवसितम् तेन

यास्यन्ति केऽपि मोह विवदि य ते च तै सम केचित्
केचन सदर्भविदो रहस्यमिदमित्यवैष्यन्ति २

(इत्यूर्ध्वमवलोक्य) अहो चरमाचलशिखरचु बी लम्बमानोऽय भगवा म रीचिमाली तथा हि

नान्नैव मे त्वमसि किंत्वखिलग्रहाणा
विश्रामपात्रमिति तत्पतिनाभिशस्ता
तत्प्रत्ययाय परि समयो दधाति
सध्यार्कबि बकपटादिव वारुणी दिक् ३

( ) तथास्तु तत्त्वमेव मम कृष्ण. तस्मादुत्तिष्ठ मध्या ो ज त· त्वमपि ानपूजनादिक कुरु अह पि पाकार्थ यामि भगिनि त्वमपि गृह ग छ तवापि भगवत. प कसेवा मयो ज तः

अत्र चोत्क्षाप्राणिताप तिरलंकार समासोक्तिश्चेत्यनयोरेकाश्रया वेश तदुक्तं स हित्यदपणे यथा प्रकृत प्रतिषिध्य न्यस्थापन स्यादपह्नुति समासोक्ति समैयत्र कार्यलिङ्गविशेषणै इति

अथवा

सायाह्नसङ्गसुखलुप्तधिय प्रताच्या[1]
शोणाम्बरासि समु छसिते नित बात्
काञ्चीकलापकुरुवि दमणी द्रूपी
कालक्रमाद्दिनपति पतयालुरासीत् ४

तदिदानां विगतवर्त्मपरिश्रम. सध्यामुपास्य दर्शनायतमो द्रष्टव्य स खलु भगवान्विश्वभर. (इति तथा कतमिच्छति)

(नेपथ्ये)

ह त भो निजपुर गत्वा समागतप्रायोऽहमिति कृत्वा गतोऽद्वैत कथमद्यापि न यात[1]

अद्वैत (श्रुतिमभिनीय) अहो मद्विल बमालोक्य स्वयमेव देवो मामाक्षिपति तदह सत्वरमेव गच्छामि (इति पारक्रामति)

(विश्यापटीक्षेपेण)

श्रीवास भो अद्वैत देव आज्ञापयति भगव न् अहमित[1] श्रीवासगृह गच्छन्नसि भवतापि तत्रैव ग तव्यम् इति

अद्वैत यथाज्ञापयति देवः (इति तेन सह परिक्र म पुरोऽवलोक्य) इदमिद श्रीवासपुरम् यावत्प्रविशामि (इति प्रवर्श नाटयित्वा प्राची दशम वलोक्य) अहो रम्यम्

आह्लादयन्नक्षि जगज्जनाना प्रेमामृतस्य दसुषामपाद[1]
उल्लासय कौमुदमुज्जिहीते च द्रश्च विश्वभरच द्रमार्श्वे ५

(तत प्रविशति श्रीवास दिभि समुपग यमानो भगवान्विश्वभर)

विश्वभर (प्रत्युत्थाय) स्वागत भोः स्वागतम्

अद्वैत श्रीमुखच द्रदर्शनेन

देव (सादरमिव श्लिङ्ग्य च) भगवन् अत्रोपविश्य ाम्

---

१. अत्र रूपकसमासोक्त्यपह्नुताना सकर २ त्रार्थश्लेषशब्दश्लषयो ससृष्टि-तयोलक्षण साहित्यदपणे यथा 'श दै स्वभावादेकार्थै श्लेषो नेकार्थवाचनम् श्लिष्टै पदैरनेकाथ भिधाने श्लेष इ यते इति

अद्वैत यथाज्ञापयसि

(इति सर्वे सुखोपवेश नाटयन्ति)

भगवान् (अद्वैतं प्रति) सर्वे वय भुक्तव त' पीतवन्तश्च केव म ध्वपरिश्रा ता' क्षुत्परिश्रान्ताश्च भव तः तदल विल बेन

श्रीवास आतिथेयोऽसि आतिथ्येन समुपचर्य तामेते भवता

अद्वैत अलमनया चिन्तया वयमपि भव त इव समाप्तसर्वा हिका एव

भगवान् (सप्रमोदम्) तदिदानीं हिमकरकरकलधौतजलधौते श्रीवासवासाङ्गणपरिसरे भगवत्सकीर्तनमङ्गलमङ्गीकुर्व तु भवन्त

सर्वे (सप्रमोदम्) भगवन् उत्थीयता स्वयमपि

भगवान् एषोऽह गच्छामि

(इति सकीतनस्थलीं प्रात सर्वे नि क्र न्ता)

(तत प्रविशति गङ्गादास)

गङ्गादास अहो अद्वैतदेव शान्तिपुरतः समागतोऽस्तीति श्रुत मस्ति न जाने किं भगवद्विश्वभरालये समुत्तीर्ण. श्रीवासालये वा तदस्य तत्त्वमवधारयामि (इति कतिचित्पदान्यादधाति)

(नेपथ्ये सकीर्तनकोला८)

गङ्गादास' (आक य) अहो श्रीवासालय समया समयासादि तसकलभक्तजनप्रमोदी प्रेमोदीर्णसकीर्तनकोलाहलोऽय मया श्रूयते तदित एवाद्वैतेनापि भवितव्यम् तदिह स्थित्वैव निभालयामि (न्ति निभाल्य) अहो सर्व एव कीर्तय तो भगवन्त विश्वभर नर्तयन्ति नृत्य न्ति च तदेव मन्ये

दुर्वारदैत्यघटय घटिते पटीयो
भारे स्वय भगवतापहृतेऽपि भूमेः
तस्यावसादमधुना विधुनोति देवो
भक्तैर्नटन्नटननिष्ठुरपादघातैः ८

(पुननिभाल्य) अहो

आनन्द किमु मूर्त एष परम· प्रेमैव किं देह
श्रद्धा मूर्तिमता दयैव किमु वा भूमौ स्वरूपिण्यसौ
म धुय नु शरारि किं नवविधा भक्तिर्गतैका तनु
तुल्यावेशसुखोत्सवो भगवता वक्रेश्वरो नृत्यति

(पुनर्नेप ये सभूय न दतुमुलो जयध्वनि लक)

गङ्गादास (निभाल्य) अहो महत्कौतुकम्

वक्रेश्वरे नृत्यति गौरचन्द्रो गायत्यम दं करतालिकाभि·
वक्रेश्वरो गायति गौरच द्रे नृत्यत्यसौ तुल्यसुखानुभूतिः ८

(पुनर्नेप ये तथैव जय"वनि कोलाहल उल्लल्लनिनद)

गङ्गादास (चिर निरूप्य) अहो भगव न्विश्वभर एव नृत्ये प्रवृत्तः

तथाहि

गभीरैर्हु रैर्निजजनगणान्बर्हिणयति
द्रुतैर्बाष्प म्भोभिर्भुवनमनिश दुर्दिनयति
महःपूरैर्विद्यद्व ययति दिक्षु प्रमदय
न्नसौ विश्व विश्वभरजलधरो नृत्यति पुरः ९

अपि च

दिशि विदिशि दृशा सरोजमालां नयनजलेन मधूनि तत्र त वन्
मधुकरनिकर भ्रवा च चक्रभ्रमिनटने जयताह गौरचन्द्र १

अपि च

पादाघातैरुरगनगरान दनिस्यन्दहेतो
र्बाहूत्क्षेपैरिव सुरपुरी । न्वे पण्डितस्य
आशाचक्र भ्रमयत इव भ्रा यदुद्योतदण्डै
जायाच्चक्रभ्रमणनटन देवविश्वभरस्य ११

(पुनर्निभाल्य) अहो अन तर भगवानद्वैतोऽपि नर्तितु प्रविष्ट

---

१ उत्प्रेक्षा कारो त्र २ साङ्गरूपकमलकारो त्र लक्षण साहित्यदपणे यथा अङ्गिनो यदि साङ्गस्य रूपणं साङ्गमेव तत् ति ३ व्यधिकरणरूपकालंकारो त्र

श्रीवासस्त्रिभिरेव सुस्वरतमैरामादिभि. सोदरै
गायत्येष कल स्वय च भगवा केश्वरश्चोत्सुक
मञ्जीराङ्गदहारक णधरः काञ्चीकलापादिमा
नद्वैतस्तनुमानिवैष भजनानन्दो नरीनृत्यते १२
स्थूलोष्णीषविलाससुन्दरशिरा कर्णद्वये ता डवा-
न्दोल मौक्तिककुण्डलो दि चलच्चामीकरस्र वर
पादाग्रे चलनूपुर पुलकितो बा पाम्बुधौताननो
नित्यान दमहाशयोऽपि महतावेशेन नृत्यत्ययम् १३

(अ बरमवलोक्य) अहो याममात्रावशिष्टेय त्रियामा उचितमेव घू र्णते नयनयुगलम् भगवत्या निद्रयाभिभूतोऽस्मि तदत्रैव क्षण निद्रामि (इति निद्रा नाटयन्स्वप्नायते) भो विश्वभर देव कुत्रासि कुत्रासि (इत स्व ा यिला पुन बुध्य) अहो किमयमालोकितो दु'स्वप्न' (इति मुहूर्तं हृदि भग वच्चरणौ विचि त्य पुननेप यामिमु मवलोक्य) अहो न कोऽपि दृश्यते सर्व एव भगवत्प्रमुखा' संकीर्तनोपरमे यथायथ शयनाय गतवन्त इव लक्ष्य न्ते भवतु तदहमपि स्वनिलय गच्छामि (इति कतिचित्पदानि परि क्रम्य) अहो विभातैव विभावरी (इति प्राचीमवलोक्य)

उ ङ्घ्य किंचिदुदयाचलवप्रध रा
प्राच्या दिशोऽम्बरतटीमवल बमानः
पादप्रसारणविधावपटुस्तथापि
बालो रवि' कलय कालवशादुदेति १

(इति कतिचित्पदानि गत्वा पुरोऽवलोक्य) अहो कोऽयं सत्वरः किंचित्पि क्षुरिव मुपैति

(प्रविश्य सभ्रान्त कश्चित्पुरुष)

पुरुष अहो ग ादास भवद्वाट्य देवो विश्वभर'

गङ्गादास (सो स्म्) अहो मे भागधेयम् यमवलोकयितु ग च्छन्नसि स एव स्वयमागतोऽस्मद्वाट्याम्

पुरुष अये एव पृच्छामि भवद्वाट्यामागत. किमिति

गङ्गादास (सवैमनस्यम्) कथमेव पृच्छसि

पुरुष अन्यस्मिन्नहनि प्रात· स्वनिलये गत्वा कृत्य करोति अद्य न गत इति शचीदेव्या प्रेषितोऽस्मि तदन्वेषण य (इत्युक्त्वैव पुनरन्यतो वेष्टुं नि क्रा त पुनरन्यत सभ्रा त सत्वरं प्रावश्य पुनस्तथैव पृष्ट्वा निष्क्रान्त पुनरन्यत पुनरन्यत पुनरन्यतश्चेति तथा तथैव पृष्ट्वा पृष्ट्वा निष्क्रामति)

गङ्गादास (सवैमनस्यम्) अहो फलितमिव दुःस्वप्नेन तत्किं करोमि अद्वैतादयो यत्र तिष्ठन्ति तत्रैव यामि (इति कतिचित्पदान्या दधाति)

(तत प्रविशति दौर्मनस्येन वितर्क ना य तो द्वैत दय)

अद्वै श्रीवास किमेतत्

मतेऽस्माक प्रातः स्वभवनमुपेतोऽस्ति भगवा
गृहे श्रीवासादे· स्थित इति जनन्या मतमिदम्
इति भ्रान्ताः सर्वेऽप्रकृतमनसः सम्प्रति वयं
कथ विघ्नोऽकस्मादयमशनिपातोऽद्य भविता १५

ीवास ये ये प्रहितास्तद वेषणाय तेषां न कोऽपि प्रत्यावर्तते

अद्वैत अन्वि य यदि पश्यति तदैव प्रत्यावर्ति यते कोऽपि किमप्य नुसंधान न लब्धवान् एतत्किं सभ व्यते

इह ग्रामे को वा स्थगयतु तमात्मप्रकटन
स किं वा स्वात्मान स्थगयितुमपीशः प्र भवतु
अप ोतुं शक्यो न भवति जनैश्चण्डकिरणः
कथंक र व्योम्नि स्वमपि स दिने व्यन्तरयतु ६

श्रीवास (पुरोऽवलोक्य) अय गङ्गादासः समायाति तदय प्रष्टव्य·

गङ्गादास (उपसृत्य) भो भो महाभागा कथमाकस्मिकोऽय विप्लवः

१ प्रतिवस्तूपमालङ्कारोऽत्र तल्लक्षण साहित्यदर्पणे यथा प्रति स्तूपमा सा स्याद्वाक्ययोर्गम्यसा ययो एकोऽपि धम सामान्यो यत्र निर्दिश्यते पृथक् ति

सर्वे अहो अयमपि तदनुसधानधुरधर. यदयमस्मानेव पृच्छति

अद्वैत (सास्रम्)

हे विश्वंभरदेव हे गुणनिधे हे प्रेमवारानिधे
हे दीनोद्धरणावतार भगवन्हे भक्तचि तामणे
अ धीकृत्य शो दिशोऽ धतमसीकृत्याखिलप्राणिना
शून्यीकृत्य मनासि मु ति भवा केनापराधेन नः १७

मुरारि भो भो देव अद्वैत वमतिदुरवगाहगभीरोऽसि कथ मनिर्णयेनैव विलपसि त्वादृशामीदृशानुतापेनैव नितरां प्रतप्ता भविष्यति तपस्विनी शचीदेवी

श्रीवास सत्यमाह मुरारि· यत.

त मात्रपुत्रा बत सा तदेकचक्षुस्तदेकस्वसुखानुभूतिः
मातापि तस्मिन्गुरुदेवबुद्धिर्न तं विना जीवति सा क्षण च १८

तदधुना तज्जीवनरक्षैव नः कर्तुमुचिता तस्माद्भो गङ्गादास भवद्व चसि तस्याः प्रत्ययोऽस्ति त्वया तथा कथनाय यथासौ जीवनेन न वि युज्यते

गङ्गादास ंयथाज्ञापयन्ति भव तः (इति नि क्रान्त)

गदाधर (सकरुणम्) भो नाथ

गतो यामो यामावहह गतव तौ बत गता
अमी यामा हा धिग्दिनमपि गतप्रायमभवत्
क्रमादाश पाशस्रुटति बत हा सार्धमसुभि
स्तथापि वद्वाता न हि गतवती श्रोत्रपदवाम् १९

(इति मु ति)

वक्रेश्वर

त्यक्त्वा न. किमु यास्यसीति करुणासि धो गत या निशि
प्रेम धिक्यपरिप्रकाशसरसा नानानुक पा व्यधा

परिकरालंकारो त्र तल्लक्षणं यथा साहित्यदर्पणे उक्तिर्विशेषणै साभिप्रायै परिकरो मत इति

कारुण्य तव तच्च कीदृशमहो भूयस्युपेक्षा च वा
कीन्क्ते बत हृत्पते द्वयमिदं हे नाथ लोकोत्तरम् २
(इति मु ति)

मुरारि (सक्षोभम्)

आहार्य धैर्यं क्रियते बहिर्यत्क्षिणोति तद्बाष्पभरोऽ तरस्थ.
पुन. पुनर्बद्धमपि प्रवृद्धः सेतु यथा सैकतमम्बुपूर २१
(ति फूत्कृत्य रुदन्भूमौ निपतति)

श्रीवास (तमालोक्य) अतिगभीरोऽय दुर्निवारानुरागतारत्य संप्र वृत्तः भवत्येव

पयः पूर. स्थिर एव तावत्करोति य वन्न हि सेतुभङ्गम्
भग्ने तु सेतावतिदुर्निवारः समस्तमाप्लावयितु समर्थ· २२
भो नाथ विश्वभर क्वासि ासि
पूर्वं मृत कथमहो बत जीवितोऽह
भूयोऽपि मारयसि किं बत जावयित्वा
दुर्लीलता तव विभो न मनोऽधिग या
न वीश्वरो भवति केवलबाललील २३
(इति रोदिति)

कुन्द

नालोक्यते तव मुख नयनेन क नो
नाकर्ण्यते तव वचः श्रवणेन वा किम्
हे प्राणनाथ भगवस्त्वदुपेक्षिताना
कष्टेन वा किम ना हतजीवितेन २४

जगदानन्द (सब पम्)

नासादृशैस्तव पदा बुजसङ्गहीनै
र्जीवि यते क्षणमपीति मनो न आसीत्
लज्जामहे दयित हे तत एव देव
जीव म एव दिवसास्त्वदनाक्षणेऽपि २५
(इति मूर्च्छति)

दामोदर हा प्राणनाथ ासि कासि
प्राणा न किं व्रजत मुञ्चत जाड्यमुच्चै
प्राणेश्वरश्चरति साप्रतमेक एव
तत्पादपङ्कजमुपेत्य भजध्वमद्धा
प्रेमात्मनामहह मास्तु कुले कल २६

(इति मूच्छति)

हरिदास अहो कष्टम्
प्र णेश्वरेण सह चेत्सहसा न जग्मु
प्राणाः पुनर्झटिति नैव भवन्ति गन्तुम्
धिक्कारकोटिकटुतामनिश सहन्ते
सीदन्ति नैव वहतस्त्ववसादयन्ति २७

भ तु क्षणमवगच्छामि
यदि नयनयो. प थान मे न याति स ईश्वरो
यदि करुणय नो दृक्पात करोति स मद्विधे
कुलिशकठिनाना वोऽसूना सहस्रमपि क्षणा
त्तृणमिव परित्यक्ष्याम्यञ्जस्तदङ्घ्रिपरी सया २८

(ति धैयमवष्टभ्य चिन्तां नाटयति)

विद्यानिधि
प्रेमन्नमोऽस्तु भवते यदकैतवेन
नोत्पद्यसे चन हा बत किं ब्रवीमि
तस्मि कैतवकृपेऽपि सकैतवस्त्व
नो चेत्कथ नु मम जीवनयोग एषः २९

(इति भूमौ पातत्वा विह सन्रोदिति)

मुरारि (धैर्यमवष्टभ्य) हहो महानुभ वा विचारय किमेका किनैव प्रभुणा क्वापि गतम् किं वा कश्चिदन्योऽपि गत इति

अद्वै अय विचार कथमुत्पद्यताम्

न गच्छ पथि केनापि स दृष्टो गौरच द्रमाः
विद्यत्पुञ्ज इवाकस्माद्दशोरविषय गत ३

रारि अस्त्युपायो विचारस्य

सर्वे कथमिव

मुरारि आत्मवर्गमध्ये विचार्यताम् कोऽत्र न वर्तते

सर्वे स यगुक्तमेतेन (इति मिथो विचारयन्ति)

रारि अहो मयाकलितम्

सर्वे तत्किम्

मुरारि नित्यानन्दमहानुभाव अ चार्यरत्नश्च

सर्वे कुत इदमुपयुज्यते

मुरारि एतावति कष्टे यद्यत्र तावभविष्यता तदात्रैव गमि यताम्

सर्वे (किंचिदाश्वस्य) अहो अस्माक यथा तथा भवतु स चेदेकाका न भवति तेनैव ।कचिदाश्वस्तमस्मामि.

अद्वैत अये मुकुन्द त्वमनया वार्तया मातरमाश्वासय मात प्रति चि ता न कार्या नित्यानन्दाचार्यरत्न भ्या कार्यविशेषार्थं पि देवेन गतमस्ति समागतप्रायोऽयम् इति वक्तव्यम्

न्द यथाज्ञापयति (इति नि क्रान्त)

अद्वैत हहो विश्वभरदेवप्रियाः किंचिद्धैयमिव जात चेतसः यतस्तावुभावेवाभियुक्तौ तयो सतो स्वतन्त्रोऽपि भगवानस्वात य न क रि यति हन्त किमुद्देश्यं तस्य यदर्थमिदमध्यवसितम्

तीर्थाटनं चेत्किमपह्नवेन ग तु समर्था स तेन सर्वे
तयोर्विशेषप्रणये हित चेदत्रापि तत्संभवितु च ोग्यम् ३१

(इति सर्वे क्षण चि तयन्त तूष्णीं तिष्ठन्ति)

(नेपथ्ये)

हन्त भो कष्टम्

हा धिक्क महो दिनत्रयमभूद्व र्तापि तैर्न ुता
ते जीवन्ति मृता न ।क किमथवा दत्ताश्रया मूर्छया

सत्यज्य प्रियमीश्वर बत विधे दृष्ट्वा च त त दृश
प्रत्यावृत्तिपरः कथ नु पुरतस्तेषा भविष्याम्यहम् ३२
तदिहैव स्थित्वा शरीरत्याग एव यतनीयम्

सर्वे (श्रुतिमभिनीय) अहो आचार्यर स्येव स्वर श्रूयते बा प गद्गदतया स यङ्ग नालक्षि तन्निपुणमवधारयाम (इति सव वधानं नाट यन्ति)

(पुननपथ्य)

हन्त हन्त किमिति पामरेण मया तत्सङ्गे न गतम् अथवा
शिव शिव हठ कर्तुं शक्यो न हि प्रभुणा सम
निजमभिमत स्वेषा चित्ते प्रवर्तयति प्रभु
प्रकटयति हि स्वीय सूर्यः स्वकान्तमणौ महो
न विघटयितु शक्नोत्येष स्वदाहकर च तत् ३३

सर्वे (आकर्ण्य) सत्यमेवायम चार्यरत्नः तन्मन्यामहे भगव तं वि मुच्य समागतोऽयम् यतः शिव शिव हठ कर्तुं शक्यो न हि प्रभुणा समम् इति निगदति हन्त भोः भर्जितमिव दुर्दैवदवदहनज्वालय मप्यासादितमाश्वासबीजम्

मुरारि एव मन्ये नित्यान ददेव सङ्गे वर्तते अय कार्या तर यात्र प्रेषित इव

अद्वैत किं त वदस्यात्र कार्यम् न तावद्वित्ते प्रयोजनं यदर्थम यमागमि यति न मातरि च तथा ममत्वम् यत्तामेव सा त्वयितु प्रहे ष्यति न ता गसादृशा सौभा यम् यदस्माल्ला यितु प्रस्थापयि यति तदलमनया विचिकित्सया तन्न वेद्मि किमपर फल धृतमस्ति मादृशा दुर्दैवविषभूरुहेण (इति सचिन्तस्तिष्ठति)

(पुनर्नेप य)

हा कष्टम् पामर एवास्मि यत.
पश्चात्पश्चात्कथमनुसृत नैव हा ह त दृष्ट्वा
तादृग्रूप कथमिव दृशौ ह त तापैर्न द धे

याहीत्युक्ते सति भगवता जीवित किं न यात
हा हा विश्वभर तव तया मायया वञ्चितोऽस्मि ३

सर्वे (आकर्ण्य नेपथ्याभिमुखम्) निराक्षामहे मात पर विलम्ब ताम् (इति तद्वीक्षमाणास्तिष्ठन्ति)

(तत प्रविशत्याचार्यर)

आचार्यरत्न

च स्निग्धश्याम कुटिलकचपाश स विधि
च श्रोणीभारः शिव शिव कौपीनमपि तत्

(क्षणं स्थित्वा परामृश्य)

प्रतीतिर्द्रष्टृणा परमियमहो वस्तु नहि त
त्समस्तस्याधारात्मनि चिति समस्त स्फुरति हि ३५

सर्वे (उपसृत्य सोत्कण्ठम्) आचार्य कथय कथय क्वासौ भगवान्

आचार्यरत्न ह त भो किमेष पामरः कथयतु

अद्वैत कथय किं वृत्तम्

आचार्यरत्न (णे) एवमेव

अद्वैत ह त कथमय करेण पिधापनीयोऽर्थः तत्स्फुट कथय सर्वे शृण्व तु (इति सबाष्पमुच्चै)

तास्ता: कीर्तननृत्यकौतुककला हा धिक्समाप्तिं गता
स्तास्ता प्रेमविलासहासमधुरा वाचः स्थिता नो हृदि
सा प्रीतिः करुणा च सा शिव शिव स्मृत्येकशेषाभव
त्सन्यासेन तव प्रभो विरचितः सर्वस्वनाशो हि न ३६

(सर्वे आकर्ण्य मोहं नाटयन्ति)

(प्रविश्य सत्वरम्)

गङ्गादास अचार्य कथय कल्याणिनो देवस्य कल्याणमित्येष पृच्छति भगवन्माता

(आचार्या वा परावृत्य तिष्ठति)

चैतन्ये

अद्वैत मन्नाम्ना तां ब्रूहि
रामस्य विपिनवास. कृ णस्य च माथुर गमनम्
अस्य च सन्यासविधिस्त्रितय मातृत्रयस्य सोढव्यम् ३७

गङ्गादास हहो तया येतदनुमितमस्ति पुरैव उक्त च
किं गोप्यते भवद्भि. स खलु ज्येष्ठस्य वर्त्म शिश्राय
लोकोत्तरचरितानां तुल्ये काठिन्यकारुण्ये ३८

अद्वैत भवत्येवमेवासौ धैर्यवती कथमन्यथा तादृश पुत्रः (क्षण स्थित्वा विमृश्य) भवत्येवम्
सन्य सकृच्छम· शा तो निष्ठाशान्तिपरायण:
इति नामानि देवोऽय यथार्थान्यधुनाकरोत् ३९

अपि च
असिन्नेव हि भगवति यथार्थमभव महावाक्यम्
मुख्यार्थतया हि तया जहदजहत्स्वार्थलक्षणा नात्र [1] ४

आचार्य आमूलत कथय

आचार्य ह त एतदथमेव जीवित मया तदितो निशावसाने नृत्योपरमसमय एव मत्करमाल य कतिचित्पदानि गच्छन्नग्रे नित्यान न्ददेवमालोक्य त्वमप्येहि इति सङ्के कृत्वा सुरधुनीमुत्तीर्य चलितवान् मयोक्तम् देव कथय कथमेक किना कुत्र गम्यते इति तदना क यस्तूष्णीमेव चलन्ननुपदमाव भ्यामनुगम्यमान एव काटोयानामान ग्राममासाद्य केशवभ रतीयती द्रमुपसेदिवान् तदावाभ्यामात्मगतमेव विचिन्तितम् भगवास्तुर्याश्रम परिजि क्षु. इति चिन्तयित्वापि प्रभु तेजसा पराभूताभ्या न किंचिदपि वक्तुमशक्यत परेद्यवि आच र्यरत्न वयैतस्य कर्मण पूर्वक्रिया क्रियताम् इत्युक्तेन मया भगवानवादि

---

१ जहत्स्वार्थ क्षणा अजहत्स्वार्थलक्षणा चेति एतयोरेव लक्षणलक्षणा उपाद न णेति न मा तरम् तयोर्लक्षण यथा स हित्यदर्पणे अर्थ स्वस्य वाक्यार्थे परस्या यसिद्धये उपलक्षणहेतुल देषा क्षणलक्षणा स्यार्थस्येतराक्षेपो क्यार्थे वयसिद्धये स्यादात्मनोऽप्युपादानादेषोपादान क्षणा इति

तत्किं कर्म इति तदनु ग दितं भगवता मयैतत्कर्तव्यम् इति समन तर प्रतिपत्तिमूढेन मया मूकवदनुत्तरेण रोदितुमेव प्रवृत्तम् सम नन्तरमनायत्त्यैव विधिवद्विहित सकलमेव कर्म ततो यद्वृत्त तद्वाचा वक्तु न शक्यते

सर्वे (आक य सविषादम्) हा देव कथमिदमध्यवसितम् अथवा मद्विधानामेव दुःखद्रुमफलकालविलसितमिद किमनुयोज्य ते प्रभुचरणा ह त हन्त स्मरणदशारूढमपि तन्नो मनः कृ तति कथमाच र्य भवता म् (इति वैक्लव्य नाटयन्ति)

अद्वैत किं तावत्तदाश्रमसमुचित नामाङ्गीकृत भगवता

आचार्य णचैतन्य. इति

अद्वैत (सचमत्कारम्) महो समुचितमेवैतत्

ष्णस्वरूप चैतन्य कृ ष्णचैतन्यसज्ञित
अत एव महावाक्यस्यार्थो हि फलवानिह ४

केशवभारती हि श्रुतिरेव तस्याः केशवस्य भारतीत्वात् यथा

मयादौ ब्रह्मणे प्रोक्ता धर्मं यस्या मदात्मक

ति अत केशवभारतीप्रतिपादित ुतिप्रतिपाद्यमेवेति तत्कथ याचार्य कथय

किं तत्रास्ति किमन्यत' स भगवान्

आचार्य

तत्कालमेव प्रभु
र्धृत्वा मस्करिभूमिकां चलितवान्

अद्वैत

त्वां नो किमप्युक्तवान्

आचार्य

प्रेमान्ध स्खलिताङ्घ्रिरस्रुसलिलैर्निर्धौतवक्षःस्थल.
स्व त्मान च न वेद हन्त किमसौ हा हन्त मां वक्ष्यति ४२

---

१ न्य सिवेषम्

अद्वैत भवान्कथं नानुगत·

आचार्य

नित्यान दस्त्वकथयदिद यामि देवस्य पश्चा
त्पश्च देन पथि पथि परिश्राम्य तैस्तैरुपायैः
अद्वैतस्यालयमपि नयाम्येष याहि त्वमेता
वार्तामार्तानुपहर सुख प्रापयाद्वैतमुख्यान् ३

अद्वै धन्योऽसि नित्यानन्ददेव धन्यो सि जितं भवता नि ष्कैतवसौहृदेन तदागच्छतानया वार्तया भगवतीं शचीमाश्वास्य वयमपि समुचितमाचराम

(इति निष्क्रा ता सर्वे)

इति सन्यासपरिग्रहो नाम चतुर्थो ङ्क

पञ्चमोऽङ्क

(तत प्रविशति श्रीकृ णचैतन्य पश्चान्नित्यान दश्च)

श्रीकृष्णचैतन्य

एता समास्थाय परात्मनिष्ठ मध्यासितां पूर्वतमैर्महद्भिः
अह तरिष्यामि दुर तपार तमो मुकुन्दाङ्घ्रिनिषेवयैव १

(इति स्खलित नाटयति)

नित्यानन्द (स्वगतम्) अहो अद्भुतम्

प्रेमामृत किल तथाविधमेव किंतु
निर्वेदखेददहनेन श्रुतत्वमेत्य
आवर्त्यमानमिव गच्छति पि डभाव
कालेऽस्य हृद्गण इव व्यथनाय भ वि २

तदेकाकिना मया किं क्रियते भवतु चि तयामि (इति पुनर्निरूप्य) अहो अद्भुतम्

नृत्योर्म क. प्रकटितमहोल्लासहूकारघोष
स्वेदस्त भप्रभृतिविलसद्भावरत्नावलीकः

थितत्वम्

अन्तर्वेगः समजनि विभोः सोऽयमान दसिन्धु
नों जानीमः परिणतिरहो भाविनी कीदृगस्य ३

अहो बलवता वातेन चालित केशरपरागपुञ्ज इव चलत्येषः मयापि सत्वरेणानुगन्तु न शक्यते विरतसकलेन्द्रियवृत्तिस्तत इत एव गच्छ न्नस्ति न तूद्देश्यपुरःसर क्वापि तथा हि

अप थाः पन्था वा न भवति दृशोरस्य विषयः
किमुच्च नाच वा किमथ सलिलं वा किमु वनम्
प्रभिन्नोऽय वन्यो गज व चलत्येव न पुनः
पुरो वा पश्चाद्वा कलयति न चात्मानमपि च ४

भवति हि

आत्मारामा. किमपि दधते वृत्तिहीनेन्द्रियत्वं
प्रेमारामा अपि भगवतो रूपमात्रैकमग्नाः
स्वान दस्थो भवति यदि चेदीश्वरोऽपि भेदो

आ ज्ञातम्

निम्नानन्दो भवति भगवाञ्जीव आन दनिम्न· ५

तदिदानीं किं करोमि (इति क्षण स्थित्वा)

नाहारोऽद्य दिनत्रय न च पय.पान किमन्याः क्रियाः
कौपीनैकपरिच्छदो निजसुखावेशैकमात्रानुगः
गच्छन्नेव दिन निशामपि विभुर्नो वेत्ति किं कुर्महे
हे गौराङ्ग कृपानिधे कुरु कृपामार्ते मयि प्रीयताम् ६

(क्षण स्थित्वा) एतेन किंचिदाश्वस्तमपि भवति चेतः तद्यथा

अ न दवैवश्यमिदं महाप्रभोर्बभूव नः सम्प्रति जीवनौषधम्
विभ्र मय वर्त्म विवेचनाक्षम ने येऽहमद्वैतविभोर्गृहानमुम् ७

(इति साश्वासमनुगच्छति)

(नेपथ्ये हरिं वद हरिं वद' इति सभूय कोलाहल)

ने नन्द (पुरोऽवलोक्य) अये अद्भुतमिदम् यदमी गोरक्षबाला

भगव तमालोक्य सकौतुकादरभक्तिश्रद्धान दचमत्कार हरिं वद हरिं वद इत्युच्चैर्जल्पन्ति

(भगवान्पूव भ्यासेन हरिध्वनिं श्रुत्वा किंचिदान दसु गोत्थित इव हरिध्व न्यनुसारिणीं गदशं नयनकमले समु मील्याव लोकयति)

नित्यानन्द (निरूप्य) अहो उपकृत गोरक्षडि भैः यदमीषा हरिध्वनिमाकर्ण्य किंचित्तरामान दनिद्रोत्थित इवायं महामन्त्राकृष्ट इव फणिदष्टस्तमेव प थानमनुसर्पति

भगवान् (उपसृत्य) ब्रूत भो· ब्रूत हरिम् (इति पुन पुन प्रजल्पति)

(प्रविश्य गोरक्षका शिशव परितो द ड्वन्नत्वा करतालिकाभिर्हरिसकीतन कुर्वन्ति भगवान्सस्पृहमाकर्णय मुहूर्तं प्रस्थानतो विरमति)

नित्यानन्द (सान दम्)

उ माद आन दकृतो हि नानाचापल्यकृज्जाड्यकृदप्यम दम्

चापल्यजाड्योभयकृ कश्चित्कश्चिद्भ्रमग्रस्ततया समानः ८

तदिदानीं चरमावस्थ इव भगवत आनन्दोन्मादो जातः तथा हि

उ मील्य न्शौ पश्यति न किमपि विषयीकरोत्येष

अर्धबधिर इव किंचिच्छृणोति न तदर्थमुपयाति ९

भगवान् (पाणिकमलेन तेषा शिर परामृश्य) अये साधु कीर्तित भव द्भिर्भगवन्नाम कृतार्थीकृतश्चाहम् तज्जानीत वृ दा न केन पथा गम्यते

नित्यानन्द (सहषम्) अयमवसरो मम (इति तेषा मध्यादेकमानीय) तात एष मार्गो वृ दावनस्येति कथय

बालक जह आणवेदि भअव (इत्युपसृत्य) भो भअव एसो म गो वुन्दावणस्स (क) (इति नित्यान दोपदिष्टमार्गं दर्शयति)

(भगवा सान दावेश तमेव मार्गमनुक्रामति)

(शिशव प्रण य नि क्रामन्ति)

नित्यानन्द कृत निस्तीर्णोऽस्मि सप्रति सपत्स्यते मे मनोरथ. यदनेन पथैवाद्वैतवाटीमासादयितु शक्यते (इति तेन पथा तमनुगच्छन्क्रिय-

(क) यथाज्ञापयति भगवान् भो भगवन् एष मार्गो वृन्दावनस्य

दूरं गत्वा सपरामर्षम्) अहो कथमह न परिचीये परपरिचयदशा किंचित्तरामिवास्य जातास्ति तत्परीक्षे च निजसौभाग्यम् (इति निकटमुपसर्पति)

भगवान् ('एता समास्थाय परात्मनिष्ठाम् (५ १) इत्यादि पुन पठित्वा) अहो सम्यग्गीत भिक्षुणा मुकुन्दसेवयैव तमस्तरिष्यामि न त्वनया परात्मनि या अस्या आस्थामात्र कार्यं न त्वेषैवोद्देश्या तद्वृन्दावन गत्वा मुकुन्दसेवैव मानसीकर्तव्या (इत्याकाशे लक्ष्य बद्ध्वा) हहो कियद्दूरे वृन्दावनम्

नित्यानन्द (उपसृत्य) देव दिवसैकप्राप्यमस्ति वृन्दावनम्

भगवान् (स्वप्नजाग्रतोरन्तरालदशामापन्न इव सचमत्कारम्) कथमहो श्रीपादनित्यानन्दोऽसि

नित्यानन्द देव स एवाहम् (इत्यर्धोक्ते बाष्पगद्गदक ठस्तिष्ठति)

भगवान् श्रीपाद कथय कुतो भवन्तः

नित्यानन्द देवस्य वृन्दावनजिगमिषामाश्रित्य मयापि तद्दिदृक्षया चलता भगवत्सङ्गो गृहीतः

भगवान् भद्र भोः भद्रम् एहि सहैव गच्छाव (इति सानन्दं गच्छति)

नित्यानन्द भगवन् इतः (इति कियदूरं नीत्वा) भगवन् इतः कियद्दूरे यमुना भगवती वर्तते तदवगाहनं कर्तुमुचितम्

भगवान् ह त यमुनाद्य विलोकितव्या

नित्यानन्द अथ किम्

भगवान् (हर्षं नाटयित्वा) श्रीपादः सा

नित्यानन्द इत इतः (इति कियदूरं नीत्वा गङ्गामासाद्य) भगवन् इय यमुना

भगवान् (सानन्दं प्रणम्य स्तौति)

चिदानन्दभानोः सदा नन्दसूनोः परप्रेमपात्री द्रवब्रह्मगात्री
अघानां लवित्री जगत्क्षेमधात्री पवित्रीक्रियान्नो वपुर्मित्रपुत्री १

नित्यानन्द भगवन् अवगाह्यतामियम्

भगवान् यथारुचितम् (इति स्व नममिनयति)

नित्य नन्द (स्वगतम्) अहो निर्वृतोऽस्मि महामत्तवन्यकुञ्जरो मन्त्रेणैव वशाकृत· तत्परिशेषमस्य कर्मणः किमप्यस्ति तदपि सपाद यामि (इति पारतो वलोक्य कञ्चिदाह्वयति)

(प्रविश्य कश्चित्पुरुष प्रणमति)

नित्यानन्द (जनान्तिकम्) अये इदमनतिदूरे पारेगङ्ग भगवतो ऽद्वैतस्य पुरम् त्वमितस्त्वरित गत्वा विज्ञापय नित्यानन्द. केनचिदन्येन सन्यासिना सह निकटवर्ती भव तमपेक्षते तत्त्वरताम्

रुष एषोऽह तथा करोमि (इति सत्वर निष्क त)

नित्यानन्द (स्वगतम्) अहो अद्य दिनत्रय जातम् जलस्पर्शो ऽपि न जात तदहमपि स्नामि (इति तथा करोति)

(नेपथ्य)

आशापाशद्विगुणवलितैस्तद्गुणैरेव बद्धा
प्राणा नो यद्विरहविधुरा हन्त ग तुं न शेकुः
सप्रत्येतैरुपकृतमहो तन्मुख दर्शयद्भि
र्दिष्टे हीष्टे भवति सहसा ह त वामोऽ यवामः ११

नित्य नन्द (रादाकण्य) अहो आचार्य एवाय प्रस्तौति तत्सु विहितमेव विधिना अत· पर ममातिभारो लघूभूत· (भगवन्तमालोक्य) अहो कष्टम्

अ भ·स्य·दैः स्तिमितवपुषं लज्जयाभ्यासहाने
कौपीनाच्छादनमपि न निर्गाल्य निःसारिता बुम्
देव रक्ताम्बुजदलचयैश्छाद्यमानोत्तमाङ्ग
स्नानोत्तीर्णं करिवरमिव स्वर्णगौरं निरीक्षे[२] १२

तदाकलयामि कियान्विल बोऽद्वैतागमनस्य (इति पुरोऽवलोकयति)

---

१ सामान्येन विशेषसमथनरूपोऽयमर्थान्तरन्यास तल्लक्षणं साहित्यदर्पणे यथा सामा य व विशेषेण विशेषस्तेन वा यदि कार्यं च कारणेनेद कार्येण च समर्थ्यते - साध र्येणेतरेणाथान्तरन्यासो धा तत इति २ उपमालंकारश्चात्र

(तत प्रविशति उत्क ठा नाटय परितो परिमितपरिवारो ैत)

अद्वैत (पुरोऽवलोक्य) अहो अयमय देव·

चूडावियोगादरुणेन वाससा दूरादसौ चेदनसाविवेक्ष्यते
तथापि हेमप्रतिमेन तेजसा लावण्यभूम्नापि स एव भाति न· १३

अहो अतिर यम्

रक्त बर कनकपीतमिद तदेव
देवस्य पश्यत वपु सदृशीकरोति
गौरारुणस्य परिप महारसस्य
वैरा यसारसहकारफलस्य लक्ष्मीम् १४

(इति त्वरमाण उपसृत्य ध्य नामालितनयनस्य भगवत पुरतोऽवस्थाय मुक्तक ठं रोदिति)

भगवान् (सत्वरमक्षिणी समुन्मील्य) कथममी अद्वैताचार्यमहानु भ व

नित्यानन्द भगवन् एवमेतत्

भगवान् (गा परि वज्य) कथय कथमिहस्थोऽह भवद्भिरवगत. कथ वा ममानुपदमेव भवानपि दावनमनुप्राप्त अथ वा ममैवाय स्व ·

अद्वैत (सबा पमात्मगतम्) अहो देवस्यात्र वृ दावनप्रतीतिरेव जातास्ति (प्रकाशम्) देव नाय ते स्वप्न· अपि तु स एवाह पामर

(इात स्खलितं नाटयति)

देव (बा्भ्यामालङ्ग्योत्थापयन् सबाष्पम्) भवतु भो अद्वैत त्वमेव वृन्दावन त्वय्यनवरत भगवत्पादकमलसयोगात् तत्कथय कुत्रागतोऽस्सि

अद्वैत इय भगवती भागीरथा ्दमिदपारे मदीय पुरम्

भगवान् (बहिर्वृत्ति नाटयित्वा) श्रीपाद भवता यमुनेयमित्यभाणि

नित्यानन्द अस्यां यमुना वर्तते न देव एव जानातु

भगवान् श्रीप दस्य नाट्येनैव नाटितोस्मि

(अद्वैत आशापाश (५१)इत्यादि यच्छ दे तच्छ दे च लच्छ दं दत्वा पुन पठति)

अस्या पारे

नित्यानन्द भो अद्वैत अस्य द ड्ग्रहणावधि ममैव द डो जात. दिनत्रयमाहारविरहात् देवस्य तु स्नान दभोगेनैव तृप्ति तदलमत्र कथाप्रसङ्गतुङ्गिम्ना

अद्वैत (पारजनकरात्प्रत्यग्र कौपीना- दिने आनीय पुनर्भगवन्त स्नापयित्वा प्रा हयति सकरुणम्)

देवोचित च परिधापितमस्ति पूर्व
भिक्षूचित च वसन परिधापयामि
लक्ष्मी. समा तव समश्च मुखप्रस दो
हा ह त नो नयनयोर्विषम तदेतत् १५

तदिदमनतिदूरमेव मे भवनम् तदलकर्तुमर्हन्ति भगवच्चरणा.

भगवान् एतदर्थमेव श्रीपादेनाह प्रतारितोऽस्मि

अद्वैत भगवा कस्यापि प्रतायो न भवति किंतु

ईशोऽपि स्यात्प्रकृतिविधुरः स्वीयया मायया्व
स्वच्छ दोऽपि स्फटिकमणिवत्सनिकृष्टेन योगात्
इत्थ केचिद्वयमिह किल ब्रूमहे बालखेला
प्राय लीलाविलसितमहो सर्वमाशस्य सत्यम् १६

उभयथैव न प्रतार्योऽसि अस्य च नैष दोष श्रीपादत्वात् श्रिय पातीति श्रीप कृ णः तमाददातीति तथैवानेन कृत तदग्रे भवन्तु भग व त. अद्य प्राथमिकी भिक्षा ममैवालये भवतु भगवतः

भगवान् यथारुचित भवते तदादिश प थानम्

अद्वैत इत इत· (इति नावमारोपयति)

नित्यानन्द (अ क र्य) भो अद्वैत नवद्वीपे कश्चित्सहितोऽस्ति

अद्वैत अथ किम् सर्वे समागतप्राया एव

भगवान् भो अद्वैत अपूव नो भवद्भवनगमनम्

अद्वैत श्रीवासस्येव क मे तान्श सौभा यम् यस्य भ ने प्रति दिनमेव देवित देवेन

नित्यानन्द भो अद्वैत अत· पर महीयसी लोकयात्रा भाविनी

स्वयप्रकाशिनी हि भगवद्वार्ता तत्रापि भगवतो मथुरागमन प्रथितमस्ति सम्प्रति तद्भवनसुभगंभावुकभावुके भगवति सर्व एवाबालवृद्धतरुणाः करुणापारावारमधुनैवामुमवलोकयितु समागमि यन्ति लोकाः तद्यावत्तेषां तथाप्रचारेण न भूयते तावदलक्षिता एव भवद्भवन प्रविशाम

अद्वैत एवमेव (इत कतिचि पदानि परिक्रम्य) भो देव इदमिद मसद्भवनम् तावत्प्रविश (इति सर्वे प्रवेश नाटयन्ति)

(नेपथ्ये)

विश्वभरः स भगवाञ्जननीं प्रतार्य
धृत्वा यतेरनुकृतिं मथुरा यियासु
व्याजेन शान्तिपुरमागमित· स नित्या
न देन भोश्चलत भोश्चलतेक्षण य १७

नित्यानन्द (आक र्य निरूप्य च) अद्वैत श्रुतं दृश्यता च तदिहत्या एवैते सपद्येव पर:सहस्रा बभूवुः कियता विल बेन लक्षसख्या भविष्यन्ति तदिह द्वारि दौवारिकैर्भूयताम्

(अद्वैत प्रतिद्व रि दौवारकान्नियोज्य देवमग्रत कृत्वा नित्यान देन सह प्रवेशं नाट यन्निष्कान्त)

(तत प्रविशन्ति भगवद्दर्शनोत्कण्ठिता पुरुषा)

केचित्

नवद्वीपे यान्क्समजनि दृशोर्नः पदमसौ
तदन्याकारत्व यदपि मनस क्षोभजनकम्
तथाप्युत्कण्ठा नः शिव शिव महत्येव वलते
ह्यनाहार्य वस्तु प्रकृतिविकृतिभ्या समरसम् १८

तदधुना जानीम क्व भगवान् (ति परित परिक्रामन्ति)

(अन्यस्या दिशि)

अन्ये

पूर्वाश्रमे मधुरिमप्रथिमा य आसी
दस्येश्वरस्य सदृशोरतिथिर्न नोऽभूत्

अद्यापि चेन्न स विलोक्यत एव तन्नो
धिग्ज म धिग्वपुरहो धिगसून्धिगक्षि १९

अपरे ह त भोः आगच्छतागच्छत भगवानद्वैतपुर प्रविष्ट इति श्रुतम् तत्रैव प्रविशाम (इति सोत्क ठमुपसृत्य) अहो अमी दौवारिकाः सर्वानेव निवारयन्ति भद्रममी एवानुनेया दातव्य च किंचिदेतेभ्यः (इति निकटमुपसर्पन्ति)

(तत प्रविशन्ति वेत्रपाणयो द्वारोप तनिविष्टा दौवारिका)

दौवारिका अरे पुरुषाः क्षण विलम्ब ता यावत्तुरीयाश्रमपरिग्रह. कृतो भगवता तावदनाहारेणैव स्थीयते अद्यैव भिक्षा भवि यति तदधुना कोलाहलो न कार्य. उपविश्य स्थीयता भिक्षोत्तर भ वानवलोकनीय.

(नेप थे)

भगवन् इत इत'

दौवारिक निरूपयामि (इति समुच्छ्रितं स्थलमारुह्य उद्वीक्षमालोक्य च) अये कृतभिक्ष एव भगवान् यदयम्

श्रीखण्डपङ्कपरिलिप्ततनुर्नवान
शोणाम्बरो धवलमाल्यविराजिवक्षा'
हेमद्युतिर्विजयते हिमसाध्यराग
गङ्गाप्रवाहरुचिभागिव रत्नसानु २

तदेते समुत्कण्ठिताः कथममु द्रक्ष्यन्ति (इति पुनर्निभाल्य) अहो साधु समाहितमद्वैतदेवेन यदनेनायमुच्चतरामुपकारिकामध्यरोपितो भगवान् तदधुना सर्वे सुख द्रक्ष्यन्ति स्वनाम च यथार्थमनयोपकारिकयाकारि

(पुरुषा सर्वे सोत्क ठं हरिं वद इति सभूय निगदन्ति)

(तत प्रविशति यथानिर्दिष्टोपकारिकातलोपविष्टो भगवानद्वैतादयश्च)

अद्वैत

केय लीला व्यरचि भवता योऽयमद्वैतभाजा
मत्य तेष्टस्तमधृत भवानाश्रम यत्तरीयम्

---

१ उपमालकारश्चात्र.

भगवान् (विहस्य)

भो अद्वैत स्मर किमु वय ह त नाद्वैतभाजो
भेदस्तस्मिंस्त्वयि च यदियान्रूपतो लिङ्गतश्च २१

अद्वैत वागीश्वरेण किमुचितं वचनानुवचनम्

भगवान् तत्ततोऽवधारय तु

विना सर्वत्यागं भवति भजन न सुपते
रिति त्यागोऽस्माभिः कृत इह किमद्वैतकथया
अय द डो भूया प्रबलतरसो मानसपशो
रितीवाहं द न्ग्रहणमविशेषादकरवम् २२

अद्वैत सर्वमिद प्रतारणमेव किंतु

सन्यासकृच्छम. शा तो निष्ठाशान्तिपरायणः

इत्यादि नाम्नां निरुक्त्यर्थमेवैतत्

दौवारिक (पुरत सवानवलोक्य) अहो आश्चर्यम्

एतावत्यपि दुर्गमे जनघटासघट्टनोच्चावचे
सर्वैरेव यथासुखं प्रभुरसौ पारेपरार्द्धैर्नृभि
अव्यग्रैरवकाशलम्भनसुखावस्थानसुस्थैर्यथा-
काम ल धतदीयपूर्णकरुण दृक्पातमुद्वीक्ष्यते २३

न हीदमसवादि यत.

उत्तीर्णोऽद्य भवाब्धिरद्य पिहित द्वार यमस्यापि च
प्राप्त मानुषजन्मलम्भनफल तप्त च सर्वं तपः
यद्देवः करुणाकटाक्षसरसोऽदर्शीति सर्वैरहो
प्रत्येक प्रथयद्भिरात्मसुभगीभाव समुद्ध यते २४

(नेप थे परित कोलाहल)

पुरुषा अहो अमी भगवज्ज मस्थलीनिवासिन. सर्वे समागच्छन्ति तदधुना महता समर्देन भवितव्यम् वयमित इदानीमपसराम (इति सर्वे नि क्र मन्ति)

(तत प्रविशन्ति सव नवद्वीपवासिन)

ते

अद्या ध्य गतमेव नो नयनयोरद्य प्रसन्ना दिश
शुष्काश्चाद्य जिजीविषात्रततयः प्रोन्मीलयन्त्यङ्कुरान्
नष्टेऽ त करणे च केनचिदहो चैतन्यमप्याहित
येनास्माकमहो बताद्य भविता चैतन्यच द्रोदय· २५

(इति सोत्क ठमुपसपन्ति)

अद्वैत (आलोक्य)

अग्रे निधाय भगवज्जनना समीयु
श्रीवासपण्डितमुखाः सुहृदस्त एते
अन्ये च बालतरुणस्थविराः किमन्य
द्देश स एष उदपादि स एष काल· २६

(भगवा सत्वरमवतारं नाटयति दौवारिका सादर प्रवेशयन्ति भगवान्मातरं प्रणमति)

माता- (सभयभक्तिवात्सल्यपरितोषशबलिताश्रुपुलकगद्गदम् सस्कृतेन)

वैर यमेव भव किं किमु वानुभूति
र्भक्तिर्नु वा किमु रस. परमस्तनूभृत्
तात स्तनंधयतयैव भव तमीक्षे
ल धोऽधुनापि न कदापि पुनस्त्यजामि २७

(इति सोत्क ठमालिङ्गति)

श्रीकृष्णचैतन्य

भगवति जगन्मातर्मात. पर फलमुत्तम
किमपि फलितु वात्सल्याख्या लता भवति क्षमा
भवति भवती विश्वस्यैवानुपाधिसुवत्सले
त्यथ भगवता नून चक्रे क्षमापि शरीरिणी २८

(इति पुन पठति)

(माता पुनरालिङ्ग्य प्रणमति अद्वैतस्तामुत्था य स्वयम त पुरे प्रवेशयन्नि क त भगवान्यथायथ सर्वानेवालिङ्गनस्पर्शनदशनप्रश्नादिभिरनुरञ्जयति)

१ २ ३ ९र्षसूचकमव्ययत्रयम्

(पुन सत्वर प्रविश्य)

अद्वैत कः कोऽत्र भो. सर्वानेवाबालवृद्धतरुणानाचा डालाश्च यथोपजोषमावासभक्ष्यपेयादिभिरुपचर तु भव त·

(प्रविश्यापटीक्षेपेण)

एक. अयमयमह तथा करोमि (इति नि क्र त)

अद्वैत (भगव तमुपसृत्य)

सोऽह एते स भवा स चैषा प्रेमा तवेय करुणापि सैव
सव तदेवास्ति सुखैकहेतुरन्यादृश रूपमतोषहेतु. २९

भगवान् अद्वैताद्वैत मैवम्

श्याम मृतस्रोतसि पातित वपुस्तस्यैव तुङ्गेन तरङ्गरहसा
या यां दशामेति शुभाशुभाथवा सा सैव मे प्रेम चराकरोति ३

तदेहि चिरदृष्टैरेभिः सहरसा उपविशाम

(इति निष्का ता सर्वे)

इत्यद्वैतपुरविलासो नाम पञ्चमोऽङ्क

षष्ठोऽङ्क

(तत प्रविशति रत्नाकर)

रत्नाकर अहो अद्य कथमकस्मात्प्रेयसी सुरसरिद्विमनस्केव दृष्टा तदस्या मनोदुःखकारण प्रष्टव्यमस्ति (इति पुरोऽवलोक्य) कथमिय तद वस्थैव दृश्यते देवा तदुपसृत्य पृच्छामि (इत्युपसर्पति)

(तत प्रविशति यथानिदिष्टा गङ्गा)

गङ्गा हद्दी हद्दी जस्स पाअसेअसलिलत्तेण मह एदारिस सोह गं तस्स पहुणो चिरआलं अङ्गसङ्गो लम्भिओ अदो वरो को मे भाअ धेओ तह त लम्भिअ पुणोविण लम्भणिज्जो विअ दीसइ अदो वर वा किं मे असुहम् ता किं करेमि म दभाइणी (क) (इति चिन्तयन्ता क्षण तिष्ठति)

(क) ह धिक् हा धिक् यस्य पादसेकसलिलत्वेन ममैतादृश सौभ यं तस्य प्रभोश्चिरकलमङ्गसङ्गो लब्धः अतोऽपर· को मे भ गधेय तथा त

१ समुद्र २ गङ्गा

र ाकर (उपसृत्य) भागीरथि कथ विमनायसे

गङ्गा अज्जउत्त अज्जउत्त किं पुच्छसि म दभाइणी क्खु अहम् (क)

रत्नाकर कथमिव

गङ्गा (सस्कृतेन)

यत्पादशौचजलमित्यलमस्मि विश्व
विख्यातकीर्तिरसकौ रसकौतुकाशः
नित्यावगाहकलया रसयाचकार
मामद्य स त्यजति हा बत तेन दूये १

रत्नाकर आ जानामि स खलु मथुरागमनत. प्रत्यावृत्य सप्रत्य द्वैतालये समागतोऽस्तीति श्रुतम् तत्कथ दूयसे

गङ्गा होइ एव णेदम् किंतु णअद्दीअदो आअदेसु सिरिवासपहु दिएसु बन्धुव गेसु अण्णस्सिं दिअहे सिरिसईदेईए पाइअं अ ण सव्वेहि अप्पवग्गेहिं सह सरसहासविलास भुञ्जिअ तेहिं ज्जेव सद्ध उपविसिअ भअवं किंपि गदिदु पउत्तो (ख)

रत्नाकर किं तत्

गङ्गा

भो अद्वैतप्रभृतय इद श्रूयता यज्जनन्या
यु माक च प्रणयिसुहृदामाज्ञया न प्रयातम्
विघ्नस्तेन व्यजनि मथुरा ग तुमाशे न तस्मा
दाज्ञा सर्वे ददतु कृपया ह त यायामिदानीम् २

रत्नाकर. ततस्तत.

लब्ध्वा पुनरपि न ल भनीय इव दृश्यते अत.पर वा कि मेऽशुभम् तस्मात्कि करोमि म दभागिनी

(क) आयपुत्र ायपुत्र किं पृच्छसि म दभ गिनी खल्वहम्

(ख) भवति एवमिदम् कि तु नवद्वीपत आगतेषु श्रीवासप्रभृतिकेषु ब धुव र्गेष्वन्यस्मिन्दिवसे श्रीशचीदेव्या पाचितमन्न सर्वैरात्मवगै: सह सरसहासविलास भुक्त्वा तैरेव सार्धमुपविश्य भगवान्किमपि गदितु प्रवृत्त

गङ्गा तदो अद्दईआचारिएण गदिदम् (क)

तव प्रीत्या याहीत्यभिलपति सर्वो यदि जन
स्तदा सर्वस्यैव त्वदुपगमनात्पूर्वमसवः
न धिक्कारान्सोढुं बत भवति नः पाटवमिति
प्रयास्य त्येवामी प्रथममनुभूय व्यसनिताम् ३

रत्नाकर भद्र भो अद्वैत भद्रम् ततस्ततः

गङ्गा तदो भअवदा स पणअ पुणोवि भणिदम् (ख) भो अद्वै तप्रभृतयः (६२) इति

गृहीतोऽय वेशो यदिह निजदेशस्य सविधे
तदा स्थातु सार्धं प्रणयिभिरिदानीमनुचितम्
बुधा यूय विज्ञा भवति जननी चास्य वपुष.
समाधां कुर्वं तु स्वयमहह किं वच्मि बहुलम्

रत्नाकर भगवतापि समीचीनमुक्तम् ततस्तत.

गङ्गा तदो सव्वेहिं भअवदो बन्धुजनेहिं आचारिओजणणीए सईदेईए णिअड गदुअ मन्तिदम् (ग)

रत्नाकर ततस्ततः

गङ्गा अस्सिं अत्थे जदो कस्सवि स मई ण होइ तदो जणणीए उत्तम् भो भो जइ धम्मदोसो होइ तदो अप्पणो सुहकए तस्स खलअ णकिदा किंवद ती कध करणिज्जा अप्पणो जह तह होउ तदो जअ णाहछेत्त ज्जेव जं गच्छदि त ज्जेव भद्दम् कदाचि पउत्तीवि लही अदित्ति आसा होइ (घ)

(क) ततोऽद्वैताचायण गदितम्

(ख) ततो भगवत सप्रणय पुनरपि भणितम्

(ग) ततः सर्वैर्भगवतो बन्धुजनैराचार्यजनन्या. शचीदेव्या निकट गत्य मन्त्रितम्

(घ) अस्मिन्नर्थे यदा कस्यापि समतिर्न भवति तदा जनन्या उक्तम् भो भोः यदि धर्मदोषो भवति तदात्मनः सुखकृते तस्य खलजनकृता किंव दती कथं

रत्नाकर साधु मातः साधु अतिक्रान्तास्ति वत्या देवद्भूति· ततस्तत·

गङ्गा दो सं ज्जेव विवसा हुविअ पुणोवि गदिदवन्तो ( ) मतः कथमिदमुक्तम् अत· परमस्माभिरिद श्रुतिप्रतिपादितमिव खण्डितु न शक्यते भवद्भच·

रत्नाकर ततस्तत

गङ्गा तदो तए गदिदम् अम्हाण जह तह होउ अस्स दोसं ज खलजणो पेक्खिस्सदि त क्खु दुस्सहम् जअ णाह जइ गच्छदि तदो मज्झे तुम्हे गन्तु स ध मए पउत्ती लहीअदि (ख)

र ततस्ततः

ग । दो सं भअवदो णिअड आअदुअ देईए कधिद णिअ दिद तो (ग)

रत्नाकर ततस्त

गङ्गा दो भअवं सहरिसअ गदिदवं (घ) यथाज्ञापयति विश्वज ननी तद ज्ञापयत गच्छामि

रत्नाकर ततस्तत·

गङ्गा तदो सं हिं गदिदम् (ङ) देव कियन्ति दिनानि स्थीयताम् पश्यामस्ते चरणकमलमिति

र ततस्तत

करणीया आत्मनो यथा तथा भवतु ततो जगन्नथक्षेत्रमेव यद्गच्छति तदेव भद्रम् कदाचित्प्रवृत्तिरपि लक्ष्यत इत्याशा भवति

(क)- द सर्वे एव विवशा भूत्वा पुनरपि गदितवन्तः

( ) तद तय गदितम् अस्माक यथा तथा भवतु अस्य दोष यत्खल जन प्रेक्षि यते त्खलु सहम् जग थ यदि गच्छति तद मयै यूय गन्तु शक्नुत य प्रवृत्तिर्लक्ष्यते

(ग) तद सर्वे भगव ो निकटमागत्य देव्या कथितं निगदितवन्त·

( ) ततो गव न्सहर्षं गदितव न्

( ) वैंगदितम्

#108
ग्रन्थालय, ... शि संस्थान
सारनाथ वाराणसी

गङ्गा तदो जणणीए ताण च पमोअत्थ ति णदिणाणि तत्थ ठा ऊण पू विअ भअवदीए जणणीए अच्चुदाण दजणणीए च पाइद अ ण से हिं सह भुञ्जिअ ताण अणुरञ्जिअ चउत्थे दिअहे गन्तु पउत्ते सवेहि मन्तिअ णित्ताण द जअदाण द दामोदर मुउ दाओ सङ्गे दि णाओ तदो गदेसु णअद्दीअवासिसु तेहिं सद्ध देवे पत्थिदे अद्दईआचारिएण बहुदर रोइदम् देवो तं अणामन्तिअ चलिदो ( )

रत्नाकर हन्त इदानीं गौडाधिपतेर्यवनभूपालस्य गजपतिना सह विरोधे गमनागमनमेव न वर्तते कथमय चतुभिरेव परिजनै· सह गच्छति

गङ्गा (सस्कृतमाश्रित्य) अ र्यपुत्र नैतदाश्चर्यम् पश्य पश्य

योऽ तर्यामी भवति जगता योऽ मव्याजबन्धु
र्यस्य द्वेष्यो न जगति जन. कोऽपि के त द्विषन्तु
द्वैरा[1]ज्येऽस्मि पटुविकटयोः सेनयोरेव मध्या
न्नि प्रत्यूह कलय चलितो बन्धुभि. प षै सः ५

अपि च

ग्रामे ग्रामे पटुकपटिनो घट्टपाला य एते
येऽरण्यानीचरगिरिचरा वै[2]टपाट राश्च
श ाकारः थि विचलता त विलोक्यैव साक्ष
दुद्यद्ध पा. स्खलितवपुष· क्षोणिपृष्ठे लुठन्ति ६

रत्नाकर भवति हि भगवा सहजासुरभावभावितान्तःकरण नेव नानन्दयति तदितर परमपामरानपि [क]क्पातेन पवित्रयति चित्रयति च भक्तिरसेन

(क) ततो जनन्या तेषा च प्रमोद र्थ त्रीणि दिवसानि तत्र स्थि व पूर्वमिव भ गवत्य जनन्या अ च्युत नन्दजनन्या च पाचितमन्न सर्वै सह भुक्त्व ानुरज्य चतुर्थे दिवसे गन्तु प्रवृत्ते सर्वैर्मन्त्रि वा नित्य नन्द जगदान द दामोदर मुकु दा सङ्गे दत्ताः ततो गतेषु नवद्वीपवासिषु तै. सार्धं देवे प्रस्थितेऽद्वैताचार्येण बहुतर रोदितम् देवस्तमनामन्त्र्य चलित·

---

१ उत्कलाधीश्वरेण २ गौडोत्क राज्यद्वयमध्ये ३ मार्गतस्करा

रत्नाकर ततस्ततः

गङ्गा तदो निरन्तरसंचरन्तगअवइमहासामन्तसन्तदि महादन्तावल तुङ्गतुरङ्गपत्तिसपत्ति दुग्गम राअपह उज्झिअ वणमाग्ग ज्जेव अअगा हिअ चलिदव तो (क)

रत्नाकर ततस्तत

गङ्गा (सस्कृतेन) तत·

आश्चर्यं प्रागहह गहन गाहमाने रघूणां
पत्यौ द्वीपिद्विरदमहिषा ग न्काश्च काया·
तत्कोदण्डप्रतिभयहता दुद्रुवुर्ये त एते
य माधुर्यद्रवलवलभ स्त धतामेव दध्रु·

ए· कियन्ति दिणाणि वणे वणे चल तो विविहतरुलदासोह गम णुगे हन्तो पुणोवि राअपह अङ्गीकि व (ख)

रत्नाकर कुत·

गङ्गा (संस्कृतेन)

रेमुणानगरम डलमूर्तिर्वेणुपाणिभगवत्प्रतिमूर्ति
प्राक्तनीति हुमानत आसीद्व दनार्थमथ राजपथस्थ· ८

र· प्राक्तनीति कोऽर्थः

गङ्गा अअ क्खु देओ चउब्भुअरूअदोवि दुअभुअरूओ गोवीणा ह ज्जेव भत्तेहिं भअणीअ त्ति भणन्ति केवि केवि भणन्ति पुराअणी चउब्भुअमुत्ती ज्जेव दीसइ स त्थले ज्जेव ण क्खु दुअभुअरूआ गोवा णाहमुत्ती पुराअणीत्ति (ग)

(क) ततो निर तरसचरद्गजपतिमहास म तसतति महाद तावलतुङ्गतुरङ्गपत्ति संपत्ति दुगम र जप मुज्झित्वा वनमार्गमेवावग ह्य चलितवान्

(ख) एव कियन्ति दिनानि वने वने चलन्विविध रुलतासौभाग्यमनुगृह्ण- पुनरपि राजपथमङ्गीकृतवान्

(ग) अय खलु देवश्चतुर्भुजरूपतोऽपि द्विभुजरूपो गोपीनाथमेव भक्तैर्भजनी यमिति भणन्ति केऽपि केऽपि भणन्ति पुर तनी चतुभुजमूर्तिरेव दृश्यते सर्व स्थल एव न ख द्विभुजरूपा गोपीनाथमूर्ति· पुर तनीति

रत्नाकर ते भ्रान्ता कादौ साक्षिगो ालादयोऽतिप्राचीना एव त

गङ्गा (सस्कृतेन)

दण्डवद्भुवि निपत्य ववन्दे ता स ापि तमपूजयदुच्चै
अ मूर्ध्नि पतताल्मकस्माच्छेखरेण शिरस स्खलितेन ९

रत्नाकर ततस्ततः

ग ा (सस्कृतेन) ततो भगवता सप्रेम किंचिदुपश्लोकितम् तथा हि

न्यञ्चत्कफोणिनमदसमुदञ्चदग्र
तिर्यक्प्रकोष्ठकियदावृतपीनवक्ष ·
आरज्यम न लयो रलीमुखस्य
शोभा विभावयति कामपि वामबाहु

किंच

आकुञ्चनाकुलकफोणितलादिवाधो
लब्धस्तुता मधुरिमामृतधारयैव
आप्लावयन्क्षितितलं मुरली खस्य
क्ष्मीं विलक्षयति दक्षिणबाहुरेष. ११

रत्नाकर ततस्तत

ग पुणोवि वणमग्ग लम्भिअ पुणोवि साच्छिगोपालदसणत्थ क अणामधेय राअधाणीं गओ ( )

रत्नाकर दर्शनीय एवायम् य. खलु प्रतिमाकार एव वस्तु तस्तु स्वय भगवान् यत

साक्षित्वेन वृतो द्विजेन स चलस्तस्यैव पश्चाच्छनै.
ाम कोमलपादपद्मयुगलेनारान्नदन्नूपुरम्
स्तेन निवृत्तक धरमहो माहे द्रदेशावधि
प्राप्यैव प्रतिमात्वमत्वरमनास्तत्रैव तस्थौ प्रभु १२

(क) पुनरपि वनमार्गं ल ध्वा पुनरपि स क्षिगोपालदर्शनार्थं कटकनामधेया राजध नीं गत

ततश्चिरेण गजपतिमहाराजेन पुरुषोत्तमदेवेनायमानीय स्वराजध न्या स्थापितः

ग ा एव नेदम् ( )

रत्नाकर ततस्तत·

गङ्गा तदो त आलोइअ अप्पणो हिअआदो णि मिअ पुरदो अवट्ठिद विअ म णमाणो पुणोवि तत्थ सअ पविस तो विअ मुहुत्त आसि (सस्कृतेन) अथ किंचिदुपश्लोकित च

शोणस्रि धाङ्गुलिदलकुल माद्यद भीररामा
वक्षोजानां घुसृणरचनाभङ्गरिङ्गत्परागम्
चि म ध्वीक नखमणिमहःपुञ्जकिञ्जल्कमाल
जङ्घानाल चरणकमल पातु न पूतनारेः १३

र ा र ततस्तत

गङ्गा तदो सव्वेहिं ए ज्जेव दिट्ठम् (ग)

रत्नाकर कीदृशमिव

गङ्ग (सस्कृतेन)

वेणुवादनपरोऽपि स वेणु स्वाधरात्क्षणमधो विनिधाय
तेन सार्धमिव वर्धितशुद्धश्रद्धमीहितकथोऽयमलोकि १४

कर ततस्तत

गङ्गा तदो त दिणं तत्थ ज्जेव ठाऊण अवरस्सिं दिणे सिरिपुण्डरी अणअणो द ब्बोत्ति गुरुईए उ ठाए घोणन्तहिअओ विअ तुरिअ पत्थिदो ( )

(क) एवमिदम्

(ख) ततस्तमालोक्यात्मनो हृदयतो निष्क्रम्य पुरतोऽ स्थितमिव मन्य न पुनरपि तत्र स्वय प्रविशन्निव मुहूर्तमा ित्

(ग) तत वैरेवमेव दृष्ट

(घ) ततस्तद्दिन तत्रैव स्थित्वा अपरस्मिन्दिवसे श्रीपु रीकनयनो द्रष्टव्य इति गुर्व्या उत्कण्ठया घूर्णितहृदय इव त्वरित प्रस्थितः

रत्नाकर ततस्ततः

गङ्गा तदो कमलपुरणाम गाम लम्भिअ किअणईसिणाणे भअवदो देवउल पेक्खिदु अ गदो गच्छन्तम्मि देवे णिअकरट्ठिअ देवस्स द ड णिच्चाण ददेएण किं एदेण अआ ङूवप्लवखण्डेण द डेणत्ति भञ्जिअ णई मज्झम्मि णिक्खित्तो (क)

र ाकर ततस्ततः

गङ्गा तदो मुउन्दो भअवदो जअ ण हस्स देवउलं पेक्खिअ भअ व तं गदिदव (ख) देव पश्य पश्य

उत्क्षिप्तः किमय भुवा दिनमणेराकर्षणाथ भुजः
पातालात्किमु सत्यलोकमयितु शेषः समभ्युत्थित'
किं वा नागफणामणी द्रमहसा राशिर्जिहाणो दिव
दिव्य देवकुल प्रभोरिदमिद भो देव विद्योतते १५

र ाकर देवि सर्वमधिगतम् कथमत्र विमनायते भवती मत्सौ भा ये सौभा यवती भवती पश्य पश्य

यदर्थ बद्धोऽह शिव शिव यदर्थ च मथित
स्तदीयस्तातोऽसाविति न गणित येन विभुना
अहो की भा य मम हि स हरिस्ता च दयितां
परित्यज्यैव स्तत्तटवटकुटुम्बी समभवत् १६

तदेहि निकट गत्वैव पश्याव

गङ्गा जहरुइद अ उत्तस्स (ग)

(इति नि ान्तौ)

वेश

( ) तत' कमलपुरनामान ग्रामं ल ५ कृतनदीस्नाने भगवतो देवकुल प्रेक्षि मग्रतो ाच्छति देवे निजकरस्थित देवस्य द नित्यानन्ददेवेन किमेतेन अका ण्ड ोपप्लवख न द नेति भङ्क्त्वा नदीमध्ये निक्षिप्त

( ) ततो मुकुन्दो भगवतो जगन्ना स्य देवकुल प्रेक्ष्य भगव त गदितव न्

(ग) यथ रुचितम र्यपुत्रस्य

(तत प्रविशति परमाविष्टो भगवान्परितश्च नित्यान दादय)

भगवान्

अभ्रलिहोऽपि जगता हृदय प्रविष्टः
स्थूलोऽपि लोचनयुगा तरमभ्युपेतः
सिद्ध' शिलाभिरपि यो रसवर्षशाली
प्रासाद एष पुरतः स्फुरतीश्वरस्य १७

(इति सोत्क ठ परिक्रामति)

सर्वे अहो मुहूर्तमात्रग योऽय प था दीर्घातिदीर्घ इव जायते भ गवत. किमत्र चि तयाम भगवतो नीलाचलच द्रस्य विलोकन परिचा रकाणामेव सुलभ नान्येषाम् विशेषतः पारदेशिकानामस्माक दुर्ल भमेव विना राजपुरुषसाहाय्येन सुलभ न भवति

न्द अस्त्युपायः

अ ये कस्तावदसौ

द अस्त्यत्र विशारदस्य जामाता सार्वभौमस्यावुत्तो भगवत परमासतमो गोपीनाथाचार्यः यः खलु भगवतो नवद्वीपविलासविशेषा भि ज्ञो यु मद्विध इव

अन्ये तेन किं स्यात्

न्द तेन सार्वभौमद्वारा सर्वमेव कारयितु शक्यते

सर्वे (हर्षं नाटयिला) साधूक्तम् तहि तन्निलयः प्रथमम वेष्टुमिष्ट

(इति रिक्रामन्ति)

(तत प्रविशति गोपीनाथाचाय)

गोपीनाथाचार्य (स्वगतम्)

दक्षिण स्फुरति मे विलोचन सुप्रसादविशद मनो मम
वेद्मि नोऽद्य जगदीशदर्शन कीदृश सुखमुदीरयि यति ८

(इति जगन्नाथदशन थ परिक्रामति)

---

१ भगिनीपतिरावुत्त इत्यमर

मुकुन्द अयमेष गोपीनाथाचार्य.

नित्यानन्द मुकु द शीघ्र गच्छ गच्छ य वदसौ सिंहद्वार न प्रविशति

(मुकु दस्तथा करोति)

गोपीन थाचार्य (अग्रतोऽव लोक्य) अये कोऽयम् अपि कश्चि द्गौडीयो भवि यति (निभाल्य) अये न वद्वीपः (पुनर्निभाल्य) अये भग वतो विश्वभरस्य प्रियसेवको मुकु द एव त . फलित शकुनेन (उपसृत्य) हंहो मुकुन्दोऽसि

न्द आचार्य व दे

गोपीनाथाचार्य अपि कुशल भगवतः

न्द २हैवागता प्रभुचरणा

गोपीनाथाचार्य (सान दम्) किं वदसि (इति पुनस्तमा लिङ्गति)

(मुकुन्दस्तमादाय त्वावतते)

गोपीनाथाचार्य (अग्रतोऽवलोक्य) कुन्द कोऽय यती द्र

(मुकु द र्वं कथयति)

गोपीना ाचार्य (साश्चयम्)

य' केवल प्रेमरसस्तदासीत्स एव वैरा यरसेन मिश्र

स्वादस्तथ प्येष दृशोस्तथैव चित्तस्य नोऽय मधुरा लरूपः १९

न्द (पसृत्य) भो देव श्रीजगन्ना देवेनैव भगव तमभ्याग मयितु प्रतिनिधिरिव प्रहितो गोपीनाथाचार्य

भगवान् (बहिर्वेर्ति नाटयन्) ौ सौ

गोपीनाथाचार्य अयमस्मि (इति चरणयो पतति)

(भगवानालिङ्गति)

(गोपीनाथाचार्यो नित्यान दं प्रणम्य जगद्दान ददामोदरौ प्रणमति)

न्द आचार्य कथमबाध यथाकाममेव भगवतो जगन्नाथस्य द्रशन सपद्यते

गोपीनाथाचार्य सार्वभौमस्य तथा सौभाग्योदयश्चेद्भवति

सर्वे तर्हि विज्ञाप्यता स्वयमेव देव

गोपीनाथाचार्य —स्वामिन् विना सार्वभौमसभाषण श्रीजगन्नाथ दर्शनं न सुलभमिति मन्यामहे भगवतो वा कादृगिच्छा

भगवान् भवदिच्छैव ममेच्छा

गोपीनाथाचार्य तर्हि फलित स र्वभौ मस्य सुकृतद्रुमेण देव तदित इतः पदानि धारयन्तु भगवन्त

भगवान् आदिश मार्गम्

गोपीनाथाचार्य इत इत

(इति स र्वे परिक्रामन्ति)

(तत प्रविशति अ यापय सशिष्य सार्व भौमभट्टाचार्य)

सार्वभौमभट्टाचार्य क· कोऽत्र भो जानीत श्रीजगन्नाथस्य म ध्याह्नधूप सवृत्तो न वेति

गोपीनाथाचार्य अयमय भट्टाचार्यस्याध्यापनोपरम सवृत्त स प्रत्यभ्य तर यास्यति तत्त्वरितमेवोपसर्पामि (इति विचार्य) भगवन् इहैव क्षण विश्रमितुमर्हति यावदहमागच्छामि (इति सत्वरमुपसृत्य) भट्टाचार्य कोऽपि महानुभाव सप्राप्तोऽस्ति तदभिगम्य सम नीयतामिति

सार्वभौमभट्टाचार्य कियद्दूरेऽसौ

गोपीनाथाचार्य अभ्यर्ण एव

(सावभौमभट्टाचार्य उत्थाय भिगच्छति शिष्याश्चानुगच्छन्ति)

नित्यानन्द अहो अयमय भट्टाचार्य स र्वभौम· यदय स्वय म गतस्तर्हि साधीय नेव भवति

सार्वभौमभट्टाचार्य (उपसृत्य) नमो नारायणाय (इति प्रणमति)

भग वान् कृष्णे रति कृ णे मति

सार्वभौमभट्टाचार्य (स्वगतम्) अहो अपूर्वमिदमाशसनम् त र्ह्ययं पूवाश्रमे वै णवो वा भविष्यति

(शिष्या य ते)

सार्वभौमभट्टाचार्य स्वामिन् इ (इति भगवन्तमादाय यथास्थान पवेश्य स्वयम युपविशति)

(सर्वे पवेश नाटयन्ति)

सार्वभौमभट्टाचार्य अ चार्य अय पूर्वाश्रमे गौडीयो वा

गोपीनाथाचार्य भट्टाचार्य पूर्वाश्रमे नवद्वीपवर्तिनो नी । बर चक्रवर्तिनो दै हित्रो जगन्नाथमिश्रपुरंदरस्य तनुजः

सार्वभौमभट्टाचार्य (स हादरम्) अहो नीलाम्बरचक्रवर्तिनो हि मत्तातसतीर्था मिश्रपुरदरश्च मत्तातपाद नामतिमान्य

गोपीनाथाचार्य श्रीजगन्नाथदर्शनसौलभ्यमेषामुद्देश्यमस्ति

सार्वभौमभट्टाचार्य सर्वथैव तद्भावि क. कोऽत्र भो· आहूयता च दनेश्वर·

(प्रविश्य सत्वरं च दनेश्वरो भगव त प्रण य पितरं णमति)

सार्वभौमभट्टाचार्य च दनेश्वर श्रीपादस्यानुपद गच्छ यथाय सुखेन प्रत्यह यथाकाम श्रीमुख पश्यति तथा सर्वैरेव विधेयम् यथा के न पि बाधा न क्रियते अय मदीयो मान्यतम इति

चन्दनेश्वर यथाज्ञ पयन्ति श्रीचरणा

सार्वभौमभट्टाचार्य स्व मिन् अत्र स्थीयताम्

(भगवान्निस्यान दादिमि सह च दनेश्वरमादाय निष्का त)

सार्वभौमभट्टाचार्य आचार्य स्थीयताम्

(गोपीनाथाचार्योऽधनि क्रान्त एव मुकुन्दं हस्तेनाकृ य प्रत्यावृत्योपविशति)

सार्वभौमभट्टाचार्य आचार्य अमुमालोक्य स्नेहशोकतारल्य जा तम् नीला बरचक्रवर्तिसबन्धादयमतीव स्नेहास्पद न· अल्पीयसि वयसि तुरीयाश्रमो गृहीत· कथमनेन कस्त वदस्य महावाक्योपदेष्टा

गोपीनाथाचार्य केशवभारती

सार्वभौमभट्टाचार्य हन्त कथमय भारतीसंप्रदाये प्र तिंतवा वा

गोपीनाथाचार्य नास्य तथा बाह्यापेक्षा केवल त्याग एवादर

सावभौमभट्टाचार्य किं तावद्ब्राह्मम्

गोपीनाथाचार्य सम्प्रदायोत्कर्षादि

सावभौमभट्टाचार्य समीचीन नोच्यते आश्रमौज्ज्वल्य न बा म्

गोपीनाथाचार्य केवल गौरवायेति बा मे त्

सावभौमभट्टाचार्य गौरवेण किमपराद्धम् त मयैवभण्यते भद्रतर सांप्रदायिकभिक्षो· पुनर्योगपट्ट ग्र हयित्वा वेदा तश्रवणेनाय सस्करणीय.

गोपीनाथाचार्य (सासूयामव) भट्टाचार्य न ज्ञायतेऽस्य महिमा भवद्भिः मया तु यद्यदृष्टमस्ति तेनानुमितमयमाश्वर एवेति

न्द (स्वगतम्) साधु भो अ चार्य साधु द ध मे जीवित निर्वापितमस्ति भवता

शिष्या केन प्रमाणेनेश्वरोऽयमिति ज्ञातं भवता

गोपीनाथाचार्य भगवदनुग्रहजन्यज्ञानविशेषेण लौकिकेन प्रमा णेन भगवत्तत्त्व लौकिकेन प्रमाणे प्रमातु न शक्यते अलौकिकत्वात्

शिष्या नाय शास्त्रार्थ अनुमानेन न कथमीश्वर स ध्यते

गोपीनाथाचार्य ईश्वरस्तेन स ध्यता नाम न खलु तत्तत्त्व साधयितु शक्यते तत्तु तदनुग्रहजन्यज्ञानेनैव तस्य प्रमाकरणत्वात्

शिष्या दृष्ट तस्य प्रमाकरणत्वम्

गोपीनाथाचार्य — पुराणवाक्य एव

शिष्या पठ्यताम्

गोपीनाथाचार्य

अथापि ते देव पदाम्बुजद्वयप्रसादलेशा गृहीत एव हि
जानाति तत्त्व भगव महिम्नो न चान्य एकोऽपि चिर विचिन्वन् २

विचि वन् इति श स्त्रादिवर्त्मसु

शिष्या तर्हि शास्त्रै क तदनुग्रहो न भवति

गोपीनाथाचार्य अथ किम् कथमन्यथा विचिन्वन्नि युक्तम्

शिष्या (विह) तत्कथमेतावन्ति दिनानि थैव भवत पठितम्।

गोपीनाथाचार्य शिल्पविशेष एव तत्

वैभौ भट्टाचार्य (विहस्य) भवति दनुग्रहोऽस्ति जात तत्तत्त्व तु भवता ायत एव किंचित्कथ्य ाम्

गोपीनाथाचार्य तत्कथाविषयो न भवति अनुभववेद्यमेव भवति चेदस्यानुग्रहस्त्वयि तदा भवतैवानुभा म्

शिष्या (गतम्) कथमयमसाध्वसमेवानेन सह व्यधिकरण किं चिज्जल्पति अथ वा आवुत्तोऽयमिति किंचित्परिहसताव

गोपीनाथाचार्य भट्टाच र्य भवता यदेनमीश्वरमुद्दिश्य किंचिद्व धिकरण क्तम् तेन सहि णुतया किंचि मयोक्तम् न तावदतिगभीरैर्भव द्भिरेवमभिलपितु युज्यते अ वा नैष वो दोषः

यच्छक्तयो वदता वादिना वै विवादसवादभुवो भवन्ति
कुर्वन्ति चैषा हुरात्ममोह तस्मै नमोऽन तगुणाय भूये १२

वैभौमभ चार्य (विहस्य) ज्ञातम् वैष्णवोऽसि

गोपीनाथ च र्य (सप्रश्रयम्) यद्यस्य कु स्य त्तदा त्वमपि भ वि यसि

वैभौमभट्टाचार्य अल पल्लवेन भव न्गच्छतु भगवद्दर्शन न तर मातृस्व राघासे तवेश्वर सगणो वास्यता मन्ना । भगवत्प्रसादेन निम यितव्यश्च

गोपीनाथ चार्य यथाज्ञापयसि

सार्वभौमभट्टाचार्य तदहमपि माध्यंदिनकर्मणे प्रय मि (इति शि ष्यो निष्क्रान्त)

गोपी । चार्य मुकु द एह्येहि (इति परि म्य) भो मुकुन्द भट्टाच र्यवा वज्रमद्यापि मे हृदय न्तति यदि परमकारुणिकेन भगवता तदुद्रियते दैव मे नो निर्वाति

मुकुन्द किमशक्य तस्य भगवत

गोपीनाथाचार्य —तदेहि श्रीजगन्नाथदर्शन थ प्रय त भगव तमनु सराव

(ति नि ामत)

(नेपथ्य)

अहो अद्भुतम्

तु भृङ्गयुवसगतफुल्लत्पुण्डरीकवरलोचनलक्ष्मि
हिङ्गुलस्खपितशुक्लचतुर्थीशीतदीधितिकलाधरबिम्बम् २२

अपि च

चारुकारुणिकमारुचिराङ्गं ह्यदारुमयमेतदुदेति
आहतोऽस्य रुचिक दलवृ दैरि द्रनालमणिदर्पणदर्पः २३

गोपीनाथाचार्य अये श्रीमुखदर्शनं जातमिव यदमी नित्यान दादयो मिथो निर्वर्णयन्ति

(पुनस्तत्रैव)

अन्योन्येक्षणरागरञ्जिततया द्वौ निर्निमेषेक्षणौ
राजेते जगतः पती उभयतो निस्प दसर्वाङ्गकौ
दारुब्रह्मणि लीयते किमु नरब्रह्मैतदाहो नर
ब्रह्म येव हि लीयते शिव शिव ब्रह्मैव वा दारवम् २४

गोपीनाथ चार्य भद्र भो भद्रम् एक एव भगवानास्वाद्या स्वादकभावेन द्विधाभूत इव

(पु स्तत्रैव)

द्वावेव पूर्णकरुणौ जगदुद्दिधीर्षू
द्वावेव लोचनपथ जगतो जिहानौ
अ त'स्थन दतनयोऽन्तरवर्तिदारु
भ्र ति केव मियानुभयोर्हि भेद' २५

गोपीनाथाचार्य साधु भो नित्यान ददेव साधु तत्त्वज्ञोऽसि भगवतो गौरच द्रस्य तन्मन्ये भगवद्दर्शनं कृत्वा प्रत्यावर्तन्त एव सर्वे तदाव मपि भगव त श्रीजगन्नाथ दृष्ट्वा त्वरितमेव पुनरेत वनुसराव

(इति निष्का तौ)

(तत विशति पुण्डरीकाक्षदशनानन्दनि स्य दो भगवान्नित्यानन्दादयश्च दनेश्वरश्च)

चन्दनेश्वर हहो महा तः सपन्न यथासुखमेव भवता भगवद्द र्शनम्

नित्यानन्दादय यथामनोरथमेव सुसंपन्नम्

चन्दनेश्वर (स्वगतम्) अहो कथमसौ विलम्बते गोपीनाथाचार्यः किमिदानीमह करोमि न किमपि निगदित तातचरणैः मन्ये तस्मै एव सव कथितमस्ति तत्कथमयमद्यापि नायात. (इति परितो वलोकयति)

(तत प्रविशति त्वरा नाट्य मुकु देन सहाचार्य)

गोपीनाथाचार्य एहि मुकुन्द एतेऽमी गच्छन्ति तदुभयमेव सवृत्तम् नीलाचलच द्रोऽपि दृष्टः हेमाचलगौरोऽपि दृश्यते (इति स त्वरमुपसृत्य) च दनेश्वर त्वमितो गृह गच्छ अत· पर मयैव सव समाधास्यते

चन्दनेश्वर यथाह भवान् (इति भगवन्त प्रणम्य नि क्रा त)

(गोपीनाथाचार्य उपसृत्य देव प्रणमति)

दामोदर भगवन् अयमाचार्य प्रणमति

भगवान् (बहिर्द्वार्त्तिं नाटयित्वा) एह्येहि (इति तमालिङ्गति)

गोपीनाथ चार्य देव भट्टाचार्येण सानुचर एव निमन्त्रितोऽसि तदित एवागच्छ तु (इति पूर्वोद्दिष्टावास प्रापय्य भगवत पादधावनादिकं द त धावनावसान सकलमेव परिचरणं कृत्वा भिक्षोत्तर सुखनिविष्टे सति तस्मिन्सवैमनस्यम्) देव भट्टाचार्येणान्यदपि निमन्त्रितमस्ति

भगवान् किं तत्

गोपीनाथाचार्य साम्प्रदायिकसन्यासिनः सकाशाद्योगपट्ट ाह यित्वा वेदा त श्रावयिष्यति

भगवान् अनुगृहीतोऽस्मि तेन भवतु एव करि य मि

न्द देव आचार्येण तदवधि तेन वाक्स्फुलिङ्गनिकरेण द द ह्यमानहृदयेन स्थीयते महाप्रसादोऽपि नाद्य स्वीकृतोऽस्ति

भगवान् आचार्य बालकोऽसि यदय मा प्रति स्निह्यति तेनैवेद मवादीत् कथमत्र दूयसे

जगन्नाथ . २ चैतन्यदेव

गोपीनाथाचार्य भगवन् श्रीचरणैरिद मे शल्यं हृदयादुद्धियते चेत्तदा जावित धारयिष्ये (इति रोदिति)

भगवान् पु न्नराकाक्षस्ते मनोरथं पूरयि यति दामोदर भवताय निमन्त्र्यताम्

दामोदर यथाज्ञापयसि (इति तमादाय निष्कामति)

भगवान् जगदान द भगवत पुण्डराकाक्षस्य रजनाशेषशयनो त्थापनलीला यथा दृश्यते तथा यतनीयम्

(प्रविश्याचार्येण सह)

दामोदर भगवन् यथाज्ञम् महाप्रसादेन भोजितोऽयमत्रैव शि शयिषुरस्ति

भगवान् साधु साधु

(इति सर्वे प्रियसंकथया मुहूता गमयन्ति)

(नेपथ्ये पाणशङ्खध्वनि)

सर्वे (चमत्कारम्) अहो यामशेषेव त्रियामा यदयम्

पूर्देव्या· शयनोत्थिताविव चलत्सर्वाङ्गभूषा ण
किं वा देवकुलस्य वारणपतेरुद्बृहित बृहितम्
आयातेति कृपानिधे किमु कृपादेव्या जगत्प्राणिना
मा नध्वनिरभ्युपैति मधुर श्रीपाणिशङ्खध्व निः २६

भगवान् तदहो अवितथमेव गतेय रजनी आचर्य एहि सहैव पु राकाक्षस्य शयनोत्थानावकाश पश्याम

गोपीनाथाचार्य यथाज्ञापयसि (इति तत्समयोचितं कर्म क निष्का त)

(विश्य सत्वर)

कश्चित् क कोऽत्र भो गोपीन थाचार्य. क वर्तते वृत्त तज्ञा नासि (आकाशे क्ष्य ङ्खा) किं ब्रवीषि आचार्य श्रीकृ णचैतन्यदेवस्य नि टे इति भवतु तत्रैव यामि (इति कतिचित्पदानि गत्वा पुरो वलोक्य) अहो अयमेष अ चार्यो भवि यति (इत्युपसपति)

(तत प्रविशत्याचार्य)

गोपीनाथाचार्य अहो जातप्रायोऽय समय शयनो थ नस्य त दह त्वरयामि भगवन्तम्

रुष (उ सृत्य) आचार्य भट्टाचार्य विज्ञापयति श्रीकृष्णचैतन्य देवो यथा भगवतो जगन्नाथदेवस्य शय्योत्थान पश्यति तथा त्वयै सज्ञे कृत्वा यतनीयम्

गोपीनाथाचार्य —यथाज्ञ करवाणि (इति श्रीकृष्णचैतन्यदेव स्मरयि तुमुप पति)

(तत प्रविशति सानुचरो देव)

देव मुकु द विलोक्यता को विलम्ब आचार्यस्य

गोपीनाथाचार्य एषोऽह भगव त प्रतीक्षमाणो वर्ते

भगवान् तदग्रे गम्यताम्

गोपीनाथाचार्य (तथा कृत्वा) भगवन् इत इत (इति वेश नाटयित्वा जगन्मोहनमासाद्य) देव पश्य

तत्कालीनकवाटवाटनिबि ोद्घाटे विनि मिता
गर्भागारगरिष्ठसौरभभरेणामोदमभ्युद्वमन्
निद्राभ भृतालसो मुखमिव व्यादाय शेषेऽनिशो
ज भार भमिवातनोति स इय प्रासाद एष प्रभो २

अपि च देव अ र्यमाश्चर्यम्

दीपाभावघनान्धक रगहने गम्भीरगम्भीरिका
कुक्षौ ल्पत उत्थितस्य जयतो लक्ष्मीपतेर्लोचने
ालि दीसलिलोदरे विजयिनी वातेन घूर्णायिते
प्रोन्मत्तभ्रमरावलीढजठरे सत्पुण्डरीके इव २८

(भगवान्गरुडस्त बस्य पश्चादवस्थाय स पूर्वं पश्यति)

न्द आचार्य पश्य पश्य

क्षणा दीपावलयः समन्त द्गम्भीरिकाया कुहरे ज्वलन्त्य
विलोचनोत्सारिभिरत्नपूरैर्न्यग्भूतभासो लिखिता इवासन् २९

गोपीनाथाचार्य पश्य पश्य

अनुवदनप्रक्षालनमभ्यङ्गस्नानभूषणाद्यमथ
अनुबालभोगलीला हरिवल्लभभोग एष तत्पश्चात् ३

न्श्य ।मधुना प्रातर्धूपाख्यः पूजाविशेषः

(भगवानानन्दस्तिमित एव सपु कास्व पश्यत्येव)

गोपीनाथाचार्य भो भो जगदानन्दादय. पश्यत पश्यत प्रात र्धूपस्य प्रसादान्न कियदञ्जलौ कृत्वा कश्चि माला च करयोः त्वा क श्चिद्युगपदेव सम गच्छत. किमेतौ महाप्रभवे श्रीकृष्णचैतन्याय दास्यत केन वा प्रेरितावेतौ अथ । श्रीजगन्नाथेनैव

(प्रवि.य पार्षदौ श्रीकृ णचैतन्यमुपसपत भगवानुपसृत्य मूर्धानमवनमयति एको मा । प्रयच्छति भगवा बहिर्वासो ञ्चलं प्रसारयति अपर सादान्नं प्रयच्छति भगवानञ्चले कृत्वा श्रीजगन्नाथ प्रणम्यैव सिंहवत्त्वरितगति निष्क न्त)

सर्वे अहो किमिदम् कथमकस्मादेव देवो नि क्र त. तदाग च्छत ।य गच्छति विलोकयाम (इति पुरान्नि क्रम्य कतिचि पदानि गत्वा रतो विलोक्य) अहो भगवान्स्वावासवर्त्म त्यक्तव न्

गोपीनाथाचार्य (निभाल्य) अये दामोदरादय. सार्वभौमालय प्र ति देव प्रस्थितवान् तत्फलित भट्टाचार्यस्य सुकृतद्रुमेण तद्दामोदर जगदानन्दौ भगवत्सङ्गे प्रयात मुकु देन सार्धमहमासन्नस्थल एव तिष्ठामि

उभौ यथ रुचित भवते (इति निष्क्रान्तौ)

गोपीनाथाचार्य एहि मुकु द सावभौमस्य द्वितीयकक्षाया ति व (इति तथा कृत्वा पुरो वलोक्य) अये एतौ सार्वभौमभृत्यौ सविसय मित एवोपसर्पत तदपवार्य तिष्ठाव

(इति द्वारोपान्ते तिष्ठत)

(तत प्रविशतो भृत्यौ)

एक अले एसे स ण सी कपि मोहणमन्त जाणादि जदो भ ट्टाचालिए इमिणा गहग्गत्थे विअ किदे (क)

(क) अरे एष सन्यासी किमपि मोहनम जानाति यतो भट्ट च र्योऽनेन ग्रहग्रस्त इव कृत

अन्य अले कीलिसे किदे (क)

प्रथम अले ण आण सि सेज्जाए अणुत्थिदे ज्जेव भट्टाचालिए एसे अ अम्ह दो सअणघरदुआले गदे तदो बडुएण कहिअम् भट्टाचालिअ भट्टाचालिअ उत्थेहि उत्थेहि से स णासी आअदो त्ति तदो धसमसिअ भट्टाचालिए उत्थिअ इमस्स चलणे पडिए तदो इमिणा जह णाहस्स पसाअभत्त हत्थे कदुअ भुङ्क्ष्व त्ति गदिदव तो तदो अ म्हाणं ईसले उम्मत्ते विअ अकिअविचाले तक्खणमेत्तेण तं भत्त गिलि अव ते अकिदसिण णे ज्जेव अकिअमुहपक्खालणे ज्जेव गिलिऊण उम्मत्ते विअ कण्टइदसअलङ्गे णअणजलत्थिमिदवसणे घ घलक ठसद्दे अव म्हाललोअविवसे विअ भविअ महीदले लु ठदि किं हुविस्सदि ण आ णेम्ह (ख)

गोपीनाथाचार्य (आकर्ण्य) मुकुन्द श्रुतम्

मुकुद तवानुतापेनैव देवेनेदमध्यवसितम्

भृत्यौ आअच्छ अम्हे गोपीणाहाचालिअ मग्गेम (ग) (इति नि ष्क्रा तौ)

गोपीनाथाचार्य भद्र भो भद्रम् यदाभ्यामह न द . तदित स्थित्वा दामोदरजगदानन्दौ प्रतिपालयाव

(इति तथा कुरुत)

(क) अरे कीदृश. कृतः

( ) अरे न ज न सि श यातोऽनुत्थिते एव भ ाचाय सति एषोऽकस्माच्छय नगृहद्वारे गत' ततो बटुकेन कथितम् भट्ट चाय भट्टाचार्य उत्तिष्ठ उत्तिष्ठ स सन्यासी आगत' इति ततो धसूमसिति श द कृत्वा भट्ट चाय उत्थाय अस्य चरणे पतितः ततोऽनेन जगन्नाथस्य प्रस दभक्त हस्ते कृत्वा भुङ्क्ष्व इति गदित वान् तदा अ ाकमीश उ मत्त इव अ तविच रस्तत्क्षणम त्रेण तद्भक्त गिलित-व न् अकृतस्नान एव अकृतमुखप्रक्षालन एव गिलित्व उन्मत्त इव क टकित-सर्वाङ्गो नयनजलस्तिमितवसनो घघरकण्ठश दोऽपस्मारारोगविवश इव भूत्वा महीतले लुठति किं भवि यति न जानीम'

(ग) अ गच्छ आवां गोपीनाथ चार्य मार्गयाव

(तत प्रविशति विस्मयं नाटयन्दामोदर)

दामोदर

विना वारीं बद्धो वनमदकरी द्रो भगवता
विना सेक स्वेषां शमित इव हृत्तापदहन
यदृच्छायोगेन व्यरचि यदिद पण्डितपते
कठोर वज्रादप्यमृतमिव चेतोऽस्य सरसम् ३

गोपीनाथाचार्य (उपसृत्य) दामोदर किं तत्

दामोदर अस्ति रहस्यम् कथयि याम किंतु मया भवदर्थ मित आगतम् द्वारा तरेण नि क्र य ल धावास भगवन्तमनुसराम

(इति त्रय कतिचित्पदानि परिक्रामन्ति)

(दामोदर 'विना वारीम् (६ ३१) इत्यादि पठित्वा सर्वमेव कथयति)

गोपीनाथाचार्य श्रुतमेव सर्वं मिथः कथयतोस्तद्भृत्ययोः प्रमुखतः

दामोदर तवैव प्रसादादिद तस्य सौभ यम् तदेहि शीघ्रम् भगवत्समीपमनुसराम यदय भट्टाचार्योऽपि कृताह्निकस्तत्रागतप्राय एव इदानीमस्याशयो ग य. तदिदानीं वाक्प्रयोग एव नामूत्

(इति परिक्रामति)

(तत प्रविशति तासनपरिग्रहो भगवान्निल्य नन्दो जगदानन्दश्च)

भगवान् जगदानन्द ासौ गोपीनाथाचार्य

जगदानन्द अयमय दामोदरमुकुन्दाभ्या त्वरमाण आचार्यः

गोपीनाथाचार्य (उपसृत्य) जयति जयति परमकारुणिक·

जगदानन्द अहो कथमयमश्रुतपूर्वस्ते व्याहारविलास

गोपीनाथाचार्य स खलु भवतामेव वेद्यः (इत्युपसृत्य प्रणमति)

(नेपथ्ये)

स्वामिन् नाय प था श्रीजगन्नाथालयोपसर्पणाय

भगवान् (आकर्ण्य) ज्ञायतामाचार्य किमेतत्

गोपीनाथाचार्य (नेप यामिमुखमवलोक्य) ज्ञात ज्ञातम् अयमय भट्टाचार्य· श्रीजगन्नाथमदृष्ट्वैव भगवच्चरणोपसर्पणार्थमागच्छति

---

१ निदर्शनालंकार

दामोदर पुरैव ज्ञातमस्ति

(इति सर्वे तन्मुखमीक्षमाणास्तिष्ठन्ति)

(तत प्रविशति विस्मयोत्फुल्लमना सावभौम)

सार्वभौम (स्वगतम्) अहो अवितथमेवाह गोपीनाथाचार्यः अस्माकमपि चेतो यदीदृशमजनि तदयमाश्चर्य एव (इति सोत्कण्ठ परिभ्रम्य) अहो इदमस्य मातृष्वसु पुरम् तद्यावत्प्रविशामि (इति प्रवेशं नाटयति)

(आचार्य उत्थायाभिगच्छति)

सार्वभौम (अवलोक्य) अये आचार्य किं कुर्वन्ति स्वामिनः

आचार्य इतइत आगच्छन्तु भवन्तः

सार्वभौम (उपसृत्य भगवन्तं दण्डवत् प्रणम्याञ्जलिं बद्ध्वा)

नानालीलारस शतया कुर्वतो लोकलीलां
साक्षात्कारेऽपि च भगवतो नैव तत्तत्त्वबोधः
ज्ञातुं शक्नोत्यहह न पुमान् दर्शनात्स्पर्शरत्न
यावत्स्पर्शाज्जनयतितरां लोहमत्र न हेम ३२

अपि च

जनहृदयसद्मा नाथ पद्माधिनाथो
भुवि चरसि यतान्द्रच्छद्मना पद्मनाभ
कथमिह पशुकल्पास्त्वामनल्पानुभाव
प्रकटमनुभवामो हन्त वामो विधिर्नः ३३

भगवान् (कर्णौ पिधाय) भट्टाचार्य भवद्भ्रात्सल्यपात्रमेवास्मि तत्किमिदमुच्यते (स्वगतम्) अहो इदानीमस्याशय परीक्षणीय (प्रकाशम्) हो महाशय निरुच्यतां कस्तावच्छास्त्रार्थः

भट्टाचार्य (अञ्जलिं बद्ध्वा) भगवन्

शास्त्र नानामतमपि तथा कल्पितं स्वस्वरुच्या
नो चेत्तेषा कथमिव मिथ खण्डने पण्डितत्वम्

दृष्टान्तालङ्कार २ काव्यलिङ्गम् अलङ्कार

तत्रोद्देश्य किमपि रम भक्तियोगो मुरारे
र्नि कामो य स हि भगवतोऽनुग्रहेणैव लभ्य ३

अपि च

वेदा पुराणानि च भारत च तन्त्राणि मन्त्रा अपि सर्व एव
ब्रह्मैव वस्तु प्रतिपादयन्ति तत्त्वेऽस्य विभ्राम्यति सर्व एव ३५

यत

यस्मिन्बृहत्त्वादथ हणत्वा मुख्यार्थवत्त्वे सविशे तायाम्
ये निर्विशेषत्वमुदीरयन्ति ते नैव तत्स धयितु समर्था ३६

था हि हयशीर्षपञ्चरात्रम्

या या ुतिर्जल्पति निर्विशे सा स मिधत्ते सविशेषमेव
विच रयोगे सति हन्त तासा प्रायो बलीय सविशेषमेव ३

तथा हि आन द द्धयेव खल्विमानि भूतानि जायन्ते आनन्देनैव ज तानि जीवन्ति आनन्दं प्रयन भिसविशन्ति इत्यादिकय ुत्या अपादान रणकर्मादिकारकत्वेन विशेषवत्त्वापत्ते एव यतो व मानि भूतानि ज यन्ते इत्यादिकया ऐक्षत इत्य दौ सोऽकामयत इत्यादौ च ईक्षण पर्यालोचनम् काम स ल्प इत्याभ्यामपि विशेषवत्त्वान्न ताव न्निर्विशेषत्वमुपपन्न भवति आयाते च विशेषे रूपस्य पि विशेषादाया तत्वम् न तु तद्रूप प्राकृत ज्योतिश्चरणाभिधानादिति ज्योति गोऽप्रा कृतत्व यथा साध्यते तथा तस्य रूपस्यापीति केवलनिर्विशेषत्वे शून्य वादावसर प्रसज्येत तेन ब्र ब्दो मुख्य एव मुख त्वेन भगवा ब्र वशिष्टम् त ा च ेति परमात्मेति भगवानिति शब्यते स्वपक्ष रक्षणग्रहग्रहिलास्तु मुख्यार्थाभावाभावेऽपि लक्षणया निरूपयि मशक्य मपि निर्विशेषत्व ये प्रतिपादयन्ति तेष दुराग्रहमात्रम् वस्तुतस्तु

आनन्दो द्विविध प्रोक्तो मूर्तमूर्तप्रभेदत
अमूर्तस्याश्रयो मूर्तो मूर्तनन्दोऽच्युतो मत ३८
अमूर्त परमात्मा च ज्ञानरूपश्च निर्गुण
स्वस्वरूपश्च कूटस्थो चेति सता मतम् ३९

अमूर्तमूर्तयोर्भेदो नास्ति तत्त्वविचारतः
भेदस्तु कल्पितो वेदैर्मणितत्तेजसोरिव ४

इति हयशीर्षपञ्चरात्रम् तथा कपिलपञ्चरात्रेऽपि अगस्त्य प्रति कपि लव क्यम्

द्वे ब्र णी तु विज्ञेये मूर्तं चामूर्तमेव च
मूर्तामूर्तस्वभावोऽय ध्येयो नार यणो विभुः ४१

इति पाञ्चरात्रिकमतमेव निर्मत्सरम् केवलनिर्विशेषब्रह्मव दिनस्तु अ मूर्तानन्दमेव ब्रह्म इति निरूपय त' स्ववासनापारुष्यमेव प्रकटयन्ति न तु ते निर्विशेषत्व स्थापयितु शक्नुवन्ति । रात्रिकमतस्वीकारे तु अ न द ब्र णो रूपम् एकमेवाद्वितीय ब्र इत्यादि च सिध्यति रूपत्वेन मूर्तत्वम् मणितत्तेजसोरिव इत्युक्तेनाद्वितीयत्वम् तेन भगवाने ब्रह्मेति सर्वशास्त्रमतम् व सन वैशिष्ट्यादेव मूर्तानन्दे भगवति लीलावि ग्रहमिति म वाना अमूर्तान दमेव ब्रह्मेति केचिदाहुः पाञ्चरात्रिकास्त्वदि गीतशिष्टा भगवदुपासकत्वात् तेन तदाचरितेनैव वेदार्था अनुमीय ते तथा च

शाखाः सहस्र निगमद्रुमस्य प्रत्यक्षसिद्धो न समग्र एष'
पुराणवाक्यैरविगीतशि चारैश्च तस्यावयवोऽनुमेयः २

तत्र पुराणवचनानि यथा

यन्मित्रं परमान दं पूर्णं ब्र सनातनम्

इत्य दि पूर्णं रूपत्वेन निर्विशेष तु ब्रह्म अपूर्णम् नीरूपमित्यर्थ' शि ास्तु सात्वताः तेषा मतम् वासुदेवपरा देवता वासुदेवपरात्परमा मन सकर्षणो जीव' इत्यादि जीवयति जीव करोतीति जीवः न तु स्वय जीव स चात्मा ब्दब्र परब्रह्म ममोभे शाश्वती तनू' इति त दुक्ते तस्मादेव जीवसृष्टिरित्यर्थ अतो मूर्तानन्द एव कृष्ण इति शास्त्रार्थ

भगवान् साधु साधु तदिदानीं पु डरीकाक्षदर्शनाय साधय

भट्टाचार्य यथाज्ञापयति देव (इति दामोदर जगदान दौ गृहीत्वा नि क्रा त)

मुकुन्द कथमयमेतौ गृहीत्वा गतः

गोपीनाथ चार्य अस्ति निगूढम् किंतु देव स एवाय भ ट्टाचार्यः

भगवान् महाभागवतस्य भवतः सङ्गादन्यथैव जात

गोपीनाथाचार्य (विहस्य) एवमेव

(तत प्रविशतोऽपटीक्षेपेण दामोदर जगदान दौ)

दामोदरजगदानन्दौ देव भट्टाचार्येण पद्यद्वय भैक्ष्यमन्न च भगव गन्नाथभुक्तावशिष्ट प्रहितमस्ति

भगवान् अनुगृहीतोऽस्मि

मुकुन्द पद्यद्वय पश्यामि (इति तत्करात्पत्रिकामादाय स्वगत वाचयति)

वैरा यविद्यानिजभक्तियोगशिक्षार्थमेक पुरुष पुराण
श्रीकृष्णचैतन्यशरीरधारी कृपाम्बुधिर्यस्तमह प्रपद्ये ४३

कालान्नष्ट भक्तियोग निज य·*प्रादु कर्तुं कृष्णचैतन्यनामा
आविर्भूतस्तस्य पादारविन्दे गाढ गाढ लीयता चित्तभृङ्ग· ४४

(इति व चयित्वा भित्तौ विलिख्य देवहस्ते ददाति)

(भगव न लोक्य विदारयति)

गोपीनाथाचार्य देव मध्याह्नो जात तदुत्तरकरणीयाय सज्जी भव तु श्रीचरणा

सर्वे एवमेव (इति नि क्रा ता)

इति सार्वभौमानुग्रहो नाम ष ग्रे क

सप्तमो ङ्क

(तत प्रविशात सावभौम)

सार्वभौम अहो कथमद्यासमय एव गजपतिना समाहूतोऽस्मि तदुचितमुपस र्पितुम् (त्युत्सपति)

(तत विशति राजा अमितश्च परीवार)

राजा कः कोऽत्र भो समाहूयता भट्टाचार्य

(उपसृत्य)

भट्टाचार्य एषोऽहमना नेनैवागत

राजा (प्रणम्य) इदमासनम् आस्यताम्

(भ चार्य आशिषं युज्यासनमध्यास्ते)

राजा भट्टाचार्य श्रुत मया कोऽपि महाप्रभाव. परमकारुणिको यतीन्द्र सप्रति गौडादागतोऽस्ति

भट्टाचार्य अथ किम्

राजा कथ मया तस्य चरणव दन क्रियते

भट्टाचार्य ₹द त्वतिदुर्घटम् विरलप्रचाराणा तेषा नि किचने नैव दर्शन लभ्यते तत्रापि दिनकतिपयान्यद्य दक्षिणस्या दिशि च लिता सन्ति

राजा किमिति जगन्न थमहाप्रभो समीप विहाय चलि व त

भट्टाचार्य तीथाकुवन्ति तीर्थानि न्तश्चेन गदाभृता इति सामान्यानामेव महतामय निसर्ग अय तु भगवानेव स्वयम्

राजा (सविस्मयम्) भट्टाचार्य भवन्तश्चेदिद ब्रुवन्ति तत्सत्यमेवै तत् तदा किमिति यत्नपुरःसर भवतात्र नारक्षि

भट्टाचार्य महाराज

ादयो लोकपाला यद्भ्रूभङ्गतरङ्गिणः
विना स्वकरुणादेवीं पारत य न सोऽर्हति १

तथ पि

ति न विहित स्तोत्रं काकु. कताह न कल्पिता
ति न रचित प्राणत्यागादिकं भयदर्शनम्
कति न रुदित धृत्वा पादौ तथापि स जग्मिवा
प्रकृतिमहता तुल्यौ स्यातामनुग्रहनिग्रहौ २

र (सोत्क ण्ठम्) पुनरत्रागमिष्यन्ति

भट्टाचार्य अथ किम् सङ्गिनस्त्वत्र वर्त ते

राजा कथमेकाकी चलित·

भट्टाचार्य तादृश कथमेकाकी तथापि मया समीचीना विप्रा· सङ्गे नियुक्ता सन्ति

राजा कियद्दूर तावत्

भट्टाचार्य गोदावरीं यावत्ते य स्यन्ति भगव स्तु सेतुब धप र्य त गमिष्यतीत्यनुमीयते

राजा ब्राह्मणास्तावद्दूर किमु न प्रेषिता·

भट्टाचार्य तस्याननुमते गोदावरापर्य त तु रामान दानुरोधा त्तेषां सङ्गोऽङ्गीकृतः

राजा कस्तावत्तस्यानुरोध

भट्टाचार्य गन्तव्यमिति निश्चये कृते मयोक्त गोदावरातीरे रामा न·दो वर्तते सोऽवश्यमेवानुग्राह्यः

राजा कथं तस्येद सौभा यम्

भट्टाचार्य महाराज स खलु सहजवैष्णवो भवति पूर्वमयम स्माकमुपहासपात्रमासीत् सप्रति भगवदनुग्रहे जाते त महिमज्ञत नो जाता

राज श्रतोऽस्ति मया त्वयि यादृशस्तस्यानुग्रहो जात·

भट्टाचार्य भगवत्प्रभावो हि खत प्रकाशी

(प्रविश्य)

दौवारिक भ चार्य भवत्प्रेषिता विप्रा गोदावरीतो निवर्तिता भवन्तं प्रतीक्ष ते

भट्टाचार्य उत्क ठते राजा प्रवेश्य तामिहैव

दौवारिक यथाज्ञापयसि (इत पुनस्तानादाय प्रविशति)

भट्टाचार्य अहो अ गच्छतागच्छत

(विप्रा उपसृत्य रा ानमाशीभिरभ्यच्य सावभौम प्रणमन्ति)

राजा—उपविश्यामूल कथयत

(सवे उपविशन्ति)

भट्टाचार्य एकतम एव कथयतु

एक इतस्तावदालाननाथदे मवलोक्य स्तुत्वा महामत्त रीन्द्रवद नङ्कुशकुशलगतिकुशलस्त्वरया रयातिशयैरप्यस्माभिरनुग तु दु.शकः शक लमिव सुमेरोरौदीच्येन प्रबलतरमरुता विभज्य चलित निरवधि भगव न्नामसकीर्तनविकस्वरस्वरपरभागाधराकृतधाराधरघोरणिधीरध्वनिरध्वनि ब-तैकमनोऽभिवाक्ष्यमाणो जनैर्लघीयसा कालेनैव कूर्मक्षेत्रमुत्तीर्णवान्

वभौम एतदभ्य तरे भिक्षा नाभूत्

वि नाभूदेव

भट्टाचार्य भवद्भि· किंकृतम्

विप्र अस्माभिस्तु यथालाभ किंचिदशित्वा दृश्यमान एवायमनु गम्यते ततस्तत्रैव कूर्मक्षेत्रे कूर्मदेवं प्रणम्य स्तुत्वा कूर्मनाम्नो द्विजवरस्य गृहमुत्तीर्णवान् समन तर तेनैव निमन्त्रितः कृतभिक्षश्च यदन्यत्कृतवान् तदप्यद्भुतम्

भट्ट चार्य किं तत्

विप्र तत्रैव कश्चिद्वासुदेवनामा विप्रो गलत्कुष्ठ कु कृमिनिकरक रम्बितबहुलरुधिरवसापूयक्लिन्नसर्वाङ्ग कदाचित्पनीपत्यमाना कृमीनुत्थाप्य तत्रैव निवेशयन्ननुद्विग्नो भगवन्मग्नमना इव केनाप्यकथितोऽपि स्वयमेव भगवताप्रापि अन तरमविलम्बेनैव चिरक लल धपरमसुहृदिव गाढतर मायताभ्या भुजाभ्यामय थाविध एव पर्यरम्भि समनन्तर तेन वि हेण

हि दरिद्र· पापीया कृष्णः श्रीनिकेतन.
ह्यबन्धुरिति स्माह बाहुभ्या परिरम्भित ३

इति पठन्नेव सद्योऽतिद्योतिप्रकृतसुन्दराङ्ग समजनि तदनु पुनस्तेनोक्तम् भगवन् कथमयमीदृशो मे निग्रह· कृतः तथ विधेन मया आम याविना विना दुःख निरुद्वेगेन स्थित सप्रति सप्रतिपद्यमानमानतया सर्वा एव मनोवृत्तय उत्तिष्ठेयुः भगवतोक्तम् ब्र न् नपुनस्ते भग वदनुस्मरणमन्तरेण मनसो ह्यव्यापार भविष्यन्ति तदलमुद्वेगेनेति

राजा भट्टाचाय सत्यमेवायमीश्वर अन्यथा ईन्कृपा जीवस्य न घटते कुष्ठहारित्व तु योगीन्द्रस्यापि सग ते

सार्वभौम ततस्तत

विप्र ततश्च नृसिंहक्षेत्रमुपगम्याग यानुभावो भगव त नृसिंह दृष्ट्वा स्तुत्वा प्रण य प्रदक्षिणीकृत्य प्रतस्थे

काञ्चनाचलमरीचिवाचिभिर्गौरयन्किमपि दक्षिणा दिशम्
दर्शनेन करुणातरङ्गिणा द्रावयञ्जनमनासि सर्वत ४

अपि च

कृष्ण कृष्ण जय कृष्ण कृष्ण हे कृ ण कृष्ण जय कृ ण कृष्ण हे
ण कृष्ण जय कृ ण कृ ण हे ण कृष्ण जय कृ ण पाहि नः ५
इत्थमम्बुदविकस्वरस्वरसि धमु धवचन मृतद्रवैः
ह्लादय श्रुतिमता तिद्वय चित्तमप्यपहर स जग्मिवान् ६

सार्वभौम सत्यमेवात्थ तस्यैवमेव कृतिः

विप्र ततो गोदावरातारमासाद्य विहितविश्रामे जगज्जनमनोभिरामे निरुपमकृपाभिरामे प्रेमभाजि भगवति भगवति कनककेतकोपवन इव परिम लामोदितदि वलये सकलगुणनिलये स्वयप्रकाशिकया तत्प्रथया कोऽय कोऽयमिति कृतसमूह समूहः क्षौणिसुराणा तत्र मिलितवान् निमन्त्रि तश्च केनापि समनन्तरमनन्तरहस्ये सर्वतः सचरति जनचयश्रवणका ते तदुद ते म कृष्ट इव ग्रहगृहीत इव विस्मयचमत्कारविकारविसंष्ठुल इव रामानन्दरायः समुपेयिवान्

राजा रामानन्द धन्योऽसि धन्योऽसि यस्य ते नयनविषयीभूतास्ते श्रीचरणा

विप्र समन तरमागत्यैव चरणकमलपरिसरे सरेरायमाणाश्र निपत ति स्म स्वयमेव अये त्वमेव रामान दोऽसीति भगवता सानुग्रहमुक्ते अथ किमिति च प्रत्यूचे तदनु भगवतापि सार्वभौमानुरोधेन भवदालो कनमभीष्टं ममेति मयात्र क्षणमवस्थितम् तत्सुविहितमेव विहितं भवता यत्स्वयमेव समुपसेदे तदुच्यता किंचिदित्यभाणि ततो यद्यपि रामानन्दो

हि कोऽय किंनामा किंमहिमा किमाशयः किं तत्त्व इति किमपि भगवद्विष यक ानविशेषानभिज्ञस्तथापि चिरकालकलितसततसख्यसुखसुभगभावुक इव नि'साध्वस एव किमपि पठितुमुपचक्रमे

मनो यदि न निजित किममुना तपस्यादिना
कथ स मनसो जयो यदि न चिन्त्यते म धव
किमस्य च विचिन्तन यदि न ह त चेतोद्रव
स वा कथमहो भवेद्यदि न वासनाक्षालनम् ७

भगवान् बा मेतत्

का विद्या

रामानन्द

हरिभक्तिरेव न पुनर्वेदादिनि णातता

भगवान्

कीर्तिः का

रामानन्द

भगवत्परोऽयमिति या ख्यातिर्न दानादिज

भगवान्

का श्री

रामानन्द

तल्प्रियता न वा धनजनग्रामादिभूयि ता

भगवान्

किं दु'ख

रामानन्द

भगवत्प्रियस्य विरहो नो हृद्रणादिव्यथा ८

भगवान् भद्रम् के मुक्ता.

रामानन्द

प्रत्यासत्तिर्हरिचरणयोः सानुर गे न रागे
प्रीति प्रेमातिशयिनि हरेर्भक्तियोगे न योगे

आ । तस्य प्रणयरभसस्योपदेहे न देहे
येषा ते हि प्रकृतिसरसा हन्त मुक्ता न क्ता. ९

भगवान् भवतु
किं गेय

रामानन्द
व्रजकेलिकर्म

भगवान्
किमिह श्रेय

रामानन्द
सता सगति.

भगवान्
किं स्मर्तव्य

रामानन्द
अघारिनाम

भग ान्
केमनुष्येयं

रामानन्द
मुरारे. पदम्

भगवान्
स्थेय

रामानन्द
व्रज एव

भग ान्
किं श्रवणयोरानन्दि

रामानन्द
दावन

क्रीडैका

एकावल्यलंकार

भगवान्

किमुपास्यमत्र

रामानन्द

महसी श्री णराधाभिधे १

भगवान् भद्रम् उच्यतामुच्यत म्

रामानन्द (स्वगतम्) इत' पर किं वक्तव्यम् प्रश्नानुरूप दित मेव अधुना यद्वक्तव्य तेनास्य सुख भवति न वेति न ज नामि

(इति क्षणममिचिन्त्य प्रकाशम्)

निर्वाणनिम्बफलमेव रसानभिज्ञा
श्चू य तु नाम रसतत्त्वविदो वय तु
श्यामामृत मदनम थरगोपरामा
नेत्र ञ्जलीचुलुकितावसितं पिबाम १

भगवान् पुनरन्यदुच्यता समानार्थकमेतत्

र मानन्द इत' पर प्रतिप द्यमे नास्ति किमन्यद्व व्यम्

(इात मनसि विचाय प्र ाशम्)

नीचानेव पथश्चकोरयुवतायूथेन या कुर्वते
सद्य' स्फाटिकयन्ति रत्नघटितां या पादपीठावलीम्
या. प्रक्षालितमृष्टयोर्जललव स्यन्दशङ्काकृत
स्ता कृ णस्य पदाब्जयोर्नखमणिज्योत्स्नाश्चिर पान्तु नः १२

भगवान् काव्यमेवैतत् पुनरुच्यताम्

रामानन्द (क्षणं विचिन्त्य)

श्रीवत्सस्य च कौस्तुभस्य च रमादेव्याश्च गर्हाकरो
राधापादसरोजयावकरसो वक्ष.स्थल ो हरे.
बालार्कद्युतिम न्लीव तिमिरैश देन न्दी ता
कालिन्द्या पयसीव पीवविकच ोणोत्पल पातु न १३

भगवान् इदमपि तथा

राम नन्द (चरणौ धृत्वा)

सखि न स रमणो नाह रमणीति भिदावयोरास्ते
प्रेमरसेनोभयमन इव मदनो निष्पिपेष बलात् १४

अथवा

अह कान्ता कान्तस्त्वमिति न तदानीं मतिरभू
मनोवृत्तिर्लुप्ता त्वमहमिति नौ धीरपि हता
भवान्भर्ता भार्याहमिति यदिदानी व्यवसिति
स्तथापि प्राणाना स्थितिरिति विचित्र किमपरम्

सार्वभौम ततो भगवता किमुदितम्

वि तदा यदवलोकित तद् कलय

धृतफण इव भोगी ग रुडीयस्य गान
तदुदितमतिरत्याकर्णय सावध नम्
व्यधिकरणतया वान दवैवश्यतो वा
प्रभुरथ करपद्मेन स्यमस्याप्यधत्त १५

राजा भ ाचार्य कोऽय सदर्भ

भट्टाचार्य महाराज निरुपधि हि प्रेम कथचिदप्युपधिं न सहते इति पूर्वार्धे भगवतो कृ णराधयोरनुपधि प्रेम श्रुत्वा तदेव पुरुषार्थकृत भगवता खपिध न चास्य तद्रहस्यत्वप्रकाशकम्

वि तदा चिकुरकलाप द्विधा कृत्वा तेनैव तच्चरणयुग वे यित्वा निपत्य गदितम्

महारसिकशेखर सरसनाट्यलीलागुरु
स एव हृदयेश्वरस्त्वमसि मे किमु त्वा स्तुमः
तवैतदपि साहज विविधभूमिकास्वीकृति
र्न ते नयति भूमिका भवति नोऽतिविस्मापनी १७

(इति चिरं चरणकमल धृत्वा रुदन्नासीत् मध्ये मध्ये किञ्चिद्रुदात च)

आ स्मिको नु विधिना निधिरभ्यनायि
भग्न किमि दुरमृतस्य यदेष पातः

आनन्दभूरुहफल विपचरीण
यदेव तव देव पदारविन्दम् ८

भगवन् यथैवाद्य मया स्वप्ने ष्ट तथैव साक्ष दपि (ति पुनरपि पादै धृत्वा रोदिति भगवान्गा पारष्वजते) अत पर निमन्त्रयित्वा विप्रव रेण समागत्य देव अपराह्नो जात· इत्युक्तो भगव माध्यंदिनकर्मणे चलित ान् वयमपि तच्चरणारविन्द प्रण य तदहरेव प्रत्याजिगमिषव· स्म

सार्वभौम तदधुना विश्राम्यता भवद्भिः

विप्र यथाज्ञापयति भवान्

(राजा पारितोषिकं ददाति)

(विप्रा सादरमादाय नि क्रा ता)

(तत प्रविशति दौवारिक)

दौवारिक देव कर्णाटपतिना महाराजेन प्रेषितमुपायनमादाय तदमात्यो मल्लभट्टनामा पण्डितराजो द्वारमध्यास्ते

सार्वभौम ज्ञायतेऽसौ महापण्डितो भवति

राजा प्रवेश्यताम्

दौवारिक यथाज्ञापयति देव· (इति नि क्र य तमादाय प्रविशति)

सार्वभौम आगच्छन्तु भट्टा· (इत्युत्थानं नाटयति)

मल्लभट्ट (राजानमाशीर्भिरभ्यर्च्य) भ ाचार्य किमिद क्रियते नाह तव भ्युत्थानाय अथवा

सदैव तु : किल काञ्चनाचलः सदैव गम्भीरतमाः पयोधरा
सदैव धीरा विनयैकभूषणा लक्ष्मी प्रकृत्यैव जनै समायते १९

राजा इदमासनम्

मल्लभट्ट यथाज्ञमुपविशामि (इत्युपविशति)

राजा अपि कुशल कर्णाटपते

मल्लभ यस्य भवद्विधा· सु दस्तस्य सततमेव तत् किंतु सांप्रतम धिकमपि

राजा का शं तत्

मल्लभट्ट महाराज एतस्माज्जनपदत तीर्थयात्राव्याजेन द्रुतकनक द्युतिर्यतीन्द्र कोऽप्येको यदवधि हन्त दक्षिणाशां सप्राप्तस्तदवधि सोऽपि निर्वृतात्मा

सार्वभौम (सोत्कण्ठम्) भट्टा कथयन्तु कथयन्तु

राजा कथमिव

मल्लभट्ट यथोत्तरमेव दक्षिणस्या दिशि कियन्त कर्मनिष्ठा कति चिदेव ज्ञाननिष्ठा विरला एव सात्वत प्रचुरतरा' पाशुपता प्रचुरतमा. पाषण्डि न तेन तेषामन्योन्यवादविस ुलानामुच्चावचनिर्वचनचातुर्य धुर्याणा स्वसमताचार्यवर्याणा प्रसङ्गेन प्रायशो बहुलोद्वेग एव नो महीपालः

राजा ततः

मल्लभट्ट आकस्मिकप्रवेशमात्रेणैव तस्य यति तेर्दिशि विदिशि सान न्दचमत्कार समूढे वाबालवृद्धतरुणेषु लोकेषु दिदृक्षयोपनतेषु पण्डि तम लेष्वपि परमनयनसुभगया वपुर्लक्ष्म्यैव प्रकटीकृत महिमानमनुभूय विनोपदेशेन पि कर्ह्येव स्याम ₹ति तत्कालसमुदित्वरवासनाविशेषेण जात पुलकास्रव. सर्व एव स्वसमतप्रच्यावेन तत्पथप्रविष्टा बभू: : तस्य परम्पराश्रवणेन ल धपरमानन्दोऽस्मन्नरलोकपालस्तद्विशेषचरितमवगन्तु गूढ वेशेन ब्राह्मणान्प्रहित्य यावत्सेतुबन्ध ततः प्रत्यागमनावधि च तस्या लौकिकचमत्कार तत्तन्मुखादनुभवन् भवदवदहनज्वालामेव विस्मृतवान्

राजा अमात्य धन्योऽसौ यु मदीयो महीपाल

सार्वभौम किं किं श्रुतम् किंचित्कथ्यताम्

राजा अमात्य कथ्यताम्

मल्लभट्ट एकस्मिन्नहनि निजसुखावेशेन विगलद्विलोचनजलस ल धौतकलधौतशरीर रोमाञ्चसचयेन मुकुलाकुलायमानकदम्बभूरुहाकर भग वन्नामसकीतनसगद्गदस्वर स्वरहसा स्नान दवैवश्येन वर्त्मपरिचयाभावतो ऽपि यथावत्सैव चल तं भगव तमालोक्य पाषण्डिनो वै णवोऽय भवति भिक्षुर्भगवत्प्रसादनान्नैवेद ग्रहीष्यति तदेतदन्नमेनमाशयाम. इति श्वभो जनयोग्यमशुचितरान्न स्थाल्या निधाय पुरोगत्वा स्वामिन् भगवत्प्रसाद

मिम गृहाण इति श्रावयित्वा समूचिरे चिरेण भगवा सर्वज्ञोऽपि भग वत्प्रसादनाम्ना तत्त्यागमसहमान एव पाणौ गृहीत्वा तत्सहितमेव पाणिमु- द्यम्य चलितवान् समन तरमेव महता केनापि विहगेन चञ्चुपुटे कृत्वा तदन्न भगवत्करतलतः समादाय समुड्डीनम्

सार्वभौम अहो मोहस्य महिमैषाम्

य मायया मूढधियो भ्रमन्ति भुवनेश्वराः
तमपीह भ्रमयितुं क्षुद्राणामयमुद्यम· २

मल्लभट्ट अन्येद्यरन्यत्र कुत्रापि ब्राह्मणगृहे य च्छयोपगतस्त ब्रा ण केवल राम राम रामेति नाममात्रजपपरायण दृष्ट्वा गतवान् प्रत्यागमनसमये पुनस्तमालोकयितु तत्रैव समुत्तीर्णस्तमेव कृ ण कृ ण कृ णेत्येव जप त दृष्ट्वा पृष्टवान् ब्राह्मण कथ गमनसमये राम राम रामेत्येवं जपन् भवाना लोकि अधुना कृष्ण कृ ण कृ णेत्येव जपन्नालोक्यते तत्कथयास्य तत्त्वम् इति तदा स ऊचे भगवन् तवैव प्रभावोऽयम् यत शै वाबधि रामनाममात्रजपपरायणोऽह भवद्दर्शनमात्रेण कृष्ण कृष्ण कृष्णेत्ये मे वदनान्निःसरति बलादप्यहमेतन्निवर्तयितु न शक्नोमीति तवैव दर्शन दोषोऽय न मम इति

राजा भट्टाचार्य कोऽत्र सदर्भ·

भट्टाचार्य महाराज यद्यपि समानार्थमुभयमेव

रम ते योगिनोऽन ते सत्यान दचिदात्मनि
इति रामपदेनासौ पर ब्रह्माभिधीयते २१

यथा

कृषिर्भूवाचक· शब्दो णश्च निर्वृतिवाचक
तयोरैक्य पर ब्रह्म कृ ण इत्यभिधीयते २२

इति परब्रह्मार्थत्व समानमेव तथापि रतिमता राम इत्युक्ते रघुनाथ स्फूर्ति· ष्ण इत्युक्ते व्रजराजकुमारस्फूर्तिरिति श्रीकृ णचैतन्यदेवस्य कृष्णात्मकत्वात्तद्दर्शने णस्फूर्तिरेव स्फुरतीति रहस्यम्

अपिच

सहस्रनामभिस्तुल्य रामन म वरानने
सहस्रनाम्ना पुण्याना त्रिरावृत्त्या तु यत्फलम् २३
एकावृत्त्या तु कृ णस्य नामैक तत्प्रयच्छति

इति र मनामत कृ णनाम श्रेय·

मल्लभट्ट सत्यमेतत् अस्माभिरपि भूपालस्य सदसीदमेव निरणायि एव दक्षिणस्या दिशि ये ये विष्णुभक्तास्ते किल रघुनाथभक्तिद्वारैव वनवासे पञ्चवट्य दिषु रघुनाथचरितचारुस्थलदर्शनात्तत्रैवानुरक्तिस्तेषा स्वाभाविकी सम्प्रति यतीन्द्रमेनमालोक्य कृ णपक्षपाता एव बभूवुः एव क्वचन स्थले कमपि ब्राह्मणमतिमूर्खतया श दार्थावबोधविरहेण शुद्धिवर्जित भगवद्गीता पठ त प्रायश· सर्वैरेव विहस्यमानमथ च यावत्पाठ तावदेव पुलकाश्रुविवश विलोक्य अहो अयमुत्तमोऽधिकारीति भगवास्तमवादीत् ब्रह्मन् यत्पठ्यते तस्य कोऽर्थ इति स प्रत्यूचे स्वामिन् नाहमर्थं किमपि वेद्मि अपि तु पार्थरथस्थ तोत्रपाणिं तमालश्याम श्रीकृ ण यावत्पठामि तावदेव विलोकयामि इति तदा भगवतोक्तम् उत्तमोऽधिक री भवा गीतापाठस्य ति तमालिलिङ्ग तदनु स खलु गीता पाठजादानन्दादपि प्रचुरतरमान दमासाद्य स्वामिन् स एव त्वम् इति भूमौ निपत्य प्रणमन्नतिशयविह्वलो बभूव

सार्वभौम उचितमेवास्य तथा ज्ञानम् निरन्तरभगवत्स्फूर्तिनिर्मल हृदयत्वेन यथार्थस्फूर्तिरेव भवति

मल्लभट्ट एवमेवास्मत्सदसि विचारितमस्ति एवमन तैव विचित्रा कथा तैस्तैर्गूढपुरुषै कथिता कति कथनीया भवति

सार्वभौम एवमेतत्

राजा (सोत्कण्ठम्) ह त कदा भगवा वीक्षितव्य

(नेपथ्ये ह त वीक्षणसमयो यम् तदल वलम्बेन)

राजा (सहर्षम्) भट्टाचार्य यथायं यथाप्रस्तावमेव जगन्न थद र्शनसमय प्रस्तौति तथा मन्ये श्रीकृष्णचैतन्योऽप्य गतप्राय:

भट्टाचार्य भट्टारक ए मेव

राजा भट्टाचार्य अय पुरुषोत्तमः पुरुषोत्तमक्षेत्रस्य बीजभूत किमपि भवि यति अस्मात्किल बहव एवानन्दाङ्कुरा जायेरन् नीलाचल-चन्द्रस्य सेवासौभाग्यविशेषोऽपि भविष्यति

सार्वभौम सत्यमेतत् पुण्यात्मनो हि नरदेवा देव शभूता एव तेन भवता मनसि यदुन्मीलति तदेव सत्यम् (नेप ये) ह त भोः सत्य सत्यम्

राजा (सहर्षम्) अद्यापि तथैव वाक्शकुनम् तत्पश्य ज्ञायता कोऽयम् भट्टाचार्य तैर्थिकस्तैर्थिकान्तरेण स जगन्नाथदर्शनोत्कण्ठा प्रप यति

(विश्य)

दौवारिक देव अतिसत्वर धावमाना. कतिचित्पुरुषा समायान्ति

राज ज्ञायतां निरस्त्रा' सास्त्रा वा तेऽमी

दौवारिक (नि क्र य पुन प्रविश्य च) देव निरस्त्रा एव सर्वे

सार्वभौम नून प्रत्या र्तते स एव देव.

(पुननेपथ्ये भूय हरिं व दे हार दे इति कोलाहल)

सावभौम अवितथमेव भगव प्रत्यावृत्त

(नेप य)

तीर्थेष्वमासु सकलेषु तथा न तृप्ति-
र्जात स्य सत्वरमत' पुरुषोत्तमे सः
प्रत्याययौ कलय जङ्गमरत्नसानु
रत्नाकरस्य सविधे सुमुखो विधिर्न २४

सार्वभौम महाराज यदय गोपीनाथाचार्य सहर्षमालपति तदय मागत एव भगवान् तदह पसर्पामि

राज त्वरता वरताम् मल्लभट्ट त्वम यधुना विश्राम कुरु वयमपि कार्यविशेषाय गच्छाम

(इति निष्का ता स)

इति तीर्थाटनो नाम स मो

अ मो ङ्क

(तत प्रविशति ावभौमादिमिदामोदरजगदान द दिभिश्चानुग यमान श्रीकृष्णचैतन्य)

श्रीकृष्णचैतन्य सार्वभौम एता द्दूर पर्यटित भवत्सदृश कोऽपि न द्द केवलमेव रामान दराय. स त्वलौकिक एव भवति

स र्वभौम देव अत एव निवेदित सोऽवश्यमेव द्रष्टव्य इति

श्रीकृष्णचैतन्य किय त एव वै णवा द्दष्टास्तेऽपि नारायणोपासका एव अपरे त्ववादिनस्ते तथ विधा एव निरवद्य न भवति तेषा म तम् अपरे तु शैवा एव बहव पाष डास्तु महाप्रबला भूयास एव किंतु भट्टाचार्य रामान दमतमेव मे रुचितम्

सार्वभौम भव मत एव प्रविष्टोऽसौ न तस्य मतकर्तृता स्वामिन् अत परमस्माकम येतदेव मत बहुमत सर्वशास्त्रप्रतिपाद्य चैतदिति

गोपीनाथाचार्य भट्टाचार्य भगवतोऽवस्थानस्थान चिन्तितमस्ति

भट्टाचार्य आचार्य राज्ञैव चिन्तितम्

गोपीनाथाचार्य (जनान्तिकम्) कीदृशं तत्

भट्टाचार्य काशीमिश्रस्यालय·

गोपीनाथाचार्य साधु साधु सिंहद्वारनिकटवत्ा भवति यत सकाशात्सुखेनैव जगन्नाथदर्शन भवि यति (इति समुद्रकूलात्पुरुषोत्तमग्राम विशन्ति)

(तत विशन्ति भगवज्जगन्नाथप्रसादमालापाणयो जगन्नाथदेवपशुपालका ाशी मिश्र परीक्षामहापात्र च)

सार्वभौम अयमय श्रीकृ णचैतन्यः स्वामी (इति सोत्क ठमुपसपन्ति)

सार्वभौम भगवन् एते भगवतः पशुपालाः एष काशीमिश्र नामा एष सर्वाधिकारी प्राडिवाको भगवत

(काशीमिश्रपरीक्षामहापात्रे उपसृत्य दण वन्निपतत)

पशुपालका (माला क ठे दत्वा णमन्ति)

भगवान् अहो किमेतत् भगवत्पार्षदा भवन्तो मदार ध्य एव कथमयोग्यमेतत्क्रियते (इति सवा प्रणम्यालिङ्गति)

पशुपाला सार्वभौम भगवतो दिवास्वप्नसमय संप्रति जात किमिदानीं तत्रैव गत्व स्वामिना स्थातव्य किं वा विश्र य स्नानादि कृत्वा समागि तव्यम्

वभौम स्नात्वा देवदर्शनं कर्तव्यम्

शीमिश्र तदित एवागच्छन्तु (इति स्वालयमुप रयति)

सार्वभौम भगवन् इद खल्वस्यैव मिश्रस्य पुर श्रीचरणाना कृते शोधयित्वा स्थापितमस्ति तदत्रैव प्रविश तु भगव तः

(इति प्रवेश नाटयन्ति पशुपालादय प्रण य नि क्रा ता)

(तत प्रविशन्ति बहव एवोत्कलवासिनो महाशया केचित्)

तदानीमस्माक समजनि न तादृक्सुभगत
गतास्तेनास्माक परमकरुणा नेक्षणपथम्
इदानीं नो भा य समघटत यज्ज मिमि
स्वय नीलाद्रीश बत नयनपातैर्विचिनुमः १

(इत्युपसर्पन्ति)

सार्वभौम भगवन् अय भगवतोऽनवसरकाला सेवकोऽ तरङ्गो जनार्दननामा अय स्वर्णवेत्रधारी पार्षदः कृ णदासन मा अय लेखना धिकारा शिखिमाहाती भ्रातरौ चाप्येतौ अय दासमहासोआरनामा महानसाधिकारी एते निसर्गभक्ता. श्रीजा न्नाथस्य इमे चन्दनेश्वरम रारिसिंहेश्वरा ब्रा णोत्तमा राजमहापात्राणि स्वभाववै णवा. अय प्रहर र जमहापात्रं परमो भगवद्भक्त अय प्रद्युम्नमिश्र अय वि णुदास मे रामान दरायसहोदरा त मध्येऽय वाणीनाथपट्टनायक अय तस्य जनको भवान दरायः इमे चान्ये गौडो क वासिनः सर्वे वञ्चि त्तास्त्वद्भतप्र णा दण्डवत्प्रणमन्ति एतानात्मीयत्वेनानुग्रहीतुमर्हति

भगवान् आत्मान एवामी कथमेषामात्मीयत्व विशेषतो जगन्ना थ सेवकाः

सार्वभौम भगवन् जगन्नाथस्य भवतश्च णचैतन्यत्वमविशिष्ट मेव तथा यस्ति कश्चिद्भेद असौ दारुब्र भवान् नरब्रह्म

भगवान् (कर्णौ पिधाय)

अत्युक्तिरेषा तव सार्वभौम तनोति कामं श्रवसोः कटुत्वम्
तीक्ष्णो हि गौडस्य रसस्य पाकस्तिक्तत्वमायाति न चैति बद्धम् २

सार्वभौम भगवन् गौडदेशस्य रसस्य पाक सुरस एव यत्रा विरासीद्भगवान्

श्रीकृष्णचै न्य विरम विरम अत.पर श्रीपुण्डराकाक्षदशनस्य समयो जात.

सार्वभौम एवमेव तदुपसर्प तु भगवन्तः

(इति भगव तमग्रे कत्वा परिक्रामन्ति)

(नेपथ्ये)

अयमेष दृशो रसायन परमानन्दपुराश्वर' पुरस्त त्
दमनार्थमघौघकारिणा धृतद न' समये समुज्जिहीते ३

सार्वभौम (आ) अहो अवसर सवृत्त एव देवस्य यदय प्रस्तौति

श्रीकृष्णचैतन्य (स्वगतम्) अहो परमानन्दपुराश्वरस्तावं मुनीन्द्र माधवपुरीश्वरस्य शि य यत्र स्वस्वग्रजस्य विश्वरूपस्य समग्रमैश्वरं तेज. प्रविष्टं स एव वा समागतः भवतु देवं विलोक्य तत्त्वमस्य ज्ञेयम्

सार्वभौम इय पुरो भगवत परमान दपुरा तदेना प्रविश त

(इति सर्वे भगवता सह श्रीजगन्नाथदर्शनाथ नि क्रा ता)

(तत प्रविशति परमान दपुरी)

पुरी (सोत्क ठम्)

कदासौ द्रष्टव्य. स खलु भगवा भक्ततनुमा
निति प्रौढोत्क ठाविलुलितमहो मानसमिदम्
चिरादद्य प्रातः स खलु फलकालो मम पुन
र्न जाने की क्ष जनयति फलं भा यविटपी ४

(इति परिक्रामन्) भगवन् श्रीजगन्नाथ क्ष यताम् त्वामनालोक्य यदग्रे त पसर्पामि तत्तादृशीमुत्क ठा सर्वज्ञा जानन्त्येव (पुरो वलोक्य) अहो इहैव भवितव्य भगवता तेन यतः

जगन्नाथद्वारादपि बहुलकोलाहलकृतां
समूहो लोकानामिह सरति नै पसरति
अतो मन्ये धन्ये धरणि तव पुण्येन मिलितः
स एवाय देवः कनकरुचिरत्वैव भविता ५

तदहमुपसर्पामि (इत्युपसर्पति)

(तत प्रविशति परिजनै सार्धं श्रीजगन्नाथदर्शनान दनिस्प द श्रीकृष्णचैतन्य)

श्रीकृष्णचैतन्य (स्मृतिमभिनीय) अहो परमान दपुरीश्वर साम्प्रत मागमि यतीव लक्ष्यते यतः

भगवद्दर्शनसुखमनु सुखा तर किमपि सांप्रत भावि
आसन्नशर्मशसी प्रसादक आकस्मिको मनसः ६

(इति सोत्क ठ ति ति)

पुरी (अग्रतो वलोक्य) अहो अयमसौ

जयति कलितनीलशैलच द्रेक्षणरसचर्वणर निस्तर .
कनकमणिशिलाविलासवक्ष स्थलग दस्रमजस्रोमहर्षः ७

श्रीकृष्णचैतन्य (अग्रतोऽवलोक्य) अयमेवासौ यदिदमाकस्मिकमा गमनमिहैतस्य (इत्युत्थाय णम्य) स्वामिन् पुराश्वरोऽसि

पुरी (ससभ्रमम्) भगवन् त्वद्दर्शनार्थमेवायमहमुत्कण्ठितो वारा णसीत आगच्छन्नस्मि

श्रीकृष्णचैतन्य अनुगृहीतोऽस्मि

(उपसृत्य)

जगदानन्द स्वामिन् इत इत (इति विश्रामयति)

सार्वभौम भो स्वामिन् नेदमतिचित्रम्

ये केऽपि या काश्चन सप्रवाहा नदाश्च नद्यश्च भवन्ति भूमौ
कस्यापि रत्नाकरम तरेण कुत्रापि नास्था न च संनिवेशः ८

(नेपथ्ये)

अहो रसकलावतो भगवतो रसाचार्यक
ग्रहीतुमिव मूर्तता व्यधित भिक्षुवेष वपु

यदेतदवनीतले सकल एव दामोदर
स्वरूपमिति भाषते तदपृथक्तया प्रेमतः ९

सार्वभौम अहो लोकानामत्र भगवति नैसर्गिकी रतिः यदिद परोक्षेऽपि सर्वे भगवत्तामेवास्य गायन्ति

श्रीकृष्णचैतन्य (श्रुतिमभिनीय) अहो दामोदरस्वरूपमिति नामाकर्णित कश्चिदयमपि समागमिष्यतीव लक्ष्यते

सार्वभौम स्वामिन् प्रायशो भवदवतारे केचित्पूर्वं केचित्पश्चा भवदीया एव सर्वेऽवतेरु समये सर्वैरेव मिलितैर्भवितव्यम् अत एव सप्रवाहा इत्युक्तम्

(तत प्रविशति दामोदरस्वरूप)

दामोदरस्वरूप (आकाशे लक्ष्य ङ्का)

हेलोद्धूलितखेदया विशदया प्रोन्मीलदामोदया
शा यच्छास्त्रविवादया रसदया चित्तार्पितोन्मादया
शश्वद्भक्तिविनोदया समदया माधुर्यमर्यादया
श्राचैतन्य दयानिधे तव दया भूयादमन्दोदया १

(इत्युपसपति)

गोपीनाथाचार्य (पुरोऽवलोक्य स्वगतम्) अये श्रुत मया चैतन्यानन्दशि य परमविरक्तो भगवद्भक्तोऽतिविद्वान्कश्चिद्दामोदरस्वरूप नाम य खलु गुरुणा बहुतरमभ्यर्थितोऽपि वेदान्तमधीत्याध्यापयेति न च कृतवान् अपि तु

समस्तहानाय तुरायमाश्रम जग्राह वैराग्यवशेन केवलम्
श्रीकृ णपादा जपरागरागतस्तुच्छीचकारैनमहो व६न्नपि १

स एवाय तद्भगवते निवेदयामि (इत्युपसृत्य) भगवन् अयमय श्रुत चरो दामोदरस्वरूपः

भगवान् क स क स· (इति-सोत्क मुपसपति)

दामोदरस्वरूप (उपसृत्य पादयो प्रणमति)

श्रीकृष्णचैतन्य (बाभ्यामुत्थाप्यालिङ्गति)

(नेप थे)

ईश्वरपुरी निषेवणरतः स्वत· कृष्णभक्तश्च
अयमेति विशदहृदयो विरक्तिमान्सकलविषयेषु १२

सावभौम (आक र्य) अये भगवत्पुरपरिचारक· कोऽपि समा याति कस्तावदसौ परीक्षामहापात्रस्य प्रतिनिधिर्वा नासौ तथा विरक्त

श्रीकृष्णचैतन्य अहो पुरीश्वरस्य सकाशात्कश्चिदायातीव

सार्वभौम (अवलोक्य) जानीम. (इति निरूपयति)

(तत प्रविशति गोवि दनामा कश्चित्)

गोविन्द (स्वगतम्)

प्रहितोऽस्मीश्वरपुर्या महाप्रभो सविध एव याहीति
उपसन्न तदिदमथो न वेद्मि निजभा यमहिमानम्

(इत्युपसृत्यप्रणम्य चाञ्जलिं कृ्वा) स्वामिन्

ष्ट मया प्रथममस्य यदेव रूप
तेनैव निर्वृतिरहो मम नान्यवेषम्
पश्यामि त त्वमुपयाहि तमित्यह ते
सप्रेषितश्चरणसीम्नि पुरीश्वरेण १३

श्रीकृष्णचैतन्य अस्ति तथैव मयि तेषामस्व मेव वात्सल्यम्

सार्वभौम त्व तस्य परिचारक.

गोविन्द अथ किम्

सार्वभौम स्वामिन् कथमसौ ब्राह्मणेतर परिचारकत्वेनानुगृह्णी तवान्

श्रीकृष्णचैतन्य भट्टाचार्य मैवं वादीः

हरे. स्वतन्त्रस्य कृपापि तद्वद्धत्ते न सा जातिकुलाद्यपेक्षाम्
सुयोधनस्य न्नमपो हर्षाज्जग्राह देवो विदुरान्नमेव १४

स र्वभौम एवमेव

श्रीकृष्णचैतन्य भवतु यद्यपि पूज्यानां परिचारकेण स्वपरिचर्यां कारयितु न युज्यते तथापि तदाज्ञया तथैव कर्तव्यम् (इति तमनुगृह्णाति) (प्रविश्य स रम्)

न्द स्वामिन् ब्रह्मानन्दभारती भवन्त दि क्षमाण आगतो ऽस्ति यद्याज्ञापयसि तदिहैवानयामः

श्रीकृष्णचैतन्य शान्तम् मान्याः खलु भवन्त्यमी तन्मयैव ग तव्यम्

सर्वे

अलौकिकानामपि लौकिकत्वमलौकिकत्वप्रथनाय नूनम्
भुव प्रयाण किल वि णुपद्या दिवं नयत्येव शरीरभाजः १५

(ात भगवन्तमग्रे कृत्वा पारक्रामन्ति तत प्रविशति चर्माम्बरो ब्रह्मान द)

ब्रह्मानन्द (पुरो वलोक्य) अयमेव श्रीकृ णचैतन्य
तथा हि

कनकपरिघदीर्घदीर्घबाहुः स्फुटतरकाञ्चनकेतकीदलाभ'
नवदमनकमाल्यलाल्यमानद्युतिरतिचारुगति समुज्जिहीते १६

श्रीकृष्णचैतन्य (उपसृत्य तमवलोक्यापि चर्मचेलत्वमात्मनोऽनभिमतामति बोधय सावहित्थम्) मुकु द ासौ

न्द अयमयम्

श्रीकृष्णचैतन्य नहि स चेदभविष्यत्तदा कथ चर्मचेलत्वेन बा वेषावेशवशत्वमस्याभविष्यत्

ब्रह्मानन्द (ाकण्य स्वगतम्) अहो असौ चर्मचेलत्व न रोचत इव भवति हि

दम्भैकमात्रप्रथनाय केवल चर्माम्बरत्वादि न वस्तुसाधनम्
चलद्भिरुर्वीमृजुनैव वर्त्मना सुखेन गम्यस्य समाप्यते वधिः १

किमेतेनेति चर्म जिहासति

श्रीकृष्णचैतन्य (दामोदर निरीक्षते)

दामोदर (इङ्गित बुद्ध्वा सत्वरं बहिवास प्रयच्छति)

ब्रह्मानन्द (परिदधाति)

श्रीकृष्णचैतन्य (उपसृप्य णमति)

न्द (ससाध्वसादरम्) स्वामिन् लोकशिक्षार्थं यद्यपि भवता

मिदमुचितमेव तथापि नोऽतिभयजनकमेतत् तदपर नैतदनुष्ठेयम् पश्य पश्य

नीलाचलस्य महिमा न हि माद्दशेन
शक्यो निरूपयितुमेवमलौकिकत्वात्
एते चरस्थिरतया प्रतिभासमाने
द्वे ब्र णी यदिह संप्रति गौरनीले १८

श्रीकृष्णचैतन्य सप्रतिशब्दस्य वर्तमानत्वादचिरागते भवत्येव गौरब्रह्मता नामैकदेशवर्तिब्रह्मशब्दत्वा

ानन्द व्या यव्यापकभावत्वेनैव तदनुमीयते व्या यत्व च चर्मत्यागेनैव ज्ञ यताम्

सार्वभौम सम्यगाहु· श्रीपादा

ब्रह्मानन्द सार्वभौम पश्य पश्य

सुवर्णवर्णो हेमाङ्गो वराङ्गश्च दनाङ्गदी
इति नामान्यनेनैव सा-वयत्व प्रपेदिरे १९

चन्दनाङ्गदित्व स्वप्रसादच दनाक्तडोरेणैव भगवद्भि· श्रीजगन्नाथदेवै रेव क्रियमाणमस्ति पश्य पश्य भगवद्रूपमात्रस्य परमान दप्रदत्वम् किं पुन· स्वय भगवत श्रीकृ णस्य अहो चित्रम्

आनन्दानुभवैकसाधनमहो रूप घनान दचि
द्भा ान्त.करणोर्मिवृत्तिविरहस्यापादक पश्यताम्
हित्वान दथुल धये हृदि निराकार तु यैश्चिन्त्यते
मन्ये तान्भ्रमयत्यहो भगवतो सा कापि दुर्वासना २

अपिच

अमूर्तत्व तत्त्व यदि भगवतस्तत्कथमहो
मदासूयादीन मपि न भगवत्तत्त्वगणना
न मूर्तामूर्तत्वे भवति नियम· ाक तु परमो
य आनन्दो यस्मादपि स च स ईशो मम मतम् २१

सार्वभौम स्वामिन् एवमेव आनन्दमयोऽभ्यासात्' इत्यत्र व्याख्यात चैतत् स्वयमान द' परानप्यान दयति यथा प्रचुरधनः परेभ्योऽपि धन ददातीति प्राचुर्यार्थे मयडिति किंतु तत्कृपा चेद्भवति तदा निराकारभावनातोऽपि पुन श्रीविग्रहमाधुर्य एव निपतति उक्त च भियुक्तै'

अद्वैतवीथीपथिकैरुपास्याः स्वानन्दसिंहासनल धदीक्षा
शठेन केन पि वय हठेन दासीकृता गोपवधूविटेन २२ इति

दामोदर ब्रह्मान द प्रति श्रीपादा मया निमन्त्रिता स्थ तदिदानीमनन्तकरणीयाय गच्छन्तु

श्रीकृष्णचैतन्य स्वामिन् एवमेव युज्यते

ब्रह्मानन्द यदभिरुचित भवते (इति दामोदरादिभि कतिभि सह नि ान्त)

श्रीकृष्णचैतन्य सार्वभौम त्वमपि ग तुमर्हसि

सार्वभौम देव किंचिन्निवेदनीयमस्ति

श्रीकृष्णचैतन्य किं तत्

सार्वभौम स्वामिन् अभयं चेद्दीयते तदा निवेद्यते

श्रीकृष्णचैतन्य असाध्वसमेव कथ्यताम्

सार्वभौम भूपाल श्रीचरणावलोकनाय समुत्क ठते यद्यनुमन्यसे तदा तमानयाम

श्रीकृष्णचैतन्य (कर्णौ पिधाय) सावभौम भवतापीदमुच्यते

निर्किंचनस्य भगवद्भजनो मुखस्य
पार पर जिगमिषोर्भवसागरस्य
संदर्शन विषयिणामथ योषिता च
हा ह त ह त विषभक्षणतोऽ यसाधु २३

सावभौम स्वामिन् सत्यमेवैतत् किंत्वसौ श्रीजगन्नाथसेवकः

श्रीकृष्णचैतन्य

आकारादपि भेतव्य स्त्रीणा विषयिणामपि
यथाहेर्मनस. क्षोभस्तथा तस्याकृतेरपि २४

य व पुनरुच्यते तदात्र न पुनरह द्रष्टव्य.

सार्वभौम (तूष्णीं तिष्ठति)

श्रीकृष्णचैतन्य भट्टाचार्य अतिकालो बभूव

सार्वभौम यथारुचित स्वामिने (इति निष्का त)

श्रीकृष्णचैतन्य मुकुन्द मयि दक्षिणस्यां दिशि गते सति श्री पादनित्यान देन गतम्

मुकुन्द गौडे उक्त चेद भगवदागमनसमयमनुमाय पुनः सर्वैरद्वैत प्रमुखै सह मयात्रागन्तव्यमिति

गोपीनाथाचार्य सप्रति द्वैराज्यादिकमपि नास्ति पन्थाश्च सुगम· गुण्डिचायात्रा च नेदीयसी तदागमनसामग्री सर्वैवास्ति किं तु स्वामिनां प्रत्यागमनव र्ता तावद्दूरगामिनी चेद्भवति अथवा कृतं सदेहेन

ध्वा त विधूय किरणैरुदितस्य भानो
श्चन्द्रस्य वा जगति के कथयन्ि वार्ताम्
लोकोत्तरस्य किल वस्तुन एव सेय
शैली स्वय स्वमभित प्रकटीकरोति २५

तत्स्वामिन् जगन्ना देवस्य सायाह्नधूपसमयो जात यद्यनुमन्यसे (इत्यर्धोक्त साध्वस नाटयति)

श्रीकृष्णचैतन्य आचार्य गम्यता धूपावलोकनाय अहमपि पुरी श्वरस्वरूपाभ्या सह सकथनाय गच्छामि (इति भगवान्नि क्रा त)

गोपीनाथाचार्य अहो नि क्रान्त एव भगवान् तदहमपि धूप द्दष्ट्वा पुनस्तत्रैव मिलि यामि (ति कतिचित्पदान्यादधाति)

(नेपथ्ये)

आसन्ने रथविजयेऽखिलेश्वरस्य प्राप्तोऽय धरणिपति प्रतापरुद्र
भूयोऽय यतिवृषभस्य गौरमूर्ते प्रत्यक्षीकरणकृते प्रयत्नकृत्स्यात् २६

गोपीनाथाचार्य. अहो अय भट्टाचार्यस्यालापः श्रूयते तन्मही

पलेन गजपतिना समागतमिव भवत्यपि अभ्यर्णोऽय रथमहोत्सव· तदह श्रीजगन्नाथमालोक्य यावदागच्छामि (इति निष्क त)

(तत विशति भ ाचार्य)

भट्टाचार्य आगमनसमका मेव यदहमाहूतोऽस्मि गजपतिना ते नोन्नीत श्रीकृ णचैतन्यदर्शनार्थमयमुत्क ठते (इति परिक्रम्यावलोक्य च) अहो अयमयमवनीपतिः यावदुपसर्पामि (इत्युप पैति)

(तत विशत्यासनस्थो राजा महापात्राणि च)

राजा (सोत्क ठमात्मगतम्)

अभून्न चेष्ट मम राज्यचे ा सुखस्य भोगश्च बभूव रोगः
अत पर चेत्स न वीक्षते मा न धारयि ये बत जीवन च २७

सार्वभौम अ तः सचिन्तित इव लक्ष्यते महाराज· मदुपनतमपि मा न गोचरीकरोति तत्स्वयमेव परिचीये जयतु जयतु महाराज

राजा (अवधान नाट्यिला) कथम् भ ाचार्योऽसि एहि एहि

(इति णमति)

सार्वभौम (आशीभिरभिन द्योपविशति)

राजा भ चर्य निवेदित भवता भगवते श्रीकृष्णचैतन्याय

सार्वभौम अथ किम्

राजा किमाज्ञप्तम्

सावभौम किं कथयामि

राजा (सविषादम्) तदैव मया ज्ञातमस्ति यद्भवता स्वयमुपेत्य स हर्षोल्लास न कथितम् हा धिक्

अदर्शनीयानपि नीचजाती स वाक्षते चारु तथापि नो माम्
मदेकवज कृपयिष्यतीति निर्णीय किं सोऽवततार देव· २८

(क्षण विचि त्य) अये श्रूयताम्

ज्ञातैव तस्य किल सत्यगिर· प्रतिज्ञा
सम्प्रत्यहो क्रियत एष मयापि पक्ष

प्रणास्त्यजामि किमु वा किमु वा करोमि
तत्पादपङ्कजयुग नयन ध्वनीनम् २९

(इति । पस्त्रिष्ठति)

सार्वभौम (स्वगतम्) अतिभूमिं गतोऽयमस्यानुर गपरभाग किं करोमि

पुनर्गत्वा यामहह तदिद नैव घ ते
स निर्बन्धस्तस्य द्रढिमगरिमद्राधिमघन.
सुदुर्वारोऽ यस्य प्रथितपटिमप्रौढिमवहो
महारागः कश्चित्कमपि न विजेतु प्रभवति ३

तदधुना युक्तिः क्रियते (प्रकाशम्) महाराज समाश्वसिहि समाश्वसिहि अस्त्युपायः कोऽपि भव मनोरथतरोः फलप्रसवाय

राजा जानासि चेदुच्यताम्

सार्वभौम यद्यपि भवतोऽयमनुरागदूत एव तत्सङ्गमस्य कारयिता तथाप्यस्माद्युक्तिर्वर्तनी जीवनोपायीभवितुमर्हति

राजा उच्यता का युक्ति·

सार्वभौम जनान्तिक केवलमनुरागमेव दूत कृत्वाऽद्वितीय एव राजवेश विहाय कना यविदित एव भगवतो जगन्नाथदेवस्य रथोत्सववा सरे नृत्यविनोदश्रममपनेतु विजनमारामम्वगाहमानमान दास्वादविरतब हिर्वृत्तिकमकस्मादुपेत्य विलोकय तु भगव त भवन्त इति इतोऽन्यथा न तद्घटते

राज (साश्वासमपवाय) एवमेव किंतु यथेद भव त विना कोऽपि न जानाति तथा विधेयम्

भट्टाचार्य एवमेव (प्रविश्य दौवारिक)

दौवारिक देव राजधानीत कश्चिदेक सत्वरमुपसन्नोऽस्ति प्रणिधिः

राजा प्रवेश्यताम्

दौवारिक (सत्वरं निष्क्र य तमादाय प्रवि.य च) देव अयमयम्

राजा प्रणिधे कथय सभ्रमस्य क रणम्

प्रणि धि देव

पर.सहस्रा. सहसैव पारे चित्रोत्पलं ये मनुजा समूढा.
किं तैथिकास्ते परचक्रजा. किं श्रत्वैव कोलाहलमागतोऽस्मि ३

सावभौम तैर्थिका एव अन्यथा पुरैव वार्ताभविष्यत् तदनु मीयते गौडीया एवैते भगवत श्रीकृष्णचैतन्यस्य प्रियपार्षदा· भवतु म हत्येवासौ मधुरगोष्ठी गरिष्ठाना भविष्यति भगवता सह कापि गोष्ठी

(नेप थे क कल)

सार्वभौम महाराज सत्यमेवामी नरे द्रसरस्तीर समायाता· यद यमानन्दकोलाहलः श्रूयते

राजा सत्यमेवैतत्

सार्वभौम महाराज यदि रोचते तदा वलभीम रुह्य पश्यन्तु कौतुकम्

राज यथ रुचित भवते (इति वलभीम रुह्य प थानमवलोक्य च) सार्वभौम क एष भगवन्निर्माल्यमालामादाय त्वरमाणस्तैर्थिकानामभि-मुख धावति

वभौम अय दामोदरो भगवच्चैतन्यस्य प्रियपार्षद भगवता अद्वै ादिप्रियसुहृदामागमन श्रुत्वा भगवत्प्रसादमालया पुरस्कृत्य तानेव समानेतुमय प्रेषित इव लक्ष्यते

राजा एवमस्ति कोऽपि तत्र भगवच्चैतन्यानुग्रहपात्रम्

सार्वभौम अथ किम् अन्यथा कथमेव स्यात् तदाज्ञापय गो पीनाथाचार्याह्व नाय तेनैव सर्वे रिचीयन्ते

(विश्यापटीक्षेपेण)

आचार्य एषोऽहमस्मि तदाज्ञ पयतु देव· किं विधेयमिति

राजा सार्वभौम आदिश

सार्वभौम भवतामी सर्वे परिचाय ते तदस्मानपि प्रत्येकं परिचाय्यन्ताम्

गोपीनाथाचार्य बा म् (इत्युपविशति नेप ये हरिसकीर्तनध्वनि)

सावभौम (आकर्ण्य)

सकीर्तनध्वनिरय पुरतो विभक्त-
शब्दार्थ एव समभू छ्रवणप्रमोदी
शब्दग्रहेण तदन तरमन्यरूपो
ल धार्थ एव पुनरन्यविधो बभूव ३२

राजा (निरू य) ईदृशं कीर्तनकै शलं ापि न ष्टम्

सार्वभौम इयमियं भगवच्चैतन्यसृष्टिः

राजा आचार्य यसौ भगव मालामयमर्पितवानय कः

गोपीनाथाचार्य कथयामि प्रत्येकम् अयमद्वैत अय नित्यान द·

सावभौम अय परिचीयते

राजा कथमसौ कतिचिज्जनै. सह पृथगायाति

सार्वभौम सर्वान्तत्व दन्यसङ्ग नेहते

गोपीनाथाचार्य अय श्रीवास अयमयं वक्रेश्वर अयमा चार्यरत्न अयमय विद्यानिधि

सार्वभौम बाल्ये मया दृष्टावेतौ

गोपीनाथाचार्य अय हरिदास. अयमय गदाधर अय मु रारि ₹मे श्रीवासस्य सहोदरा अय गङ्ग दास अय नृसिंहाचार्य· ₹मे चा ये नवद्वीपवासिन· एते ममाप्यपूर्वाः आज्ञा चेद्भवति तदा ज्ञात्वागच्छामि

राजा तथैव क्रियताम्

गोपीनाथाचार्य यथारुचित देव य (इति सत्वरं परिक्र य नेप थ्यस्थो भूत्वा रत पुन विश्य च) सार्वभौम एष आचार्यपुरन्दर. ए

हरिभट्टः एष राघव. एष नारायण एष कमलान द एष का शीश्वर· एष वासुदेवो मुकुन्दस्य ज्यायान् अय शिवान द एष च नारायणः एष वल्लभ. एष श्रीका त. किं बहुना सर्व एवामी श्रीचैतन्यपार्षदा नैकोऽप्यत्र तैर्थिकः

राजा कथममी जगन्नाथालय पृष्ठत. कृत्वा अग्रतश्चैतन्यकृ णाल यमेव प्रविशन्ति

सार्वभौम एष एव नैसर्गिकस्य प्रे णो महिमा

राजा (पुनरन्यतोऽवलोक्य) अये कथमय वाणानाथो रामान दा नुज. सत्वर· प्रचुरतरैर्महाप्रसादान्नादिभिरुपसरति

सार्वभौम हृदयज्ञोऽय श्रीचैतन्यभगवतः तदनुक्त एव महाप्र सादैरुपचरितुमेतानुपसर्पति

राज भट्टाचार्य मु डन चोपवासश्च सर्वतीर्थे वय विधि इति वचनमुल्लङ्घ्यामी अद्य महाप्रसादमुरीकरि यन्ति

सार्वभौम - भट्टारक स खल्वन्य पन्थाः सा तु भगवत· पारो क्षिकी ह्याज्ञा इयं तु साक्षात्कारिणी तत्रापि भगवता स्वहस्तेन प्र सार्द क्रियमाण जगन्नाथप्रस द न्नम् अत्र का विप्रतिपत्ति. तथाच

यदा यस्यानुगृह्णाति भगवानात्मभावित.
स जहाति मतिं लोके देवे च परिनिष्ठिताम् ३३ ति

अपि च तत्कर्म हरितोष यत् इत्युक्तेरस्य तोष एवैषामुद्देश्यो न तार्थयात्राफलम्

राजा एवमेव किंतु कथय रथयात्रा कदेति त्वदुपदिष्टो मन्त्र एव मे हृदि लग्न तदत्र निमिषमात्रोऽपि काल कल्पायत इव मे

सार्वभौम परश्व

राजा कः कोऽत्र भो. आहूयता परीक्षामहापात्रं काशीमिश्रश्च

(श्रुत्वा कञ्चित्प्रणम्य) देव यथ ज्ञापयसि (इति न क्रम्य त वादाय न विश्य च) देव सम्प्राप्तावेतौ

राज महापात्र जगन्नाथदेवस्य य त्राविधौ भगवच्चैतन्यहृदयज्ञे-नामुना काशीमिश्रेण यद्यद दिश्यते तदेव मदादेश इति ज्ञात्वा व्यवहर्तव्यम्

महापात्र यथाज्ञापयति देवः

राजा मिश्र त्वयापि भगवच्चैतन्यचित्तानुवृत्तिरहरहरेव कार्या

मिश्र मदीयमभीष्टमेवैतत्

राजा अपि च येऽमी याव तो गौडाः समायाता सन्ति तेषामपि यथा स्वाच्छ द्येन भगवद्दर्शन भवति तथा च विधेयम्

उभौ यथाज्ञा देवस्य (इति नि क्रा तौ)

राजा भट्टाचार्य उपसृत्य विलोकयेदमन्योन्यसभाषणकौतूह-लम् सति तादृशेऽधिकारे मयेव तादृशपरमान दभोगाद्वञ्चितेन कथं भवितव्यम् अहमपि भवि यद्रथविजयकायाकार्यपरिकलनायावहितो भ वामि (इति निष्क्रा त)

सार्वभौम ममाभी मेव नरपतिरादिष्टवान् तदधुना तथैव करोमि (इति गोपीनाथाचार्येण कतिचित्पद नि गत्वा) अहो पुरत

आन दहुकारगभीरघोषो हर्षानिलोल्ल सितता डवोर्मि
लावण्यवाही हरिभक्तिसि धुश्चल. स्थिर सिन्धुमध. करोति ३४

तदुपसर्पावः (इत्युपसर्पत)

(तत प्रविशन्ति उक्तप्रकारा सवे अद्वैतप्रमुखा)

अद्वैत (पुरोऽवलोक्य) दामोदर पुनर्माला तर गृहीत्वा को ऽयमायाति

दामोदर अय भगवत्पार्श्ववर्ती गोवि द (प्रविश्य सत्वर गोविन्दो मालामपयति)

अद्वैत (सादरं गृह्णाति)

दामोदर इदमिद काशीमिश्राश्रमपद तत्प्रविशन्तु (अद्वैतादय प्रवेश नाटयन्ति)

सार्वभौम अहो आश्चर्यम्

युगान्तेऽन्त कुक्षेरिव परिसरे पल्लवलघो
रमी सर्वे ब्र ाण्डकसमुदयादेव वपुष
यथास्थान ल धावसरमिह मान्ति स्म शतशः
सहस्र लोकाना बत लघुनि मिश्राश्रमपदे २५

(पुरो वलोक्य) अये अयमसौ

अद्वैते दोरुदयजनितोल्लाससीमातिशायी
श्रीचैतन्यामृतजलनिधी रिङ्गतीवोत्तरङ्ग·
पूर्णान दोऽप्ययमविकृत· शश्वदुच्चैरख ७·
खण्डान दैरपि कथमहो भूयसां पुष्टिमेति ३६

(तत प्रविशति यथानिर्दिष्ट श्रीचैतन्य पुरीश्वरस्वरूप दयश्च)

श्रीकृष्णचैतन्य (उपसृत्य नित्यान द प्रणम्याद्वैत परिष्वजते)

अद्वैत (प्रतिपार वजते)

सार्वभौम (निरूप्य)

प्रेमारण्यकरी द्वयोरिव मिथः प्रेम्णा मदोत्सिक्तयो-
रन्योन्य करघट्टनाचटुलयोस्तारस्वरं गर्जतो·
अन्योन्य गलदश्रुदानपयसा ससिक्तयोरेतयो
रन्योन्य परिर भ एष जयतादद्वै चैतन्ययोः २७

सर्वे इतस्ततो भुवि दण्डवन्नमन्ति

भगवान् (सवानेवालिङ्गनसभाषणदर्शनादिभिरनुगृह्णाति)

अद्वैत (अदृष्टपूर्वान् परिचाययति)

श्रीकृष्णचैतन्य (अदृष्टपूवानपि तान्स्वयमेव नामग्राह सबोधयति)

गोपीनाथ चार्य अहो अतिचित्रम्

क्षेम ते राघव ननु शिव वासुदेव प्रिय ते
हहो नारायण ननु शिवान द कल्याणमास्से
भव्य हे शकर नु कमलानन्दकाशीश्वरौ वा
भद्र श्रीका त तव कुशल स्वस्ति न रायणस्य ३८

अपिच

इति प्रियोक्त्या मधुरार्द्रया शनैरदृष्टपूर्वानपि दृष्टवत्प्रभु.
सबोधयत्येष किमीशताथवा प्रेमैव वा प्र क्तन एष सर्ववित् ३९

श्रीकृष्णचैतन्य

अद्याय मे समजनि महानुत्सव श्वः परश्वो
वान्यो नालाचलशशधरस्योत्सवो गुण्ि्च ख्य·
तुल्यौ यद्यप्यहह हृदयान दनिस्य दहेतू
यत्र द्वैतप्रकटनमसावुत्सवो मे प्रमोद· ४०

(इति प्रत्येकमद्वैतादी भगवज्जगन्नाथप्रस दमालाचन्दनाभ्या भूषयित्व श्रीहस्तेन प्र ादनं कंचित्किंचिद्दाात

सार्वभौम न मयेदानीमुपसर्तव्यम् मामवलोक्य रसा तरं भवितुमर्हति गतप्र यमेवैतद्दिनद्वय यात्राया. सामग्रीसमवधानाय राज्ञा नि युक्तोऽस्मि तदधुना तत्रैव गच्छामि आचार्य त्वमत्रैव ति (इात निष्का त)

गोपीनाथाचार्य (उपसृत्य) जयति जयति महाप्रभु.

श्रीकृष्णचैतन्य कथमाचार्योऽसि एहि प्रणमाद्वैतम्

गोपीनाथाचार्य. (तथा करोति)

अद्वैत (आलिङ्ग्य) जानामि भव त विशारदस्य जामातरम्

श्रीकृ णचैतन्य स्वत एव महत्तरोऽयम्

आचार्य वाणीनाथेन सह युक्त्या सर्वेषामवस्थ न कल्प्यताम्

गोपीनाथाचार्य यथाज्ञापयति भग ान् (इति नि ान्त)

श्री णचैतन्य वासुदेव यद्यपि मुकुन्दो मे प्राक्सहचरस्तथापि त्वमद्य दृष्टोऽ यतिप्राक्प्रियतमोऽसि

वासुदेव (सदैन्यम्) भगवन् ाह वराको कुन्दस्तु तव नु गृहीत एव चिर तेन ईश्वरानुग्रहकालस्य ज मतया कनीयानप्यसौ मम ज्यायानेव

श्रीकृष्णचैतन्य शिवान द त्वमप्यतीव मय्यनुरक्तोऽसीति जानामि

शिवानन्द

निमज्जतोऽन तभवार्णवा तश्चिराय मे कूलमिवासि ल ध.
त्वयापि ल धं भगवन्निदानीमनुत्तम पात्रमिद दयाया· ४१

(इति भूमौ निपतति)

श्रीकृष्णचैत य राघव त्वमतिप्रेमपात्रमसि मे

राघव (अनुत्तरेणैव त्युत्तरय प्रणिपतति)

श्रीकृष्णचैत य स्वरूप यद्यप्यय शकरो दामोदरानुजस्तथापि मे

(इत्यधे के दामोदर निरीक्षते)

दामोदर नाथ ममेदमतिसौभा यमेतत् अय समा यता वा क्शेषः

श्रीकृष्णचैतन्य दामोदरे सादरः स्नेह. अत्र तु निरवकरम्

प्रेमभक्ति तदयमत्रैव भवत्समीपे ति तु गोवि द त्वयाप्यानु कूल्य विधेयम्

उभौ—यथाज्ञापयति दव· (प्रविश्य सत्वरम्)

गोपीनाथ चार्य स्वामिन् यथाज्ञमेव सर्व सुसप दितम् विशे षतो गदाधरस्य ममेश्वरस्य समीपे समीचीनमेव स्थल सार्वकालिकं जातमस्ति

श्रीकृष्णचैतन्य अद्वैत अय द्वितीयो मुनीन्द्र इव पुरीश्वर· य किल तव गुरो प्रियशिष्य तदेन प्रणम

अद्वैत (तथा करोति सव तथैव प्रणमन्ति)

श्रीकृष्णचैतन्य आचार्याद्वैत अयमय स्वरूप स्वरूपमस्यास्तीति निरुक्तेरविकृत एवाय मम हृदयमेवायमिति जानीया.

अद्वैत एवमेव (इति प्रणमति सर्वे प्रणमन्ति)

गोपीनाथाचार्य भगवन्नाज्ञाप्यताममीषा विश्रामाय

श्रीकृष्णचैतन्य आचार्य स्वयमेवोच्यता याहीति मया कथ वक्तव्यम्

अद्वैतादय (इङ्गित ङ्का निष्का ता)

श्रीकृष्णचैतन्य स्वामिन् पुरीश्वर प्रणयिन् स्वरूप अद्याह पूर्णोऽस्मि

स्वरूप स्वामिन्

ईश्वरो येन पूर्णोऽपि पार्षदैरेव पूर्यते
पूर्णोऽपि रजनीनाथो रिक्त एवाशुभिर्विना ४२

तदागच्छ तु सायाह्नो जात भव तम तरेण पुराश्वरोऽ यकृत भिक्ष एव

श्रीं चैतन्य एवमेव (इति निष्क ता)

(नेप य)

शतधृतिरपि धृतिहीनः सहस्रनयनोऽपि परमा ध
नीलगिरी टुस्य दनयात्र सदर्शनौत्क ठ्यात् ४३

गोपीनाथ चार्य (आकण्य) अहो मुहूर्तमिव गत दिनद्वयम् यदय रथय त्राप्रसङ्गो भट्टाचायेण प्रस्तूयते तन्निभालयामि (इति कियद्दूरं गत्वा) अहो चित्रम्

मूर्तस्त्रय इव वेदा· शभोस्त्रीणीव नयनानि
तिस्र इवामरसरितो धारा· पुरतो रथत्रयी स्फुरति ४

(पुनर्नेपथ्ये)

आयातोऽद्य रथोत्सवस्य दिवसो देवस्य नीलाचला
धीशस्याद्य पुरो नटि यति निजानन्देन गौरो हरि·
विश्रान्ति नटनावसानसमये कर्तोद्य जातावने
ह ताद्यैव मनोरथः सफलता य स्यत्यय मादृश ४५

गोपीनाथ चार्य अहो गजपतेर्महाराजस्यालाप इव श्रूयते तद वधातव्यमवश्यमिदम् (इति निरूप्य) सत्यमे ाय भ ाचार्येण सह

संकथयन्नुत्कण्ठते महाराज पश्यामि को विल बो जगन्नाथरथारोहणस्य
(इति पश्यति नेपथ्ये काहलादिनिर्घोष)

गोपीनाथाचार्य (निरूप्य) अहो
दयमिव मह समाधिभाजामुदयगिरेरिव शीर्षमुष्णरश्मि·
अयमखिलदृशा रस यनश्री रथमधिरोहति नीलशैलनाथ ४६

(पुनानरू य)

अद्वैताद्यैरखिलसुहृदा म डलैर्म ड्यमानो
गायद्भिस्तै कतिभिरपरैः श्रीस्वरूपप्रध नै
श्रीमद्भक्तेश्वरमुखसुख विष्टभूयिष्ठब धु·
सिन्धुः प्रे णामयमिह नरीनर्ति गौरो यतीन्द्र ४७

(नेपथ्य क कल)

गोपीनाथाचार्य (सहर्षम्)
गौडाख्यैरथ कर्षिभिर्जनचयैरादाय वामे करे
हेलोल्लासितपीनर ुपटलीसंकर्षणव्याजतः
स्थायंस्थायमहो क्वचिद्ब्रुततर धावत्यम द चि
द्भावंधावमहो स्थित स्थिरतर स्वेच्छावशः स्य दनः ४८

(पुननपथ्य सकीर्तनकोलाहल)

गोपीनाथाचार्य (आलोक्य सकौतुकम्)
प्रचलति जगन्नाथे गौरोऽपसर्पति समुखा
स्थितवति जगन्नाथे गौर प्रसर्पति तत्पुर
अतिकुतुकिन वेवं देवौ परस्परमुत्सुकौ
कलयत इव क्रीडा नीलाचले द्रमुनीश्वरौ ४९

(पुनर्निभाल्य) अहो
स्थितवति बलग डीम डपस्योपक ठ
भगवति जगदीशे शान्तनृत्यो यता द्रः
उपवनमनुगच्छ पार्षदै· प्रेमवद्भि
सह जयति नितान्तश्रान्तितो विश्रम य ५

तदधुना नरपतिनापि गूढवेषेण तत्राभिसर्तव्यमिति भट्टाचार्यस्येङ्गि तेन ज्ञातमस्ति तदहमपि सत्वरमुपसर्पामि (इत्युपसपति)

(तत प्रविशति नृत्यान दानुभवनिस्प दो निमीलितनयनो नयनाभिराम उपवनम ड-पम ्य स्य सार्यमाणलोलचरणकम नालद ्युगलो ग ल्लोचनजलधौतवक्षा साक्षादिव प्रेम न ्द श्रीकृ णचैतन्य प्रतितरुमूलमेकैकमुपवि ास्तृ णीका पाषदाश्च)

भगवान्

अथात आन ददुघ पदा बुजं हसा. श्रयेरन्नरवि दलोचन

(इति श्लोकार्धमेव भूयो भूय प्रमालितनयन एव पठति)

गोपीनाथाचार्य (आलोक्य) अहो प्रेमानन्दास्वादमहिमा देवस्य अनुभूतस्य नृत्यकालीनभगवत्कृ णसाक्षात्कारान दस्य ब्रह्मानन्दतोऽपि चमत्कारकारणत्वं चर्वणयास्वादयति अथेति उच्चावचशास्त्रसकलप्रति पाद्यावबोधपारसमाप्तौ अत इति ब्रह्मान दादपि चमत्कारकारकत्वात् हसा सारासारविवेचनचतुरा पादा बुज श्रयेरन् कुत आन ददुघ मिति स्वानुभूतान दमाहात्म्यसूचनमिदम् (परितोऽवलोक्य) अहो ्त एव सवे परमभागवता. तथाहि

नि.स्प दमु वलरुचः सुशिखा· सुपूर्ण-
स्नेहास्तम.क्षयकृत प्रतिशाखिमूलम्
आभान्ति शोभनदशास्त इमे महा तो
निर्वातमङ्गलमहोत्सवदीपकल्पा· ५१

भवतु अत्रैव क्वापि निभृतमुपविश्य राज्ञ· प्रवेशं प्रतिपालयामि (इति तथा करोति)

(तत प्रविशति त्यक्तराजवेश परिहितधौतवसनयुग ो राजा)

राजा (सोत्कण्ठम्)

उत्क ठा भयतर्कयोर्बलवतोराच्छादन कुर्वती
मामुच्चैस्तरलीकरोति चरणौ हा धिक् कथ स्तम्भित. ( )
हहो देव पराक्षयाद्य भवत· प्राय. पराक्षा मम
प्राणानामपि भाविनी नहि मम प्राणेषु कोऽपि ग्रह: ५२

(इति शनै नै परिक्रामति)

गोपीनाथाचार्य (राजान निर्व य) अहो चित्रम्

प्रभावम त्रैकनृदेवचिह्नो वीरो रसः सुप्त इवायमग्रे
आन दश ाभयतर्कमिश्रः कृ छ्रेण विन्यस्यति पादपद्मम् ५३

(पारत सवे आत्मगतम्) अहो मङ्गलसूत्रमुद्रितकरोऽय राजा प्रताप रुद्रः कथमय गृहीततपस्विवेषोऽकस्मादुपसर्पति स्वामिनामुद्वेगो भावी तदवलोकयाम किमय करोतीति

राजा (शनैरितस्ततो वलोकय सहसैवोपसृत्य दोलायमान भगवच्चरणकमल-युगं पारघदीर्घा-या दोर्भ्यां दृढतरमालङ्गति)

सर्वे (ालोक्य) अहो महानयमनर्थ· निमीलितनयनकमलेन स्वान दावेशविवशेन भगवतायमलक्षित एव यद्भगव रणौ दधार तदस्य न विद्म किं भावि

भगवान् (स्वान दस्थ एव निमीलिताक्ष एव निभालनेनैव गाढ पार वज्य)

को नु राजन्निन्द्रियवा मुकु दचरणा बुजम्
न भजेत्सर्वतोमृत्युरुपास्यममरोत्तमैः ५४

(इति पुन पुन प ति)

गोपीनाथाचार्य अहो कौतुकम्

साहस क्व च गुणाय कल्पते क्वापि दूषणतया च सिद्ध्यति
साहसेन यदकारि भूभुजा तत्तपोभिरखिलैश्च ना यते ५५

(पुननिभाल्य)

महामल्लैर्यस्य प्रकटभुजवक्ष·स्थलतटी
विनि पेषोद्भ्राम्यिभिरिव विदध्रे विकलता
स एवाय माद्यत्करिवरकराक्र तकदली
तरु भाकारो भवति भगवद्बाहुदलित ५६

(नेप ये क क)

भगवान् (राजान पारष्वल्य तत्कलकलाकालतरथप्रस्थानसत्वर पुनजगन्नाथदि दृक्षया तथाविधस नन्दस्थ एव निष्क्रामति)

सर्वे (यथाय तम निष्क्रामन्ति)

गोपीनाथाचार्य (उपसृत्य) महाराज जगन्नाथदर्शनार्थं गतो देवः संप्रति भवन्तोऽपि चलितुमर्हन्ति (इत्यान दतन्द्रितं राजानमादाय निष्क्रा त) (इति नि ा ता सर्वे)

प्रतापरुद्रा ग्रहो नामाष्टमोऽङ्क

नवमो ङ्क

(तत प्रविशति किंनरामथुनम्)

पुरुष प्रिये गतागतेभ्योऽपि संवत्सरेभ्य· खलु जगन्नाथस्य गुण्डि चोत्सव परमरमणीयो

स्त्री कथंविअ (क)

रुष असि न दे तु मूर्तिमतान देनैव कनकगिरिगौरेण यती द्रवेष ध रिणा भक्तावतारेण श्रीकृ णचैतन्येन महोत्सवोऽय सुरसत्वेन परम रमणीयो विहित

ी हद्धी हद्धी अह कध सङ्केण णीदा मए दट्ठु ण पारिद ( )

पुरुष प्रिये अ गामिन्य दे दर्शनी ो भवत्या

स्त्री आआमिणि अद्दे जइ एव होइ (ग)

पुरु इत प्रभृति तेनात्रैव स्था व्यम्

ी एत्थ को णिअमो (घ)

पुरुष जानामि तत्त्वम्

ी कध जाणीद (ङ)

पुरुष परस्पर कथयता तज्जनाना तज्जनान श्चितचरित्रविदां कथयैव

(क) कथमिव

( ) ह धिक् हा धिक् अहं कथ सङ्केन नीत मया द्र ं न प्र म्

(ग) आग मिन्यब्दे वेव भवति

(घ) अत्र ो नियमः

( ) ज्ञातम्

स्त्री केरिसी सा कहा ( )

पुरुष प्रिये श्रूयताम् अस्य त्रिविध एव लोकानुग्रहप्रकार

स्त्री केरिसो तिण्णविहो (ख)

पुरुष एकः साक्षत्कारी द्वितीय परहृदयप्रवेशलक्षण तृती यश्चिन्तनमात्राविर्भावरूप

स्त्री विवेइअ कहेहि (ग)

पुरुष ये खलु पुरुषोत्तमक्षेत्रागमनसमर्थास्तेषां साक्षात्कारी तथा हि प्रतिसवत्सर सरहसो नानादेशत सर्वे जगन्नाथदर्शनतोऽपि तद्दर्श नबद्धोत्क ठा अदृष्टपूर्वा अश्रतपूर्वा पर'सहस्राः प्राणिन उपति न्ति

स्त्री तदो तदो (घ)

पुरु ततस्तेषु गौडीया प्रिया गौडीयाना मध्ये येऽतिप्रिया. शतशो दृष्टव तस्तेऽपि शुभादृष्टव तो यथामी

नरहरिरघुनन्दनप्रधानाः कतिचन खण्डभुवोऽ यख डभा या
प्रथममिममन्दृष्टवन्त एते प्रतिशरदं पुरुषोत्तम लभ ते १

कुलीनग्र माणा अपि च गुणराजान्वयभुवो
जना रामानन्दप्रभृतय इमे देवसुहृद'
तथा न्याय चार्यादय उपचितप्रेमसरसा
महाविद्वासोऽमी प्रतिशरदमात्रोपगमिन' २

भगवन्नाम न्यायाचार्यस्तु पुरुषोत्तम एव भगवच्चैतन्यदर्शनाकाङ्क्षी यावज्जीव स्थित' एवमेषां साक्षादनुग्रह' आगमनासमर्थाना तु परहृद यमारुह्यानुग्रह क्रियते हृदयारोहयो यास्त्वद्वैतनकुलब्रह्मचार्यादय

स्त्री किंचि कधेहि (ङ)

(क) कीदृशी स कथा
(ख) कीदृशस्त्रिविध
(ग) विवृत्य कथय
(घ) ततस्तत.
( ) किंचित्कथय

रुष अद्वैतारोहवार्ता तु प्रथीयसी तत्कथन बहुकालसाध्यम् नकुलब्रह्मचारिहृदयारोहः श्रयताम्

स्त्री कथेहि अवहिदस्मि (क)

रुष अस्ति कश्चिदम्बुग्रामे परमवै णव आज मब्रह्मचारी नकुलो न म तस्यैकस्मिन्दिवसे ग्रहग्रस्तस्येव कस्यामपि दशायामुत्प ायामान दास्रपुलकनिर्भरस्य दर्शनमात्रेणैव सर्वेषां हृदयकुहरे श्रीचैतन्यावेशोऽयमस्य जात इति प्रत्ययमुत्पादयत एव कतिचिदहोरात्रा गता

ी तदो तदो ( )

पुरुष तदनु

गौरत्विषा कपिशय ककुभ सम ता
दानन्दभोगपरिलोपितबाह्यवृत्ति·
आबालवृद्धतरुणैरथ लक्षसख्यै
र्लोकैरभूत्प्रणयिभि. परिपूज्यमान ३

ी तदो तदो (ग)

रुष ततो दैवात्तस्मि काले तत्रागतेन भगव ैतन्यपार्षदेन शिवा न देन तमुद तमत्य तसदिह्यमानतयात्यदिदृक्षुणा मनसि कृतम् अहो किमेतस्य दर्शनेन साक्षादेव मया दृष्टोऽस्ति भगवान् तदालोकसुखस दृशं किमस्य दर्शनेन भविष्यति सुखम् नैव ₹ति निवर्तमानेन पुनर्मनसि कृतम् अहो यद्यय सर्वलोकबहिर्वर्तमान मा स्वयमेवाहूय स्वसमीप नीत्वा मामकमि मन्त्र प्रख्यापयति तदा सत्यमेवात्र तस्यावेशो जात· इति चि तयित्वा प्रसारिणो जनसमूहस्य बहि· स्थितवति शिवानन्दे यावदावेश तूष्णीं स्थितोऽ यसौ कः कोऽत्र भो. दूरे वर्तमान· शिवानन्द अ ह्वयताम्· इति निदेशमात्रेण धावद्भिरेव कतिभिरितस्ततो नामग्राह विचि वद्भिरति

(क) कथय अवहितास्मि
( ) ततस्तत
(ग) तस्तत.

दूरे स्थित तमादाय तन्निकटमाययौ अन तर च तेन शिवानन्द भवता मनसि विचारितं यत् तदाकर्ण्यता भवदीय इ मन्त्रश्चतुरक्षरो गौरगो पालदेवताकः इत्याकलय्य तेन निर्णीत सत्यैवेय प्रथेति

स्त्री अज्जउत्त तात्तओ केरिसो (क)

पुरुष तृतीयस्तु चि तनमात्राविर्भावो य सोऽपि यूताम् एकदा तस्यैव शिवान दस्य भागिनेय श्रीकान्त एकक एव प्रथम श्रीपुरुषोत्तम मागत्य भगवच्चैतन्यचरणौ ददर्श असिन्नेव समये कौतुकवशात्पुराश्वर स्वरूपादिसमक्ष भगवता किंचिज्जगदे जगदेकब धुना श्रीका त अस्मि न्न देऽद्वैतादयो दयोद्धुरा वक्तव्यास्ते यथा नायान्ति मयैव तत्र गन्तव्यम् इति अपि च शिवान दोऽपि भगवन्मातुलो वक्तव्य पौषे मासि तत्रोप सन्नेन मया भवितव्यम् तत्र जगदान दोऽस्ति तत्रैव भिक्षा कर्तव्या इति निवृत्तेन श्रीका तेन भगवत्संदेशे कथिते सति सर्वेऽद्वैतादयश्चलनोद्यमाच्छि थिलीबभूवुः शिवान दस्तु भगवदागमनमभिलिलशिषुर्भगवद्भिक्ष यामिदं लगिष्यतीति कृत्वा भगवत्प्रियत्वेन वास्तूकवास्तुकदलीगर्भोत्थाकनिशादि सामग्रीसमवधान य स्थितवान्

स्त्री तदो तदो ( )

पुरुष ततो दैवाद्गोदावरीत समायातेन रामान दरायेणोपबोधितो भगवान् न गन्तुमीष्टे

स्त्री तदो तदो (ग)

पुरुष ततोऽसौ शिवानन्द श्रीनृसिंहानन्दब्र चाराति प्रथित परम योगी द्र साक्षान्नृसिंहमिव प्रद्युम्नब्रह्मचारित्वेन पूर्वख्याताविप भगवतैव नृसिंहोपासनासिद्धत्वेन नृसिंहान द इति कारितसज्ञ समये समुवाच स्वामिन् आयास्यामि' इति कृत्वा भगवान्नायात' वास्तूकशाकमवलोक्य मनोदु खमेव जायते

(क) अ र्यपुत्र तृतीयः कीदृश.

( ) ततस्ततः

(ग) त स्ततः

स्त्री तदो तदो (क)

पुरुष ततस्तेनोक्तम् मयैवानेतव्यो दिनद्वयमपेक्षतामिति तत्प्रभा वज्ञोऽसौ तथैव श्रद्दधे स च नृसिंहान दो नृसिंहानन्दोऽपि त समयमारभ्य समाधिस्थौ दिनद्वया तरे शिवानन्दमाहूय अये भगवच्चैतन्यो राघवालये समानीतोऽस्ति प्रातरत्रागमिष्यति मयैव पक्तव्य भिक्षा च दातव्या इति श्रुत्वा तस्मिन्नपि तथोद्यक्ते सति स्वयमुषसि कृतस्नान. शुचितरो भूत्वा पाके प्रवृत्त. स्वेच्छापूर्वं यथेष्टमेव पाचितवान् अनन्तर तस्मिन्नेव समये श्रीचैतन्यस्य जगन्नाथस्य नृसिंहस्य च पृथक् त्रयो भोगा विभज्य निष्पादिता अनन्तर तत्तन्नाम्ना समर्प्य बहिर्भूय निमीलितचक्षुरान्तरेण चक्षुषा पश्यति त्रीनेव भोगानेक एव भगवा भुङ्क्ते अनन्तर संजातमहान दो गलदश्रुधारः सारवमुच्चै. प्रणयामर्ष ताक्षेपमि भद्र भो भद्र जगन्नाथेन सह तवैक्यमतो जगन्नाथस्य भोगो भुज्यता नाम मम नृसिंहस्य भोग कथ भुज्यते नृसिंहोऽद्य मयायमुपोषित इत्युच्चैराक्रन्दञ्शिवानन्देनोक्तम् स्वामिन् कथमाकुश्यते इति

ी तदो तदो (ख)

पुरुष ततस्तेनोक्तम् तव गोस्वामिना चैतन्येन भोगत्रयमेव भुक्त नृसिंहस्योपवासो जातः इति

स्त्री तदो तदो (ग)

रुष ततः शिवान देनोक्तम् स्वामिन् नृसिंहार्थमन्या भोगसाम ग्री कर्तव्येति तथाकृते स्वस्थो बभूवेति स्थिते शिवानन्दस्य संशयो जात किमनेनावेशवशादेवोक्तमथवा सत्यमेव ति मनसि कृत्वा पुनरन्य स्मिन्सवत्सरे पुरुषोत्तममासाद्य भगवच्चैतन्यसविधे गत प्रसङ्गतो नृसिंहा नन्दस्य त महिमकथनेऽवा तरभूता पाकक्रिया तस्यातिसमीचीनेत्यपि वदति भगवति सर्वेषु सदिहानेषु मया गते संवत्सरे पौषे म सि तस्य भिक्षा कृता

(क) ततस्ततः

( ) ततस्ततः

(ग) ततस्ततः

तत्र तस्य पाककौशल ज्ञातमित्युक्ते पुनः सर्वे सदि धा एव स्थिताः शिवा नन्दस्तु नि'सदेहो बभूवेति व्याख्यातस्ते त्रिविधोऽनुग्रहप्रकार·

स्त्री अच्चरिअं अच्चरिअ ता एद पि कधेहि रामाणन्देण कह तत्थ ग दु णिसेहो किदो (क)

पुरुष प्रिये स तावद्भगवतोऽतिप्रणयी तद्विच्छेद न सहते तेन तदुपरोधा मथुरा जिगमिषुरपि वर्षद्वयमद्य श्व इति कृत्वा विलम्बितो भगवान्

स्त्री अदो वर एत्थज्जेव वट्टिस्सदि अहवा महुरा गमिस्सदि (ख)

पुरुष प्रिये अधुना तु चिरमनुनीय तमेव राम नन्द तेन नुमत गौडवर्त्मन्येव ग तुमुद्यतोऽस्ति

स्त्री अज्जउत्त पुणो एत्थ आअमिस्सदि (ग)

पुरुष अथ किम्

स्त्री एत्थ अत्थि सदेहो जदो महुरा क्खु एदस्स पिअट्ठाण (घ)

पुरुष —यद्यप्येवं तथापि

आपामर प्राणिन उद्दिधीर्षोर्नीलाचले दोरतिभारमेतम्
लघूकरिष्यन्पुरुषोत्तमस्थो भूयोऽपि भावा पुरुषोत्तमोऽयम् ४

स्त्री आ होइ एव होइ (ङ)

(नेपथ्ये)

(भट्टाचार्य कथ रामानन्देनास्मि कर्मणि कृतानुमति)

पुरुष प्रिये श्रुतमिद यदभिहित मया तदेवाधुना तद्विच्छेदविधुरो गजपतिरपि सार्वभौमेन सह संकथयन्नास्ते तदावामपि भगवन्त नीलाचल चन्द्रं गानेनोपस्थातु गच्छाव (इति नि क्रा तौ)

(क) आश्चर्यमाश्चर्यम् तदिदमपि कथय राम न देन कथ तत्र गन्तु निषेधः कृतः

(ख) अतः परमत्रैव स्थास्यति अथव मथुरा गमि यति

(ग) आर्यपुत्र पुनरत्रागमिष्यति

(घ) अत्रास्ति सदेह· यतो मथुर खल्वस्य प्रियस्थानम्

(ङ) आ भवति एवं भवति

(प्रवेशक.)

(तत प्रविश्यासनस्थो राजा सार्वभौमश्च)

राजा भट्टाचार्य र मानन्दस्याग्रहपाशग्रन्थिशैथिल्येनैव भगवा ग्रथितः

सार्वभौम ईश्वरेण सार्धं किमधिको हठ कर्तुं शक्यते तथापि वर्षद्वयमेव विलम्बित.

राजा भट्टाचार्य रामान देन मे महानेवोपकारः कृत तथाहि

आनीतो राजधान्या· पथि पुरुकरुण कारितं चेक्षण मे
स्पर्शं· पादा बुजस्य व्यधित मम दुरापोऽपि सम्यक्सुखाप·
वाक्पीयूष च सानुग्रहमतिमधुर पायित श्रोत्रपेयं
यन्न मूर्द्धूरियलैस्तदजनि सहसा शून्यमन्तस्तथापि ५

सार्वभौम महाराज रामानन्दो हि भागवतोत्तम एव तथा हि

प्रणयरशनया धृताङ्घ्रिपद्मः स भवति भागवतप्रधान उक्त.

तेनास्य भगवा वश एव अतस्तदुपरोधेन भगवता त्व येतादृशोऽनु ग्रह· कृत

राजा रामान देन कियद्दूरमनुव्रजितव्यम्

भट्टाचार्य भद्रकपर्यन्तमिति श्रुतम्

राजा स्वामिन सङ्गे कियन्तश्चलिता·

सार्वभौम पुराश्चरदामोदरजगदानन्दगोपीनाथगोविन्दाद्या प षा एव

राजा हन्त

यदपि जगदधीशो नालशैलस्य नाथ.
प्रकटपरमतेजा भाति सिंहासनस्थ
तदपि च भगवच्छ्रीकृ णचैतन्यदेवे
चलति पुनरुदीचीं ह त शून्या त्रिलोकी ६

सार्वभौम राजन् निरुपधिप्रेम्णो ह्रीदृशः प्रकाशः

राजा असदीय· कोऽपि न गतः प्रभोरनुपदम्

सार्वभौम राजन् प्रेम्णैवेदमुच्यते तस्य त्वदीयजनापेक्षा तथापि तवाधिकार यावत् तव लेखमाद य पूर्वमेव कश्चिद्गतोऽस्ति करि यति च स एव सर्वसमाधानम्

प्रतिवसति नवाना वासमग्रे विधाय
प्रतिगृहमुपचारैर्भूरिभिः पूरयित्वा
कृतसुरचनमुच्चैस्तत्र तत्राभियुक्तैः
पदविहरणखेद धु वते ते विश त
भगवास्तु रामानन्दस्य कृतिरियमित्येव जानाति

(प्रविश्य)

दौवारिक देव रामान दादयो द्वारमधितिष्ठन्ति

राजा त्वरितमानीयताम्

दौवारिक—यथाज्ञापयति

(इति निष्क्रम्य तानादाय प्रविशति)

राजा (सादरमुपवेश्य) कथय कियद्दूर भवाननुगतो देवम्

रामानन्द इत इतो निवर्तस्वेति प्रतिपदमुक्तोऽपि भद्रकपर्यन्तमनु गतवानस्मि महाराज दुस्त्यजो हि व्यवहारमार्ग यत

तमपि परमदीनोद्धारिकारुण्यसि धु
शिव शिव परिहाय वद्धियैव गतो हम्
कथमहह न जातस्तत्र मे देहपात
कुलिशकठिनमूर्तेर्हा यतोऽह निवृत्त ८

(इत्यश्रूणि मु ति)

सार्वभौम रामान द त्वमतिधीरोऽसि कथमेवमुत्ताम्यसि इश्वरो हि तथाविधलील एव व्रजवासिनो विहाय मथुरा गतः पुनस्ततोऽपि द्वारवत्या पुनस्ततोऽपि चित्कचित् तत्रत्या· कथ सहन्तिस्म तद्विरहम् यद्यपि दुःसह एव भगवद्विरहस्तथापि स एव त साह्यते तदलमनुशोचनेन राजानमधुना सान्त्वयितुमर्हसि न पुन स्वखेदप्रकटनेन खेदयितुम्

राजा कथय

रामानन्द भवदधिकार यावद्भवदीया एव गच्छन्ति तदूध्व मदीयाः पथि प्रज्ञा एव गौडराष्ट्र यावद्यास्यन्ति केचित्तेषा कियद्दूरत एवागमिष्यन्ति केचि दूरतर यास्यन्ति

(विश्य)

दौवारिक देव महाप्रभुमनुव्रजन्तो ये रायस्य मनुजाश्चलिता सन्ति तेषा किमन्त समायाता

राजा प्रवेश्यन्तामविचारेणैव

दौवारिक (तथा करोति)

(प्रविश्य)

पुरुष जयति देव

रामानन्द कथयत रे कियद्दूर भगवन्तो गता

पुरुष कुलियाग्राम यावत्

राजा (सावभौममु ' निरीक्षते)

सार्वभौम देव नवद्वीपपारे पारेग कश्चन तन्नामा ग्रामोऽस्ति

राजा आमूल कथय

पुरुष देव इतो देवाधिकार यावत्तावत्तव प्रभावेनैव निर्वाहितवर्त्म ौकर्या अचङ्क्रमणेनैव सर्वे गतवन्त गौडसीम्नि प्रवेष्ट त्रय पन्थान द्वय रुद्ध एकस्तु जलदुर्गः तमेवोद्दिश्य चलिते सति तत्सीमाधिक रा तुरुष्कोऽरुष्कोषकार इव सर्वेषां मर्महा महामद्यपो दुर्वृत्तचक्रचूडामणिः इतो देशाद्ये गच्छन्ति तेषा दुर्गति क्रियते इति ुत्वा सवेषामेव भयमुत्पन्नम् मह प्रभवे कोऽपि न श्रावयति अस्मत्सीमाधिकारिणोक्तम् अत्र किया न्विलम्ब क्रियतां याव मयानेन सधि संधीयते इत्येतावत्कथनसमकालमेव तस्यैव कश्चिदस्मत्सीमाधिकारिणः समीपमागत

राजा ततस्तत

पुरु आगत्य कथितम् यदि त्वमनुमन्यसे तदा भवद्देश दाग च्छन्तं श्रीकृष्णचैतन्यदेवमह विलोकये

राजा ततस्तत

पुरुष. ततोऽने नोक्तम् त्रिचतुरैश्चेदायाति तदायातु नामेति त्वा थैवागतो भगवत्पादसमीपभूमौ निपतितश्चिर प्रणनाम तत सर्वैरु क्तम् भगवन् अस्य साहाय्येनैव सुखेन गन्तु शक्यते एन प्रति कृपा वलोक क्रियताम् इति तदनुरोधेन त प्रति कृ दृक्पाते भगवति स यवन पुलकाश्रुगद्गदस्वरो भवन् ग्रहग्रस्त इव जात ततो गोपीनाथाचार्येणो क्तम् अये महाप्रभुरय सुखेन कथ चलति

राजा ततस्ततः

पुरुष ततस्तेनोक्त कियद्दूर भवद्भिर्ग तव्यम् तदनु गोपीनाथेनो क्तम् ग तव्य तावत्पाणीयहाटीपर्यन्तमिदानीम्

राजा ततस्तत·

पुरुष तत.

प्रफुल्लरोमा गलद ुधर सगद्गद किंचिदसौ जगाद

अहो मदीय महदेव भाग्य देवस्य साहा यविधौ भवेयम् ९ इति सक स ननाविकैर्वाद्यमाना नवीना तरणिर्मध्यगृहशालिनी पुन प्रक्षा लिता क्षणेनाधिनदि समानायिता अन तर नौक तर खयमप्यारु भगवन्त एनामधिरोहन्त्विति निगदिते देवेन सह सर्वे तामारुरुहु. अथ स एव जलचरदस्युभयनिवारणाय खयमग्रेसरो भूत्वा मन्त्रेश्वरमुत्तीर्य पिच्छनदाग्र मपर्य तमागतवान् नि त्तिसमये भगवता जगन्नाथप्रसादमनो हराख्यमोदका प्रसादीकृता· तानवाप्य हरिं वदेत्याविष्टो भूत्वा महा भागवतदशामापन्न

(राजा विस्मयं नाटयति)

सार्वभौम एवमेवेश्वरस्य लीला तथाहि

अस्थानेऽपि प्रथयति कृपामीश्वरोऽसौ स्वतन्त्र
स्थानेऽप्यु ैर्जनयतितरा नूनमौदास्यमेव
रामो देव स गुहमकरोदात्मनीय सखाय
ष्ण स्तोत्रै प्रणमति विधौ ह त मौनी बभूव १

(तत)

पुरुष तदाज्ञया भगवत्कीर्तनं कुर्वन्तस्ते नाविकास्तथा तरणिमवाह यन्त यथैकेना । पाणीयहाटीग्रामे समुत्तीर्णा स्म·

राजा तत्र को वर्तते

वैभौम राघवपण्डितः

पुरुष ततो यदभूत्तदाश्चर्यम्

राजा कथमिव

रुष देव

यावद्देवौ न सुरसारतस्तीरसीमानमाप्त
स्तावत्सर्वं जनमयमभूद्धन्त किं तद्ब्रवीमि
किं तत्रासीदहह धरणीधूलयो लोकरूपा.
किं तारा वा मनुज पुषः पेतुरुर्व्यां नभस्त ११

ए गङ्गातटत. कष्टेनैव तद्वाटीमभ्याययौ देवः

राजा ततस्तत

पुरुष ततस्ता रजनीं तत्रैव गमयित्वा परेद्यवि नौवर्त्मनैव चलि तवान्

अथो अविच्छिन्नशुभप्रवाहा निरन्तराया चपलोर्मिहस्ता
निरन्तर विष्णुपदावतारा गङ्गेव दीर्घा जनपङ्क्तिरासात् १२

तत· कुमारहट्टे श्रीवासपण्डितवाटीमभ्याययौ तत्र च गङ्गातीर द्वाटी र्यन्तगमने यत्रयत्र पदमर्पयतीशस्तत्र पादरजसां ग्रहणाय प्राणिपाणि तनेन स प था ह त गर्त[illegible] त्रोत्तीर्ण एव भगवति दान द· शिवान दालये भगवद्गमन्वर एव गतवान् तत्र तेन चिरमेव स्थितमिति तदासक्त्या भग नत्रानेतव्य इति रचनावैशिष्ट्यमपि कृतवान्

अथ

प्राचीरस्योपरि विटपिना सर्वशाखासु भूमौ
रथ्यां रथ्यामनु पथि पथि प्राणिषु प्राप्तवत्सु

उच्चैरुच्चैर्वद हरिमिति प्रौढघोषेषु देवो
रात्रीशेषे तरिमधि शिवानन्दनीत. प्रतस्थे १३

ततो जगद नन्देनोभयो पार्श्वयो कदलीस्त भपूर्णकुम्भमुकुलदीपाव लीभिः सुरचन विशेषेण शिवानन्दवाटीपर्यन्तमभिमण्ित वर्त्मारूढ. स्मित सुमधुरवदनो जगदान दकृतमिति मन्यमानो वामे वासुदेववाटीपथमपि तथाविधमालोक्य किमितोऽग्रे गन्तव्यं किमिति ₹ति सदिहानो वासुदेवेनोचे भगवन् अग्रतः शिवान दवाटीमेवालकुरु इति तथा कुर्वाणो जगदानन्देन धारितचरणाम्बुजस्तदीयभगवद्गृह प्रवि अनन्तर तच्चरणोदक गृहपट लोपरि किंचिद्विकार्य कियदन्त.पुरे परिजनेभ्यो जगदानन्देनैव दत्तम् अन तर मुहूर्तं स्थित्वा वासुदेववाटीमागत्य क्षणमवस्थाय पुनस्तरणिमारुह्य चलितवति भगवति चरणजलग्रहणार्थमाकण्ठमग्माना जनाना यद्वैयग्र्य जात तदवलोक्य भगवतस्तथा करुणा जाता यथा सर्वैरेव चरणजल प्राप्तमासीत् ततस्तटवर्त्मनैव सर्वलोकाश्चलिता न केऽपि निववृतिरे

राजा ततस्ततः

पुरुष ततोऽद्वैतवाटीमभ्येत्य हरिदासेनाभिवन्दितस्तथैव तरणि वर्त्मना नवद्वीपस्य पारे कुलियानामग्रामे म धवदासवाट्यामुत्तीर्णवान् नव द्वीपलोकानुग्रहहेतोः सदिनानि तत्र स्थितवान् तत्र च नवद्वीपात्पारगमने

य आतर काकिणिकैकमात्र आसीत्प्रतिव्यक्ति स तु क्रमेण
बहीयसीष्वप्यथ नौषु सोऽभूत्कार्षापणानामधिक धिकोऽपि ,

अपि च

दुर्ग बध्नाति वशैर्दृढतरविपुलैर्माधवो यन्निशायां
तत्प्रात र्णभाव व्रजति जनघट घ नेन क्रमेण
सप्ताहान्येवमेव व्यजनि जनिमता दर्शनौत्कण्ठ्यभाजां
सघट्टो यत्र देव स्वयममरधुनीं ।तुमाशोऽपि नेश ५

एव सप्तदिनानि तत्र स्थित्वा पुनस्तटवर्त्मनैव चलितवान्

स यत्र त्रोपससार देवो त्ता प्राक्तत एव लोकाः
ततस्ततो भूरपि भूरि भु । विशिष्य विस्मापयते फणीन्द्रम् ६

श्रुत च गौडेश्वरस्य राजधान्या पारेगङ्गं चलतो भगवत पश्चादुभयोः पार्श्वयोश्चल तीं लोकघटामालोक्य गौडेश्वरो ग ातटघटमानोपकारिक मारूढो विस्मितः किमिदमिति यदा पृष्टवास्तदा केशववसुना । दमात्येन कथि तम् शूरत्राण श्रीकृष्णचैतन्यो नाम कोऽपि महापुरुषः पुरुषोत्तमान्मथुरां प्रयाति तद्दिदृक्षया अमी लोकाः सचरन्ति इति ततस्तेनाप्युक्तम् अय मीश्वरो भवति यस्यैवविध लोकाकर्षणम् इति अत पर च श्रुतम् तत कियद्दूर गत्वा पुन. प्रत्यावृत्तो न तेन पथा मथुरा गमि यति अपि तु पुरुषोत्तममागत्य वनपथेनैवेति न जानाम सत्यमसत्यं वदति

(नेप थ्ये)

सत्य भोः सत्यम्

आगतश्च सहस स एकको नीलशैलतिलक विलोक्य च

लोकसकुलभिया वनाध्वना नि ुत. स मथुरा जगाम च १

राजा (सविस्मयम्) काशीमिश्रस्य स्वर इव श्रूयते तदाहूयताम्

(प्रविश्य सत्वरम्)

काशीमिश्र देव अयमयमनाहूत एवागत

राजा कथय कि तत्वमिदम्

काशीमिश्र सत्यमेव लोकभिया ततोऽपि निवृत्त. ततोऽपि केना प्यविदित एव चलितवान्

राजा सार्वभौम अस्माक तु सम पन्थाः विच्छेददु खस्य तुल्य फलत्वात् एकाकिनस्तस्य निर्वाह कथ भवतु

काशीमिश्र भिक्षायोग्या कियन्तो विप्रा प्रेषिता सन्ति भग वता तु तन्न ज्ञायते

राजा साधु मिश्र साधु किम युक्त्वा गतम्

काशीमिश्र आगतप्रायोऽहमिति

राजा तर्किं दिनं भवि यति

भट्टाचार्य जङ्गाजीविन कियन्तो गच्छन्तु यथा भगवतो वार्ता प्रापयन्ति

सार्वभौम उचितमेवैतत्

राजा काशीमिश्रमहाप त्र चन्दनेश्वर मदाज्ञया समादिश यथैव करोति

काशीमिश्र देव परीक्षामहाप त्र निवेद्य मयैव तत्कारितमस्ति कतिचिदागतप्राया एव

(प्रविश्य)

दौवारिक देव महाप्रभोर्वार्ताहारिणो द्वारि वर्तन्ते

राजा प्रवेश्य ताम्

दौवारिक (तथा करोति)

(प्रविश्य)

वार्ताहारिण जयति जयति देव

राजा कथयत किं जानीथ

वार्ताहारिण सर्वमेव जानीम

प्रत्यावृत्तः स मधुपुरतो दृष्टवृ दावनश्री.
कुञ्जे कुञ्जे तरणितनयाकूलत कृतकेलि
गत्वा गोवर्धनगिरिवरे कानने कानने च
भ्रा त्वा भ्रान्त्वा दिनकतिपय वर्त्मनीशो व्यलोकि १८

राजा अरे वृ दावने किं किं कृत भगवता तज्जानासि

वार्ताहारिण

आविर्भावादवधि स निजान दवृन्दैकक दो
यद्यप्युच्चै. प्रथयतितरा तद्विकारप्रकारान्
वृ दारण्योपगमसमये ह त ते ते तरङ्गा
वृद्धिं प्रापुयदुपरि वचश्चित्तयोर्नो निवेश १९

चन च यमुनावना तलक्ष्मीमवकलयन्ननुरक्तिमुक्तकण्ठम्
विलपति परिरभ्य लोभ्यबाहुः प्रतिलतिक प्रतिशाखि सोऽखिलेशः २

अपि च

नैचिकीनिचयवीक्षणमोदादुन्मद स्खलितवा गलदस्र.
स्यन्दमानसुरसि धुरिवासीद्वातभग्न इव मेरुत न्त २१

राजा ततः

वार्ताहारिण ततस्तै कथितम्

मदमुदितमयूरक ठकान्तद्युतिमभिवीक्ष्य कुतश्चिद यकस्मात्
स्खलति लुठति वेपते विरौति द्रवति विषीदति हन्त मूर्च्छतीशः २२

अपि च

क्व पि वत्सकुलमुच्चलपुच्छ धावमानमनुवाक्ष्य वनान्तः
कण्टकावलिनि वर्त्मनि सद्यो वाक्षिताङ्गमभित' स्खलतीश २३

राजा ततः

वार्ताहारिण

कुञ्जसीमनि कदापि यन्च्छा मूर्च्छेया निपतितस्य धरण्याम्
आलिहन्ति हरिणा मुखफेनानापिबन्ति शकुना नयनाम्भ' २४

कदापि

पतय लुरसावुपत्यकायामपि गोवर्धनभूधरस्य देवः
अनुरागसुधाब्धिमध्यमग्नो नहि भग्नोऽपि बहिर्व्यथा विवेद २५
अनुवनमनुकुञ्जवीक्षमाणे रुदति विभावनुरक्तिमुक्तक ठम्
रुरुदुरिव लताश्च शाखिनश्च द्विजमृगराजिरभ जि मू र्छयैव २६

अपि च

विलपति करुणस्वरेण देवे जलधरधीरगभीरनि.स्वनेऽपि
चिरमनुविलपन्ति बाष्पक ठा. क्वचनच लास्यमपास्य नालक ठा. २७

एवमत्यनुरागवैकल्यादीश्वरत्वेनैव धार्यमाणदेह तमालोकयद्भि. पुण्यव द्भिर्बलभद्र गट्टाचार्यादिभिरहो अनर्थोऽयमापतित इति चिन्तयद्भिबलादिव वृ दावनान्निष्कासितो भगवानिति न चिरकाल वस्थितिस्तत्र तस्येति

ततश्च

य प्रागेव प्रियगुणगणैर्गा बद्धोऽपि मुक्तो
गेहाध्यासाद्रस इव परो मूर्त एवाप्यमूर्त
प्रेमालापैर्दृढतरपरिष्वङ्गरङ्गै प्रयागे
त श्रीरूप सममनुपमे नानुजग्राह देव २८

राजा सार्वभौम अतिप्रेष्ठवृन्दावनोऽपि कथमसौ स्वल्पमेव काल तत्रावतस्थे

सार्वभौम जगन्नाथेन तद्विरहमसहमानेन समाकृष्ट इव

अपि च

प्रियस्वरूपे दयितस्वरूपे प्रेमस्वरूपे सहजाभिरूपे
निजानुरूपे प्रभुरेकरूपे तताम रूपे स्वविलासरूपे २९

राजा ततस्तत

वार्ताहारिण ततश्च वाराणस्याम्

च न्द्रशेखर इति प्रथितस्य क्ष्मासुरस्य भवने भुवनेशः
प्र क्तनैः सुकृतराशिभिरस्य प्रत्यपद्यत तदा स यतीन्द्रः ३

राजा ततस्तत

वार्ताहारिण तदाना तु

तमेत्य पश्येत्यनुरागपूर्वं विश्वेश्वरो विश्वमिह न्ययुङ्क्त
कुतोऽन्यथा तावति तुल्यकाले तुल्यक्रिय सर्वजनो बभूव ३१

अपि च

ब्र चारिगृहिभिक्षुवनस्था याज्ञिका व्रतपराश्च तमीयु·
मत्सरै कतिपयैर्यतिमुख्यैरेव तत्र न गत न स दृष्ट ३२

राजा सार्वभौम किमिति तथाविधानामपि तादृश मा सर्यम्

सार्वभौम महाराज याव मनोजयो न भवति तावदेव भगवती मत्सरलता न किंचिदपि मुञ्चति

राजा ततस्ततः

वार्ताहारिण· ततश्च

गौडेन्द्रस्य सभाविभूषणमणिस्त्यक्त्वा य ऋद्धा श्रिय
रूपस्य व्रज एष एव तरुणा वैरा यलक्ष्मा दधे
अ तर्भक्तिरसेन पूर्णहृदयो बाह्येऽवधूताकृति
शैवाले पिहित महासर इव प्रीतिप्रदस्तद्विदाम् ३३

राजा ततस्तत·

वार्ताहारिण

त सनातनमपागतमक्ष्णोर्दृष्टिमात्रमतिमात्रदयार्द्रः
आलिलिङ्ग परिघायतदोर्भ्यां सानुक पमथ च पकगौर ३४

राजा कथमिव तस्य दर्शन जातम्

वार्ताहारिण ुतमिद त मुखादेव

राजा कथ्यताम्

वार्ताहारिण

औत्क ठ्यैकपुरःसराः प्रथमतो ये यान्ति नाथ ग्रतो
नि क्रामन्ति न ईशनामनिरताः साक्षा' सरोमोद्गमाः
यातायातवतां क्रम विगणयस्तत्पादधूलीर्जुष
सर्वज्ञेन बहि. स्थितो भगवता कैर यय नायित' २५

राजा ततस्तत'

वार्ताहारिण ततश्च न मे प्रियश्चतुर्वेदीत्यादि पठित्वा सत्वरमव तीर्याय दोभ्या परिर ध इति

राज ततस्ततः

वार्ताहारिण ततस्तत्रैव कापि किवद ता श्रुता

राजा कासौ

वार्ताहारिण

पुरुषोत्तममेत्य तैः पुनर्गमयित्वा कतिचिद्दिन न्यपि
रमितै प्रभुनैव तद्विरोऽप्यथ वृ दावनमेव गस्यते ३६

राजा किं देवेन सहैव वा किं पश्चात्

वार्ताहारिण पश्चादेव भवि यति यतो वाराणसीत एकाकिनैव भगवता चलितमिति द्रष्टम् अन्यदपि तत्र किमपि श्रुतम्

सार्वभौम किं तत्

वार्ताहारिण

कालेन वृन्दावनकेलिधाता लुप्तेति ता ख्यापयितुं विशि य
कृपामृतेनाभिषिषेच देवस्तत्रैव रूप च सनातन च ३७

रामानन्द समुचितमेवैतत्

(नेपथ्ये दूरतो जयजयेत्युच्चै कोलाहल)

सर्वे (आकर्ण्य) अये समागत इव भगव ञ्श्रीकृ णचैतन्य यद यमपूर्व एव कोलाहलः श्रूयते

(पुननेपथ्ये)

अद्यास्माक सफलमभवज्ज म नेत्रे कृत र्थे
सर्वस्ताप' सपदि विरतो निर्वृतिं प्राप चेतः
किंवा ब्रूमो बहुलमपर पश्य ज मान्तरं नो
वृ दारण्यात्पुनरुपगतो नीलशैल यतीन्द्र' ३८

राजा किमपर विलम्बध्वे तत्रैव गच्छाम (इति सर्वे निष्क्रान्ता)

(तत प्रविशति श्रीकृ णचैतन्यस्त कालोपनतौ परमान दपुरीस्वरूपौ च परितो दिद क्षोपनता काशामिश्रादयश्च)

श्रीकृ णचैतन्य (पुरश्चरं ात) स्वामिन्

तीर्थद्वय यदपि तुल्यमिद म९ा तः
काश्यादयोऽपि पुरत' कलुषापहारि
आन ददाः किल तथापि महा त एव
यद्यु मदीक्षणसुख हि सुख य तेन ३९

अतो हि त्वाऱ्शा सङ्गस्तीर्था तरसेवनादपि परमो रम्य इति शाघ्रमे वायातम्

पुरीश्वर अस्ति तादृश नो भागधेयम् यदतिकालं भगवद्विरहदव दहनेन न द धा. स्म

(सत्वरमुपसृत्य सावभौमरामान दौ द वत्प्रणमत श्रीचैतन्यस्तावालङ्गति)

काशीमिश्र स्वामिन् जगन्नाथवल्लभावकाशान तर श्रीजगन्नाथ' शिशयिषुरपि भगव त प्रताक्षते तत्त्वरितमेव तमवलोकय तु

श्रीकृष्णचैतन्य एहि पुरीश्वर एहि (इति सर्वै स९ नि क्रा त)

(इति निष्क्रान्ता सर्वे)

इति मथुर गमनो नाम नवमोऽङ्क

दशमोऽङ्क

(तत प्रविशति कश्चिद्वैदेशिक)

वैदेशिक श्रुतं मया प्रत्यब्दमेव गुण्डिचासमये अद्वैताचार्यादयः सर्वे श्रीकृष्णचैतन्यदर्शनार्थं गच्छन्ति तेषामभिभावकतया शिवानन्दनामा कश्चित्तस्यैव भगवतः पार्षदो वर्त्मनः कण्टकायमानानां घट्टपालानां घट्टदेयादिनिघ्नविघ्ननिवारकं आचाण्डालमपि प्रतिपाल्य नयति तदहमपि तमनुसरामि यथा तस्य सङ्ग एव गम्यते (इति कतिचित्पदानि गत्वा) अये पुरतोऽस्य समीचानो जन आलोक्यते तदयमेव प्रष्टव्यः (इत्युपसर्पति)

(तत प्रावशल्यद्वैतसेवक कश्चिद् धवनामा)

गन्धर्व अये नियुक्तोऽस्मि स्वामिनाऽद्वैतेन यथा

आयातः पुरुषोत्तमस्य गमने कालः शुभोऽयं वयं
यामः सत्वरमेव सम्प्रति शिवानन्दस्त्वया भण्यताम्
प्रस्थानस्य दिनं विधाय लिखतु क्वैकत्र सर्वे वयं
गच्छन्तः सहसा भवेम मिलिताः पश्चात्पुरोभावतः १

तदहमुपैमि (इति परिक्रामति)

वैदेशिक (उपसृत्य) भ्रातः क्व यासि

गन्धर्वनामा (आयात इत्यादि पठति)

वैदेशिक (सहर्षमात्मगतम्) यच्छ्रुतं मया तदवितथमेव तथापि पृच्छामि (प्रकाशम्) भ्रातः अपरिचितं प्रतिपाल्य सः किं नयति

गन्धर्वनामा भ्रातः कुक्कुरोऽपि तेन प्रतिपाल्य नातोऽस्ति किं पुनर्मानुषः

वैदेशिक भ्रातः कथयाशु तत्

गन्धर्वनामा भगवतो मथुरागमनात्पूर्वमेकस्मिन्नह्नि सर्वेषु परःसहस्रेषु लोकेषु चलितवत्सु कश्चित्कुक्कुरोऽपि रोपितयाद्दच्छिकेच्छः शिवानन्दस्य निकटे चलितः शिवानन्दोऽपि सङ्गे सङ्गे चलन्तमालोक्य सश्रद्धमेवानुसरते प्रतिवसति समयेऽनुच्छिष्टमेवान्नं तस्मै प्रयच्छति यत्र नद्यां

दिपार तत्र तदर्थ पृथ यथेष्टमातर दत्वा नावमारोहयति सोऽपि तद नुपदमेव प्रत्यह चलति एव वर्त्मनस्त्रिभागपर्य त गते कुत्रापि दिवसे तद्भक्ष्यमन्न विस्मृत्य भृत्येन न दत्तम् पश्चात्तमनवलोक्य अहो अद्य शुने भक्ष्य न दत्तमित्यनुतपता स्वयमितस्ततो नामग्राहमाह्वयतापि न तस्य दर्शन ल धम् तदवधि पुरुषोत्तमपर्यन्तमेव न ष्ट पश्चान्मन· कष्ट तरमेवास्य जातम् तदनु दैवगत्या पुरुषोत्तमे स त्तीण तमेव श्वान जल धितीरोपक ठमेकाकिन उपविष्टस्य भगवतश्चैतन्यस्य समीपे ष्ट्वा शिवा न द· सापराधमिव प्रणम्य दूरे स्थितोऽवलोकयति भगवान् जगन्नाथ प्रसादनारिकेलशस्य ख डश. प्रक्षिप्य दद ति कृ ण ब्रूहीति च वन्ति, स च एकैक भक्षयति कृष्ण कृष्ण कृष्णेत्यपि वदति तदपूर्वमालोक्य शिवा न द: पुनस्त प्रणम्य स्वापराध क्षमापयति स्म पुनस्तदवधि सोऽपर(रेण) न केनाप्यदृश्यत मन्ये तेनैव शरीरेण रूपा तरं ल ध्वा लोक तरं प्राप्तः

वैदेशिक भ्रात. अद्य मे शुभो दिवस. यदियं श्रीकृष्णचैतन्यकथा कर्णातिथिर्जाता यो देवः कुक्कुरमपि भगवन्नाम ग्राहयामास तस्य नृलोक प्रति यत्कृपा भविष्यति तत्किमुत तद्भ्रातः पथि गच्छतामेषा वर्त्मक ट कभूता घट्टपालाः काश्श व्यवहरन्ति

ग धर्वनामा भ्रात श्रूयताम्

प्रभावादेव देवस्य प्रत्यब्दमनुगच्छताम्
यातायातसुख भूरि सर्वेषामेव निश्चितम् २

तथा कचना दे कष्ट च भवति

वैदेशिक कीन्श तत्

ग धर्वनामा कचन दे सर्वेषु मदीश्वरप्रभृतिषु परःसहस्रेषु जनेषु चलितेषु सकलजनाभिभावकेन शिवान देनापि सपरिकरेण चलितम् स एव प्रतिघट्ट मदीश्वरादिगणवर्जं याव तो गच्छन्ति तावतामेव घट्टदेयस्य प्रतिभवाभूत्वा स्वयमेव जन प्रति यत्र यल्लगति तस्य निर्णयानुरूप परि

---

१ नौकाशुल्कम्

च्छेद्य दत्वा याति लोका. सुख गच्छन्ति एव गच्छत्सु सत्सु रेमुणा जनपदे घट्टपालानामधिकारा कश्चिद्गजपतेरमात्यो गजपतिमहार जे दक्षिणा दिशमीयुषि स्वतन्त्र सन् तत्रैवागतः तेन दुरात्मना लङ्घितमर्यादेन कर वर्धयित्वा प्रत्येक जनान्विगणय्य गतानामब्दानामपि तत्क्रमेणैव लेखयित्वा पुञ्जीभूतं शुल्कमाद तु शिवान दः क ष्ठनिगडेन बद्ध तद्बन्धने सर्व एव मदीश्वरादय परमोद्विग्ना अकृताह्निका एव तस्थुः

वैदेशि तत

गन्धर्वनामा ततो रात्रेर्यामद्वये गते तेनैव पामरेण शिवान दो यष्टिधारकेण केनचिदनुचरेणाजुहुवे स तदानीं परमोद्विग्न आसीत् कदा चिदय प्रहरतीति चैतन्यचरण स्मृत्वा वल्लभेन सह तत्पुरत ईयिवान् अन र सुप्तोत्थित दीपिकाधारिभिर्बहुभिः परिवृत वाक्ष्य बिभयाञ्चकार अन तरममात्येन पृष्ट. अये त्वं सपरिकर. समायातोऽसि अनेनोक्तम् अथ किम् पुनः स ऊचे त्व कस्य लोक. अनेनोक्तम् श्रीकृ ष्णचैतन्यस्य पुनस्तेनोक्तम् त्व चैतन्यस्य अह जगन्नाथस्य जगन्ना-थचैतन्ययो को महान् अनेनोक्तम् मम तु कृष्णचैतन्य एव महान् इत्याकर्ण्य प्रीतिसुमुखो भूत्वा सापराध इव अये मया स्वप्नो ष्टः श्रीकृ णचैतन्यो मामुक्तवान् मदीयो लोकस्त्वया बद्धोऽतित्वरित मेव मुच्यताम् इति तदयमपराधो मे क्ष तव्यः तव किंचिदपि दातव्य नास्ति सुखेन प्र तरुत्थाय सर्वै सह ग यतामित्युक्त्वा दीपिकाधारिणौ द्वावुक्तवान् अस्य परिकरो यत्र वर्तते तत्राय स्था यतामिति तथा याते तदा सर्वेऽस्मदीश्वरादय अ ह्निकमार धव त

वैदेशिक अहो विचित्रैव चैतन्यदेवस्य करुणा प्रभ वः ऐश्वर्यं च

ग धर्वनामा त्व कुतोऽसि

वैदेशि अहमुत्तरराढात

ग धर्वनामा कथमेकाका

वैदेशिक नरहरिदासादिभिरहं प्रेषित

गन्धर्वनामा किमर्थम्

वैदेशिक कदासौ पुरुषोत्तम ग तेति ज्ञातुम्

ग धर्वनामा तदिहैव मदीश्वरालयनिकटे ति यावदह ज्ञात्वा समा गच्छामि अन्ये केचिद्दशजना भवानिव तत्र चल तो मदाश्वरेणैव स्थापिताः मयैव सह यूय यास्यथ इति

वैदेशिक कथ तेषु भवदीश्वरस्य तादृशानुग्रहो जात

गन्धर्वनामा ते वेक परममधुरो लोकलोचनरसायनमिव नवीनवया रमणीयरूपः सहजावतीर्णश्रीकृष्णप्रेमरसबाह्या तरसरस' श्रीनाथनामा द्विज कुलच द्र तमतिलोभनीय दृष्ट्वा मदीश्वर. परम पिप्रिये उक्त च मय रहसि श्रीकृ णचैतन्य भवान् दर्शयि यते मान्यसङ्गे गन्तव्यम् इति गृहतस्तदनुरोधेन मासमारभ्य दशानामेव योगक्षेम करोति

वैदेशि भवत्वहमिहैव स्थित्वा भव त प्रतीक्षे

गन्धर्वनामा अहमपि शिवान दमनुसर्पामि (इत्युभौ निष्का तौ)

विष्कम्भक

(तत प्रविशति शिवान दस्तत्सङ्गे यियासव किय तो न्ये च)

शिवानन्द (तत्रैकं प्रति) अये त्व कुतोऽसि

स महात्मन् गोवर्धनदासेनाहं त्वत्समीप प्रेषितः

शिवानन्द आ ज्ञातम् रघुनाथदासोद्देशार्थं गमि यति भवान्

स अथ किम्

शिवानन्द किं तदुद्देशेन

अन्य महाशय स त्वया परिचीयते

शिवान द यूयताम्

आचार्यो रघुन दन' समधुर. श्रीवासुदेवप्रिय
स्तच्छिष्यो रघुनाथ इत्यधिगुणः प्राणाधिको म शाम्
श्रीचैतन्यकृपातिरेकसततस्नि ध. स्वरूपानुगो
वैरा यस्य निधिर्न कस्य विदितो नीलाचले तिष्ठताम् ३

अपि च

य· सर्वलोकैकमनोऽभिरुच्या सौभाग्यभू: काचिदकृष्टपच्या
यत्रायमारोपणतुल्यकाल तत्प्रेमशाखी फलवानतुल्यम् ४

तथप्यागच्छ मयैव प्रतिपाल्य नेतव्योऽसि यावदद्वैतदेवाज्ञा न ल भ्यते तावदेव विलम्ब· (इति चि तयति)

(तत प्रावशति ग धर्व)

गन्धवनामा अये अयमय शिवान द: तद्यावदुपसर्पामि (इत्युपसपति)

शिवानन्द (पुरो वलोक्य) अये पुरतोऽयमाचार्यगोस्वामिनो भृत्य इव लक्ष्यते तद्भद्र जातम् यदर्थं चिन्त्यते तदेव सपन्नम्

(उपसृत्य)

गन्धर्वनामा महाशय आज्ञापयति भगवानद्वैतगोस्वामी भव तम्

शिवानन्द अवहितोऽस्मि कथ्यताम्

गन्धर्वनामा आयात· (इत्यादि पुन पठात)

शिवानन्द अहमपि तदाज्ञा प्रतीक्षमाण एवास्मि

ग धर्वनामा विशेष. कश्चिदस्ति

शिवानन्द कोऽसौ

गन्धर्वनामा अस्मिन्नब्दे स्व नयात्रा च द्रष्टव्येति

शिवान द अभीष्टमेवैतदखिलस्य तत्साधय भगव तो ज्ञाप्य ताम् अयमह दिनानि निर्धार्य चरणान्तिक गच्छन्नस्मि तावदह श्री वासपण्डितप्रभृतिभिर्निर्णेतु तत्र गच्छामि त्वमपि साधय (इति निष्का ता)

(तत प्रविश्यपटीक्षेपेण सावभौम)

सार्वभौम यद्यपि भगवतोऽस्मिन्नर्थे नानुमतिर्जाता तथापि हठा देवाह वाराणसीं गत्वा भगव मत प्राहयामीति हठादेव तत्र गच्छन्नस्मि न जाने किं भवति यद्यपि भगवत इच्छ धीनैव करुणा तथापि करुणा परत त्व तस्येति कदाचित् करुणापि स्वतन्त्रा भवतीति करुणाया एव साहाय्येन यद्भवति तदेव भविष्यति (इति परिक्रामन् रो वलोक्य) अहो

यदमी एकत्र समुपचिता अनेकशो नानादेशीया जना परतो दृश्य ते त दमी तैर्थिका एव (पुनर्निभाल्य) अये सर्व एव गौडीया (पुनर्निरूप्य) अयमयमद्वैताचार्य अयमय नित्यान दावधूत. अयमय श्रीवास अयमय हरिदासः अय गदाधरदास. इमे गोवि दघोषादय ए मकरध्वज. एष क शीनाथ एते नरहरिप्रमुखाः एते कुलीनग्रामीणा रामानन्दादय. एते नित्यानन्दपार्षदा गौरीदासादय किं बहुना सर्वे चैतन्यपार्षदा एव समागच्छन्ति तद्भद्रमेव जातमद्यात्रैव स्थि । प्रत्येक मेते सभाषणीयाः (इत्युपसपति)

(तत प्रविशन्ति भगवद्दशनाय प्रस्थिता द्वैतादय)

अद्वैत अये पुरत सार्वभौम इव न्दृश्यते कोऽर्थ

सार्वभौम (उपसृत्याद्वैतं णमति एवमन्यानपि दूरे हरिदास विलोक्य) कुलजात्यनपेक्षाय हरिदासाय ते नम

हरिदास (दूरे पसपन् ससाध्वस णमति)

अद्वैत सार्वभौम भवद्भि' कथ श्री णचैतन्यपदारवि दस्य त्रि च्छेद ऊराकृतः

सार्वभौम एवमेव (इति सर्वे कथयन्ति)

अद्वैत हंहो अद्यात्रैव सर्वे विश्राम तु भट्टाचार्येण सह गोष्ठी कर्तव्या

सर्वे यथा रुचित भवद्भ्य. (इति यथायथं वास कुवन्ति)

श्रीकान्त (शिवान दं प्रति) भो मातुलमहाशय अहमग्रे यामि यदि वोऽनुमतिर्भवति

शिवानन्द यथासुख साधय

श्रीकान्त (प्रण य निष्क्रामति)

अद्वैत एहि भट्टाचार्य एहि वास कृत्वा समये सव श्रोतव्यम् (इति नि क्रान्त)

(तत प्रविशतः स्वरूपगोविन्दौ)

स्वरू श्रुत गौडत सर्वेऽद्वैतादय' समागच्छन्ति

गोविन्द सम्प्रति ता मध्यवर्त्मनि परित्यज्य श्रीका तोऽधुनैव समायात

स्वरूप क्वासौ

गोविन्द महाप्रभुणा सह संकथयन्नास्ते

स्वरूप तदावामपि शृणुवः (इत्युपसर्पत)

(तत विशति सुखोपविष्ट पुरीश्वरेण सह स महाप्रभु कियदूरे श्रीका तश्च)

महाप्र श्रीका त कथय के के समायान्ति

श्रीकान्त प्रभो सर्व एव त्वदीया अस्मिन्न देन कोऽपि तत्र वर्तते अदृष्टश्रीचरणाश्च केचित्

स्वरूप (उपसृत्य) जयति जयति महाप्रभु.

महाप्रभु एह्येहि स्वरूप (इति स्वसमीपमुपवेशयति)

श्रीकान्त (स्वरूपं प्रणमति)

महाप्रभु श्रीका त ततस्तत के तेऽदृष्टपूर्वा

श्रीकान्त प्रभो अद्वैताचार्यस्य पुत्रा वि णुदासगोपालदास दय अन्याश्च द्वैतसङ्गे कश्चिदखिलजनप्रिय श्रीनाथनामा

महाप्रभु कथमसौ शिवान दसङ्गं त्यक्त्वा तत्सङ्गे आयाति

श्रीकान्त तेनोक्तं मया निभृते भवान् महाप्रभो समीपे नीत्वा तद्विशेष नुग्रहो ग्राहयितव्य इति तदाश्वासेन

महाप्र (विहस्य स्वरूप प्रति) श्रूयताम्

अद्वैतोपायनमिदमिति स्वादुभ वाति कार्य
प्रेमैतस्मिन्किमपि भवताप्यत्र मैत्रीस्वरूपे
त्वं च स्मिञ्शकर सुमधुर भावमुद्भावयेथाः
सर्वेषा हि प्रकृतिमधुरो ह त तुल्येन योग ५

उभौ यथाज्ञापयति देवः

महाप्र पुनः के

श्रीकान्त वासुदेवापत्ये मातुलस्य पुत्रौ

महाप्र तौ द पूर्वौ

श्रीकान्त कनीयास्तु यः सोऽदृष्टश्रीचरण

महाप्रभु (पुरीश्वरं ति) स्वामिन् तव दास

श्रीकान्त प्रभो एवमेव

महाप्रभु स्तत

श्रीकान्त रामान दवसोरपत्यम् एवमन्येऽपि

महाप्र स्वामिन् पुरीश्वर हहो स्वरूप अस्मिन्नब्दे एतेषा कृते खल्वमी मद्दर्शनं लप्स्यन्ते

उभौ (गतम्) अहो कः संदर्भोऽस्य वचसः भवतु स्वयमेव स्फुटीष्यति

भु अस्मिन्नब्दे भूपालदर्शनमाच र्यस्य भविष्यति

श्रीकान्त देव मया दूरादेवागत तेन तदनभिज्ञोऽस्मि

पुरीस्वरूपौ (स्वगतम्) अहो अवगत गतेऽब्दे अद्वैताचार्येण य द्भू ाल सभाषितस्तेन स एवाक्रोशोऽद्यापि भगवतो मनसि जागर्ति

महाप्रभु पुरीश्वरवासुदेवचरितमे मे रोचते

रीस्वरूपौ भा यवानेवासौ यस्य परोक्षेऽपि भगवन्त प्रशसन्ति

(नेप थे क कल)

पुरीस्वरूपौ (आकण्य) देव उपसन्ना एव मा यदय कोला हल. यते

ह गोवि द भगवत्प्रसादमालां गृहीत्वोपसर्पतु भवान्

गोविन्द यथा ापयसि (इति निष्क्रान्त)

(प्रविश्य)

वाणीनाथ (प्रणम्या लि ङ्ग) देव महाप्रसादान्नादीनि भग श्रीजगन्न थस्य

महाप्र वाणीनाथ साधु समयज्ञोऽसि यदधुनाद्वै ादीनामागम नमाकल यैव कृतवान् यावद्गोविन्द एति ता त् क्वापि समावेशय

वाणीनाथ (तथा करोति)

(प्रविश्य)

काशीमिश्र भगवन् श्च खलु भग तः स्नानमहोत्सवः

हा आ जानामि किंतु भो मिश्र यथ सिन्नब्दे आपामर मपि स्नानमहोत्सव मदीयगौडीयाः सुखेन पश्यन्ति तथा कर्तव्यम्

ाशीमिश्र स्वामिन् भूपतिन दिष्टोऽसि अस्मिन्न दे मदीया वरोधादय. केऽपि देवस्नान न द्रक्ष्यन्ति ते यत्र चक्रवेष्टोपरि स्थि त्वा पूव देवस्नान पश्यन्ति तत्रैव सर्वे गौडीया आरोहणीयाः

हाप्र स्वस्ति स्यै

(पुनर्नेपथ्ये सकीर्तन ध्वनि)

री रूपौ स्वामिन् चारगणेश प्राप्ता अमी

महा स्वरूप त्वमग्रतोऽभिगच्छ पश्चादहमपि

स्वरूप यथाज्ञापयसि (इति निष्का त)

पुरी (स्वगतम्)

आक्षेपोऽपि महानसौ प्रकटित. सप्रत्यय चादरो
भूयानेव विकाश्यते भगवताद्वैत प्रति स्थि ता
सौह र्दस्य स एवमेव महिमा देव स्वभावात्सतो
र्ब धूना गुणदोषयोरपि गुणे दृष्टिर्न दोषग्रहः ६

मह पुराश्वर उत्तिष्ठ वयमप्यभिगच्छामः

पुरीश्वर उत्तिष्ठ तु गोस्व मिन (इति पुरादभ्युपगच्छन्ति)

(तत विशति भगवत्प्रसादमा लम्भनल धद्विगुणहर्षो नृत्यान दनिभरो द्वैत प रित कीतय तश्चामित स्थि ान दादयश्च अद्वैतो दूरादागच्छन्त महाप्रभुमा लोक्य नृत्य न्ते भूमौ पतति)

शिवानन्द (तनय प्रति सर्वा श्रावयित्वा) पश्य पश्य अयमयम्

वि ुद्दामद्यतिरतिशयोत्कण्ठक ठीरवेन्द्र
क्रीडागामी कनकपरिघद्राघिमोद्दामबाहुः
ासहग्रीवो नवदिनकरद्योतविद्योतिवासा
श्रीगौराङ्ग स्फुरति पुर तो वन्द्यतां वन्द्यता भो ७

(ति सर्वे भूमौ प्रण य पुनर्यावदुत्तिष्ठन्ति त वदेवाद्वैतगोष्ठीप्रविष्ट भगवन्तं नर्दि-ग्भिर वेषयन्ति)

शिवानन्द (निर्वर्ण्य)

अद्वैतचैतन्यद ोपगूहने न कोऽपि किंचित्परिचेतु मीश्वर·
चै न्यमद्वैतमितीक्षते जनोऽद्वैत च चैतन्यमितीक्षते क्षणम् ८

पश्यत भोः

अद्वैतमग्रे विनिधाय देवो दिदृक्षया तस्य गत· पुरस्तात्
प्रवेशयत्येव निजाश्रमा तर्विलम्ब य सर्वे क्रमतो विशन्तु ९

(इति सवानिवार्य क्रमात्प्रवेशयन्ति महाप्रभुरुपविश्य प्रत्येकमद्वैतादीन् यथायथमालि ङ्गनसभाषणावलोकनादिभिरानन्दयित्वा भगवत्प्रस दान्नं श्रीहस्तेन मुष्टि पूरं ददाति अद्वैतादयो यथा म गृह्णन्ति)

भगवान् भो भो अद्य नापर भोक्तव्य चक्रवे ोपरि सर्वैरेव रजनी मुखे समारोढव्यम् य । सुखेन ानमहोत्सवो न्श्यते

सर्वे यथाज्ञापयन्ति (इति निष्क्रान्ता)

स्वरूप भगवन् स्वयमपि यथासमयाह्निक कर्तुमर्हन्ति

भगवान् यथा रुचित व (इति पुरीस्थामना सह निष्क न्त)

स्वरूप काशीमिश्र भूपालो राजधानीत· साप्रतमागन्ता किं गु ण्डिचानिकटे

(नेपथ्ये)

यात

काशीमिश्र गोस्व मिन् यथाय प्रस्तौति तथागत इव लक्ष्यते

स्वरूप तर्हि स्व नदर्शन सुखेन भावा

काशीमिश्र त्व जानामि (इति निष्क्रा त)

स्वरूप गोवि द एहि भगव तमनुगच्छाव (इति ानष्क्रान्त)

(तत प्रविशति व भीस्थो राजा पुरोहितश्च)

राजा पुरोहित अस्मिन्न दे मया इह स्थितेनैव ान द्रष्टव्यम् अन्यथा भग तो गौराङ्गस्य संकोचो भवि यति

पुरोहित उचितमेवैतत्

राजा कः कोऽत्र भो. आहूयता काशीमिश्रः

(विश्य)

काशीमिश्र अयमस्मि आज्ञापयतु देव

मिश्र

ये गौडीया इह भग त· प र्षदास्तज्जना वा
तेषा ये वा तदनुगमिनो हन्त ये वा सभृत्या
सर्वेऽस्मत्स्नीतनयसुहृदो यत्र यत्रोपविश्य
स्नान पश्यन्त्यतिसुखममी सन्तु तत्रोपवि । १

काशीमिश्र महाराज भगवद ज्ञया पूर्वमेव तथैव संपादितमस्ति सुविहितम्

(प्रविश्य कञ्चित्पदाति)

शुकी देव देव्यो विज्ञापयन्ति अस्माभिर्देव ान द्र म गत भूदिति

राजा कथ नो भवि यति इहैव स्थित्वा ताभिरपि द्रष्टव्यम् प श्याय तत्प्रकारोऽस्ति स्पित

शीमिश्र देव पश्य पश्य

स्नानालयस्य भिमुख सौधमट्ट गताश्चन्द्रकराभिगुप्तम्
देवा इवैते विलसन्ति भक्त सर्वे नभोमध्य इवोपवि । १

राजा साधु प्रवेशिता इमे श्री णचैतन्यपार्षदा तदधुन साध यतु भवान् जगन्नाथ विजयसमयो नेदीयानिव जातस्तदुचितकर्मणे न पर विलम्बस्व

काशीमिश्र यथाज्ञ पयति (इति निष्का त)

(तत विशन्ति महि य)

महिष्य ज दु जयदु महाराओ ( )

(क) जय जयतु महार ज.

राजा (देवीं प्रति) एहि देवि एहि कृतार्थीकु. जनु (इति सश्लाघमुपवेश्य) देवि पश्य पश्य

इमे चैतन्यदेवस्य पार्षदा विश्वपावना'
कियतैव विलम्बेन तमप्यालोकयिष्यसि १२

तदेता प्रणम (देवी प्रणमति)

राजा पश्य पश्य महदिदमाश्चर्यम्

महाज्यैष्ठीयोगे भवति भगवद्देवकुलगा
पताकोदञ्चन्तीत्यतिसुविदितोऽय जनरव
इति श्रद्धोन्नेत्रा युगपदभिपश्यन्ति त इमा
लिह ती तज्जिह्वामिव तुहिनभानोरिव वपु' १३

महिषी देअ स ज्जेव एसा जणस्सुई ( )

राजा पश्य स्वयमपि (इत्युत्पत तीं पतांकां दशयति)

(नेप थ्ये ाह वनि)

राजा (आक य) देवि पश्य पश्य जगन्नाथदेवस्य विजयसमयो ज तस्तदाकलयामि श्रीकृष्णचैतन्यदेवस्यागमनम् (इति तथा ला सहर्षम्) अयमयं श्री ष्णचैतन्य' पश्य पश्य

अविरलजनसङ्घे सर्वमूर्धोध्ववर्ती
स्फुरति भगवतोऽय मण्ड श्रीमुखस्य
तरदुरुविधहसे वारिराशाविवोच्चै
कलय किमपि हेम्न पद्ममुद्दण्डनालम् ४

देवी अज्जउत्त अ ण उस्सवादो उस्सवान्तरमापडिद जदो जअ णाहदसणदि णीण गोरचन्ददसण जादम् ( )

(संस्तेन)

मह पूर सद्यो विषयर सशोषणविधौ
चण्डो मार्तण्डव्यतिकर वास्य स्मर

( ) देव सत्यमेवैषा जनश्रुति

( ) आर्य अ ाकमुत्सवान्तरमापतितम् य ो जग थदशन र्थिनीनां गौरचन्द्रदशन जा म

अहार्यं माधुर्यं भगवदनुरागामृतकिरो
महाव र्मा कोऽय कनकनिधिरक्ष्णो· पथि गत ५

अपिच

निर्मञ्छयानि विधुभिमुखबि ग्रमस्य
नीराजयानि च रुचं कनकप्रदीपै
सपूजयानि पदपद्ममसुप्रसूनै
प्र ाददानि करुणामपि क्षदेहैः ६

(इति प्रणमति)

राजा यथार्थोऽयमनुभवो भवत्या तदाकलय श्रीजगन्नाथोऽपि स्नान लयमध्यारूढ.

देवी (आलोक्य प्रणमति)

(नेपथ्ये पुन काह ध्वनि)

राजा देवि पश्य पश्य श्रीजगन्नाथस्नानम्

देवी (उभयतो दृष्टिमाध य) अज्जउत्त महज्जेव कोदूह (क)

राजा किं तत्

देवी (सस्कृतेन)

अन्योन्य भिमुखस्थितौ विनिमि ावन्योन्यसंदशने
ानाम्भोनयना भसो· ततनू दुर्वारया ध रया
कारुण्यैकमहानिधौ भवभयप्रध्वसनैकौषधी
देवौ तुल्यरुची पुरो विलसत प्रश्य मगौरावपि

राजा सत्यमेतत्

देवी अज्जउत्त णि वूढो सिणाणमहूसवो देअस्स जदो दक्षिणा मुहविलोअणक्खणे अदो सरइ गोरच दमा ( )

(क) आर्यपुत्र महदेव कौतूहलम्

( ) आर्यपुत्र निर्व्यू· स्न नमहोत्सवो देवस्य यतो दक्षिण खविलोकन क्षणे अन्यथा सरति गौरचन्द्रमाः

राजा एवमेव

अग्रतोऽस्य विरलायते जन· पृ तस्त्वविरलायते पुन.
पार्षदास्तु परितो भुजाभुजि श्रद्धया विदधति स्म म डलम् १८

(नेपथ्ये)

अनवसरतामभ्याय ते प्रभुर्जगदीश्वरे
विरहविधुरा हन् ावस्था जगाम यतीश्वर
भवति विशदप्रेमान दावतारतया यदा
ह्यभिनिविशते यस्मिंस्तस्मिंस्तदैव स त मयः १९

राज (आकण्य) अये निश्चितमिदमुक्त काशीमिश्रेण तत् पुनरा कलयामि यशेषम् (इति सा धानस्थि ति पुनस्तत्रैव)

स्नान नो तुलसीनिषेचनविधिर्नो चक्रसंदर्शनं
नो नामग्रहण च नो नतिततिर्नो ह त भिक्षापि नो
श्रीनील चलचन्द्रमोऽनवसरव्याजात्स्वयैवेच्छया
स्वीकृत्य स्वियोगदु खमनिश निःस्प दमाक्रन्दति २

राजा अहो प्रमादो यावदनवसर ावदेव चेदेव स्यात्तदा किं भवति (पुनस्तत्रैव)

नान्योऽ युप य प्रियकीर्तनस्य सकीर्तनानन्दथुमन्तरेण
रसान्तरायेति यदेव कर्तुं स्वरूप एवोद्यममातनोति २

राजा भद्र भो भद्रम् (दि ां प्रति) प्रिये वमितोऽपसर आकार यामि तावदेन काशीमिश्रमिति

देवी जह अ णवेदि (क) (इति निष्क ता)

(तत प्रविशति काशीमिश्र)

काशीमिश्र जयति जयति देव.

राजा मिश्र कथय कि क्त भवता

काशीमिश्र यदुक्त थैव त्

(क) यथ ज्ञापयति

राज कथय स्वरूपगोस्वामिना किं मन्त्रितमस्ति

काशीमिश्र भगवता स्वीकृते तथाविधविरहवैकल्यानुभवे तदपनोदार्थं सकलैरेव सुहृद्भिः सह मन्त्रितम् अद्य साय यदि गोपीनाथविजय दर्शनान तर भगवता मधुरतरभगवत्कीर्तन श्रूयते तदा रसान्तर भवति तस्मिंश्च सति विरहावेशः श्लथत इति संमन्त्र्य रोहिणीकुण्डसविधे परमास्तैस्तदीयहृदयज्ञैरेव कतिपयैर्मधुरमधुर कीर्तनमारब्धितमस्ति

राजा मिश्र कथमिदमालोक्यते

काशीमिश्र जगतीं चेदारोहसि

राजा तथैव क्रियते (इति तेन सह तदारोहं नाटयति)

(नेपथ्य मधुरतरसकीर्तनक कल)

काशीमिश्र (निरूप य) भो महाराज पश्य श्य

विरहव्यथैव मूर्ता करुणो रस एव मूर्तिमान्दिवसम्
आसीद्य एष सम्प्रति कीर्तनकलतोऽयमन्यथा जात. २२

राजा भवति हि

अ नन्दकन्दलितमस्य वपुयदाय
भाव स्पृशत्यथ तमेव बहिर्व्यनक्ति
यै पूर्यते स्फटिकज घटिका रसैस्तै
स्तद्वणभाग्भवति तानुपदर्शयन्ती २३

(पुनर्नेपथ्ये गा ध्वनि)

राजा (आक र्य) किमेतद्गीतम्

काशीमिश्र भगवद्वंशीनादमाधुरीप्रति ाद मिद गौडीयभा गेपनि बद्धमिति देवेन नाक ण्यते

राजा अहो चित्रम् यदेष

गौर कृष्ण इति स्वय प्रतिफलन्पुण्यात्मना मानसे
नी द्रौ नटतीह सम्प्र यते वृन्दावनीय रसम्
अ द्य कोऽपि पुमान्नवो धूकृष्णानुरागव्यथा
स्वादी चित्रमहो विचित्रमहहो चैतन्यलीलायितम् २४

(पुनर्निरू य) अये चिरकालमेकस्यैव गीतपदस्य ध्रुवमेव गीयते

काशीमिश्र प्रथमतो यस्या लीलायां मन प्रविवेश न तत पुन रावर्तते

भवत्येवमेव (इति पुनरालोक्य सहर्षम्) अहो कादृशमस्य माधुर्यम् पश्य पश्य

जानूत्क्षेपभुजावधूननपदन्यास क्षिविक्षेपणै
र्हन्तानन्दयतो मनासि सुहृद विश्व जडीकुर्वत
निष्ठेवैर्मुखमस्य भाति सुभगसेर महानन्दत.
फेनैर्हेमसरोरुह तमिव स्त्यानैरिवेन्दुर्हिमै. २५

(पुनरालोक्य सवि यम्) अये

क एष नि साध्यसमास्यमण्डलान्निष्ठेवमाकृ य पिबन्प्रमोदते
चन्द्र ह्रहिर्भूतमिवामृतद्रवस्यो ासिन फेनमहो चकोरक २६

काशीमिश्र शुभानन्दनामाय वैष्णव

राजा अहो एकमेव गीतध्रुवपदम् ए एव ारस्वर ए एवोल्लासो गाथकानाम् यामद्वय य वद् भगवतोऽपि समान एवानन्दप्रकाश चमत्कार. तदमीभी रसान्तरेण विरहावेशतरङ्गो दूरीकृत. प्र तरसान् र केनान्तरयन्तु उभयथैव भगवत आह्निकविगम

काशीमिश्र तथापि विरहावेशो भक्ताना दु.सहः (इति पुनर्निभाल्य) देव नि र्यूढोऽय नृत्योत्सव· यदमी भगव त धृत्वा स्वावास ति गच्छन्ति

राजा भद्रं सभाव्यते कदाचिदाह्निकमपि तदधुना मिश्र भगव त्समीप गम्यताम् अहमिहैव क्षण निद्र मि

काशीमिश्र यथाज्ञापयसि (इति निष्क्रान्त)

राजा गतो मिश्रस्तदिह निद्रामि (इति निद्रा नाटयित्वा पुनरुत्थाय) अहो विभातेयं विभावरा यतः

अस्ताचलोदयमहीधरयोस्तटान्त
शीताशुच डकिरणावुपसेदिवासौ
तुल्यत्विषौ मृदुतया वहत प्रगस्य
वर्षीयस· क्षणमिवोपरि लोचनत्वम् २७

(इति परितो ावलोकयति)

(नेपथ्य)

अहो महत्कौतुकम्

प्रात प्रत्यहम र्यंग धतुलसीपुष्पादिभि पूजय
त्यद्वैते भग तमन्तरसुखावेशोल्लसद्रोमणि
स्मित्वा तैर्हठतो हृतैरतिरसेनाद्वैतमभ्यर्चय
न्देवो र्वुरितैर्मुखेऽङ्गुलिदलैरुद्बाधवाद्य व्यध त् २८

अपिच

यस्य न्यस्य कराब्जकोषकुहरे पूजोपचार प्रभो.
पूजा र्तुमना प्रयाति कुतुकादद्वैतदेवोऽन्वहम्
श्रीनाथः स तदा प्रभोर्गुणनिधेः सदर्शनस्पर्शन
प्रेमालापकृपाकटाक्षकलया पूर्णान्तरोऽजायत २९

राजा अये कथमय तुलसीमिश्र परीक्षामहापात्रं किमपि प्रस्तौति तच्छोतव्य यत् सत्वरमित एवाभिगच्छति

(प्रविश्य)

तुलसीमिश्र देव जगन्नाथस्य र य त्रा नेदीयसीति गुण्डि चाम न्दिरमार्जनक्षालनार्थं स्वयमेव महाप्रभुस्तत्रोद्यत

राजा प्रियं मे प्रियम् किंचिदाज्ञप्तमस्ति

तुलसीमिश्र यदाज्ञप्त तत् क शीमिश्रेणैव सपादितम्

राजा किं तत्

तुलसीमिश्र यावन्तस्तल्लोक स्तावत्य एव सम र्जन्यो घटास्तु ततोऽधिका

राजा एतावन्म त्रम्

तुलसीमिश्र किम येन तत्प्रयोजनम्

(नेपथ्ये कलकल)

तुलसीमिश्र देव पश्य पश्य

श्रीहस्तेन विलिप्य च दनरसै. प्रत्येकमेषां वपु
निंक्षिप्या धिकधर भगवतो निर्माल्यमाल्यानि च
उल्ला द्रुमम रीरिव कर सम्राहयन्शोधिनी
र्माद्यत्तङ्गम 'जालसगतिर्गौरो विनि क्रामति ३

अपिच

निर्गच्छन्ति मुदा मनोरथरथैः सतोषद तावलै
रत्युल्लासतुर मैर्भ जये जैत्रा इवामी भटा
रोमा ावलिक ुकाव्यवपुषोऽश्रा तस्रवैर्बिभ्रतो
बाष्पैर्वारुणमस्रमेव समद हुकारझङ्कारिणः ३१

राज धिग् भूपत्वम् कदाहमेषा मध्ये य. कश्चिदेव भवन् भगव त मनुव्रजामि तुलसीमिश्र कथमिदं कौतुकमामूलमाकर्ण्यते

तुलसीमिश्र अस्ति कश्चि मदीय पुरुष' स एव सर्वं समाकल य्यागतप्रायः

राजा प्रिय मे प्रियम् (प्रविश्य सत्वर कश्चित् राजान ण य) महा राज सर्वमवलोक्यागतम्

राज कथय

रुष देव अवधीयताम्

पाणौ कृत्वा मधुरमृदुले शोधनामू र्वमूर्ध्वं
सर्वैः सार्धं स्वयमयमसौ गुण्डिचाम ुपान्त
लूतातन्तून्मलिनरजसः सारयन्नेव तैस्तै
र्व्याप्तो गौर' शशधर इव व्यक्तलक्ष्मा बभूव ३२

अन तरम्

हस्ताप्राप्ये कमपि समुपारोप्य कस्यापि चांशे
मा भैषीरित्यहह निगद मेघग भीरयोक्त्या

---

१. मकटकाख्य कीटविशेष

अभ्युन्नेत्र सरजसतनुर्मार्जयि वोर्ध्वमूध्व
भित्ती सिंहासनमथ तल शोधयामास देव ३३

अपिच

बहिर्वसोऽ ल्यामवकरचय शोधनिकया
समा त्यापूर्य स्वयमथ बहिः सारयति स.
चिद् हस्तप्राप्यावधि सरभस मार्ष्टि च कल
सुहृद्वर्गैर्गायत्यपि स कुतुक गापयति च ३

राजा तस्तत

रुष एव मूलमण्डपजगन्मोहनभोगम डपाना मार्जनान तरम्
कूपात्केऽपि समुद्धरन्ति कतरः कस्यापि हस्ते ददौ
सोऽ यन्यस्य करे स चापरकरे सोऽम्भ· करे कस्यचित्
इत्थ शृङ्खलया घटानथ नय पूर्णानपूर्णांस्त्यजन्
पूर्णापूणपरिग्रहत्यजनयो. शिक्षा व्यतानीज्जन ३५

अपिच

केचिद्गौरगिरा मनोज्ञमतय. सिञ्चन्ति सिंहासन
भित्ती· केचन केऽपि तस्य करयोर्वर्यर्पणं कुर्वते
केचित्तत्पदपङ्कजोपरि घटै· सिञ्चन्ति सतोषत
स्तत्केऽप्यञ्जलिना पिबन्ति ददते केचि मूर्धन्यपि ३६

राजा ततः

पुरुष तत पूर्ववत्क्रमेण प्रक्षाल्य धौतपादा एव सर्वे स्वस्ववासो भिस्तत्क्रमेण सलिलान्यपसारयाबभूवुः था कृत्वा अ णमुत्तीर्य च्छो धनारम्भे

पङ्क्तीभूयोपविष्टे निजजननिकरे कौतुकान्मध्यवर्त
चिन्वन्वास प्रपूर चिरसमुपचिता· शर्कराश्चत्वरस्य
पश्याम· के तामा वि धति विचिता इ वोचद्यदेश
स्तर्ह्येवामी प्रमोदादहमहमिकया चेतुमुद्योगमायुः ३

एव स्वचरितमिव निरवकर स्वहृदयमिव वि ध च सर्वतश्चत्वरतल त्वा ते मी भगवत्कार्तनमारेभिरे तथा हि

क्षोभ क्षोणीमृगाक्ष्याः स्थगनमिह रवे. कम्पमाशावधूना
स्तम्भ वातस्य कुर्वन्नमरपरिवृढस्यास्त्रमक्ष्णा सहस्रे
स्वेद सप्तर्षिगोष्ठ्या परमरसमयोल्लासमौत्तानपादे
र्ध्यानध्वस विरिञ्चे. स जयति भगव कीर्तनानन्दनाद' ३८

ततश्च

नर्तित्वा क्षणमेव चारु मधुर गौरो हरिर्नर्तया
चक्रेऽद्वैततनूजमेकमधुर गोपालदासाभिधम्
नृत्यन्नेव स मूर्च्छितः सुखवशाद्देहान्तर यन्नि ।
द्वैते खि ति पाणिपद्मवलनाद्देव. स त प्राणयत् ३९

ततो हरिध्वनिरुच्चैरुच्चचार

राजा अहो मे दुरदृष्ट यदेतदपि न द्द म्

रुष ततो नरसिंहनाथम प च सं कार्य ध वयित्वेन्द्रद्य सरसि कृतजलविहारः सर्वैरेव तदभ्यर्णवर्तिनि कुसुमोद्याने विशश्राम तदनु व णीन थप नायकेनोपनातानि भगवत्प्रसादादीनि सर्वैरेव सेवितानि

(नेप थे)

नेत्रोत्सव सर्वजनस्य भावी श्व श्रीपते' श्रीमुखदर्शनेन
इताव चित्तोत्सव एष जातो महोत्सवस्यापि महो सवो यः ४

रा । महापात्र काशीमिश्रोऽय यथा लपति त । मन्ये भ न्त मेव श्रावयति तदधुना नेत्रोत्सवस्य कृताकृतावेक्षणमाचरतु भवान्

तुलसीमिश्र यथाज्ञापयसि (इति निष्क त)

(तत विशति काशीमिश्र)

काशीमिश्र अहो अतिमधुर भावि

काशीश्वरक्षपितलोकचयः पुरस्ताद्
गोविन्द लितविलासगति परस्तात्

पार्श्वद्वये च सपुराश्वरसस्वरूपो
नेत्रोत्सवाय स भवि यति गौरचन्द्रः ४

राजा अहो मनसा सह संकथयन् मामपि नावलोकते मिश्र

मिश्र (दक्षिणे क्षि निक्षिप्य) अहो नि पन्नम डनैव रथत्रयी विशे षतोऽय श्रीजगन्नाथस्य रथः

उत्स पिदर्पणसहस्रविभा वितश्री
सच्चारुचामरसुचीनचयैः परातः
तेजोमय समयमेत्य विराजमान
आनन्दयन्नयनमेव र थो विभाति ४२

(समुखमवलोक्य) अये कथमिहैव राजा (उपसृत्य) जयति जयति महाराज. महाराज इह स्थितेनैव त्वया रथारोहण भगवतोऽवलोकनायम् पश्चात् स्नानोत्तर स्वसेवा विधेया

राजा रथविजयसेवा मे नियतापि तथा मा नोत्क ठयति यथा मह प्रभोर्नृत्यदर्शनस्पृहा

काशीमिश्र रथारोहणे जाते सति य मार्ग तरित एव महाप्रभो र्नृत्यारम्भो भावी

राजा (सवितर्कम्)

इतश्चेत्पश्येय भवति परितोषो न मनस
स्ततो वा पश्येय तदपि सु भ नैव भवति
प्रवेशस्तद्गो चा मम न घटते तद्वततया
तदन्तर्वर्तित्वात्कथमु कलये तस्य नटनम् ४३

तथापि याव टनं तावदेव तत्रैव स्थेयम् तत्कृपादेव्येव शरणम्

काशीमिश्र मह र ज कञ्चुकिद्वारा महर्षिभिरभ्यर्थितमस्ति भगव तो गौरचन्द्रस्य नृत्यदर्शनार्थमिहावस्थानम्

राजा सुखेन पश्यन्तु कृताथयन्तु लोचने जनुश्च

काशीमिश्र तत्त्वरस्व भगवतो रथारोहणकाल सनि ष्ट एव

राजा एवमेव

काशीमिश्र अहमपि भगवन्निकट एव गच्छामि (इत्युभौ निष्क्रान्तौ)

(तत प्रविशन्ति कञ्चुकिनोपगम्यमानास्तामेव वडभीमारूढा महिलाय)

की देव्यः पश्य तु

सम्प्राप्तो रथकधर तनुभृता नेत्रैर्मनोभिः समं
श्रीनीलाचलचन्द्रमा रथपथं सम्प्राप गौरो हरिः
भावाक्रान्ततयैव नेत्रमनसी तेषां वरं मुञ्चत
पूर्वं नैव परं तु पूर्वपरयोः सत्यं बलीयः परः ४४

अपिच

मण्डलैस्त्रिभिरसौ स्वजनानामावृतो जयति काञ्चनगौरः
बीजकोष इव वारिरुहस्य प्रोल्लसत्तरसहस्रदलस्य ४५

देव्य (सोत्कण्ठं निरीक्ष्य प्रणमति)

शुकी देव्य पश्य तु पश्यन्तु

काशीश्वरोऽजनि बहिर्वलयस्य मुख्यो
गोविन्द उत्तमतमोऽजनि मध्यमस्य
अभ्यन्तरस्य मणिवज्जयति स्वरूपः
सामाजिकः किल पुराश्वर ईश्वराग्रे ४६

(क्षणं निभाल्य) अहो महत्कौतुकम्

सङ्कोचाद्विरलीकरोति न जनाञ्चैतन्यपादाश्रयाँ
स्तैस्तैर्गाढनिरन्तरावृततया गौरं च नो पश्यति
सोत्कण्ठं नयनद्वयी तत इतो व्यापारयन्नन्तरं
संप्रेम्णा हरिचन्दनासविलसद्बाहुर्नृपो भ्राम्यति ४७

देव्य अस्स जादिसी उक्कण्ठा तादिस ज्जेव ववहरदि (क)

शुकी अहो प्रमादः

रथाक्षिवर्त्मभिदुरं हरिचन्दनोऽसौ
श्रीमान्समन्तरयति स्वकरेण मन्दम्

(क) अस्य यादृग्युत्कण्ठा तादृशमेव व्यवहरति

रुष्टो जघान तमसौ प्रतिरुष्टमेन
राजैव सा त्वयति सानुनयं नयेन ४८

देव्य तादिसाण निरवेच्छाण को वराओ हरिच दणो ( )

की पश्यन्तु पश्यन्तु
उद्दामता डवविधौ जगदीश्वरस्य
सर्वे परस्परकरग्रहण विधाय
बाहू प्रसार्य परित. प्रदिशन्ति शश्वद्
भूमौ स्खलत्तरतनोः क्षतशङ्कयैव ४९

देव्य दाणिं सुहेण दीसइ (ख)

की पश्यन्तु
क्षणमुत्प्लवते मृगे द्रकल्पं क्षणमाधावति मत्तनागतुल्यम्
भ्रमति क्षणमप्यलातचक्रप्रभमान दतरङ्गतो यतीन्द्रः ५
अपिच
अन्तर्भ वविदामुदारमनसाम द्यः स्वरूपो यदा
यद्गातु दिशतीदमेव सकल' प्रीत्यैव तद्गायति
तस्यार्थस्तनुमानिव प्रतिफलन्गौरो नरीनृत्यते
स्तम्भाश्रस्वरभङ्गकम्पपुलकप्रस्वेदमूर्च्छ सितैः ५१

देव्य अच्चरिअ क्खु एद पेम्मानन्दचम ारस्स (ग)

क की पश्यन्तु
आन द म्बुनिधेर्न वेद्मि कतमैरुच्चावचैरूर्मिभि
र्नृत्योन्मादमदेन गौरभगवत्य न दमूर्च्छा गते
निष्ठेव. कठिनोऽस्तमस्तवदमूच्छासो न संलक्ष्यते
कान्ति केवलमु वलैव सुहृदामाश्व सबीजायते ५२

(क) ताद्दश न निरपेक्ष णा को वर को हरिचन्दनः
(ख) इदानीं सुखेन दृश्यते
(ग) आश्चर्य खल्विद प्रेम न दचमत्कारस्य

देव्य ईसरो त्ति सवित्तिज्जेअ णो जीअण धारेदि अ णधा एद किं दंसिदु सक्कीअदि (क)

क ुकी (पुनर्निभाल्य) अहो जीवितमहो जीवितम्

रोमाञ्चाः पुनरुन्मिषन्ति नयने भूयोऽपि पर्यश्रणी
निष्ठेवश्च पुन· प्ररोहति पुनः श्वासोऽधर धावति
सर्वेषामभितोऽमितः समुदयत्याह्लादकोलाहलो
देवो जागरयाचकार हृदय स्वान दमूच्छौं त्यजन् ५३

देव्य अम्महे जीविदम्ह जीविदम्ह (ख)

क की (पुनर्निभ ल्य) अहो अद्भुतम्

येनैव गातेन बभूव मूच्छा तेनैव भूयोऽजनि संप्रबोध.
किमेक एवैष स कोऽपि मन्त्र प्रयोगसहारविधौ स्वतन्त्र· ५४

अपिच

नृत्यो मादतरङ्गिणीर्बलवतीरान दवात्या क्रमा
दत्युल्लासयति स्म तत्र जनितो वीचीतरङ्गक्रमः
कश्चित्कश्चिदनीनशत्तमपरस्त चापरस्त पर
श्चेत्यान दतरङ्गजैव विविधा वृत्तिर्न गीतार्थजा ५५

अहो स्वरूपस्य प्रेममाधुर्यम् तथा हि

उत्थाय मन्दमुपविश्य सुखोर्मिवेग
निघ्नस्य तर्जनिकया लिखतो धरित्रीम्
आशङ्कितः क्षतिकृते सदय स्वरूपो
देवस्य पाणिमरुणन्निजपाणिनैष· ५६

(पुननिरूप्य) अहो कष्टम्

गच्छत्येष जगत्पता रथगतो बाहू प्रसार्य स्वय
प्रीत्योत्थापयितु रथोदरमिव श्रीगौरचन्द्र पुरः

(क) इश्वर इति सवित्तिरेव नो जीवन धारयति अन्यथैतत्किंदूषितु शक्यते

(ख) अहो जीविताम्हो जीविताम्ह·

नृत्यन्नेव स चापसर्पति पर वास्योदयेनात्मनो
द्वावेवाक्षिपथं व्यतीयतुरहो भाग्य विशश्राम न ५

(इति देवीरवतार्य तामि सह निष्का त)

(तत प्रविशति राजा ाशीमिश्रश्च)

राजा अहो नि र्यूढो रथोत्सव

गु डिचागृहमवस्थित एक· प्र स्रवानुपवना तरमन्य
देवयु ममिदमेव जनाना चित्तमेव युगपत्प्रविवेश ५८

काशीमिश्र होर प म्यां भगवत्या· श्रियो देव्याः प्रयाणयात्रा सर्व तश्चमत्कारिणी यथा भवति तथा कार्या त्रचामरादीनि भगवद्ध ारा गारे यावन्ति सन्ति यावन्ति वा मम कोषागारेषु सन्ति तावन्त्येव समाने यानि यथा रथोत्सवादपि लोचनचमत्कारकारकत्वेन मूर्त एवाद्भुतरसो भवति

काशीमिश्र यथाज्ञापयति

राजा त्वमद्यारभ्य तथा कुरु अहमपि पुर प्रविशामि (इति नि ान्त)

काशीमिश्र (स्वगतम्) आरामा तरमागतेषु भगवत्पार्षदेष्वद्वैतादिषु च समस्तेषु महत्सु किं वृत्तमिति निभालयामि (इति जगन्नाथवल्लभाख्य पवनं सहर्षमालोक्य) अहो भगवत श्री णचैतन्यस्यैव साक्षात्

श्वो मे परश्वो मम त्परेऽह्नि ममापरेद्युर्मम चापरेऽह्नि
ममेति भिक्षादिननिर्णयेनाद्वैतादयः कौतुकिनो भूवु ५९

दधुनात्र मम प्रवेशोऽयोग्यस्तदहमासन्नस्य होरामहोत्सवस्य स मग्री समवधानाय गच्छामि (इति निष्क्रान्त)

(तत प्रविशति श्रीकृष्णचैतन्य परितो द्वैतादयश्च)

श्रीकृष्णचैतन्य स्वरूप यद्यपि जगन्नाथो द्वारकालीलामनुकरोति तथापि गुण्डिचाव्याजेन वृन्दावनसारकेष्वेतेषूपवनेषु विहर्तुं प्रत्यब्दमे नीलाचलं परित्यज्य सुन्दराचलमागच्छति कथ देवीं श्रिय परित्यजति

स्वरूप स्वामिन् वृ दावनसारकेष्विति यदुक्तं स्वयमेव तदे सिद्धान्त· न हि वृन्दावने श्रिया सह विहारः अपि तु गोपा नाभिरे

श्रीकृष्णचैतन्य तथाप्येषा कोपिना भवति

स्वरूप प्रणयिनीना प्रकृतिरेवेयं यत्स्वायोग्यतां नेक्षन्ते

(नेपथ्ये महावादित्रनिर्घोष)

वें (आकर्ण्य) अहो निमेषमात्रमिव दिनचतु यं ज तम् यदय होरापञ्चमीमहोत्सव प्रत्यावर्तते

श्री णचैत य —यथाप्रस्तावमेवाय भगव ।' श्रीदेव्या कोपप्रय ण महोत्सव' तदयमालोकनीयो भवति

सर्वे एवमेव (इत्या शेकनसमुचित स्थलमुपसर्पन्ति)

(पुनर्नेपथ्ये जयजयध्वनि)

स्वरूप (आलोक्य) भगवन्

मानस्य क्रम एष नैव यदिय स्वैश्वर्यविख्यापकै
र्नानादिव्यपरि दै स्वयमहो देव प्रतिक्रामति
व्यक्त रौद्ररसोऽयमम्बुधिभुव' क्रोधस्य त्स्थायिनो
भूयानेव विकार एष विदित वैद ध्यमस्या परम् ६

रीश्वर स्वरूप सत्यमेव किंतु पश्यता पुनरद्भुत एव रस था हि

पताकाभिर्देवी कलहमनु भोगीन्द्ररसना
सहस्रस्य द्वाभ्या युगपदिव ली । दशदिश
नभो वापीहंसैरिव मृदुचलैश्चामरचयै
सितच्छत्रै फुल्लद्धवलकमलौघैरिव वृता ६

अपि च

सुधूप नां धूमैः प्रतिदिशमुदी रुपचिते
घनौघे गम्भीर ध्वनति मुरजादिव्यतिकरे
ब ाकाना श्रेण्यामिव धवलसत्तोरणततौ
चल त्यामुन्मत्त इव दधति लास्यानि शिखिन ६२

अद्वैत

पुरो वारस्त्रीभिर्गुणविजितरम्भाप्रभृतिभि
र्लसल्लीलालास्य मुहुरभिनयन्तीभिरमितः
समन्ताद्दासीभिर्व्यजनचयत म्बूलपुटिका
मणीभृङ्गार दिग्रहणचटुलाभि· परिवृता ६३

अपिच

विमानस्य म्लानीमिव विदधतीं मुग्धमहसा
चतुर्दोलीं चामीकरमणिमयीमुत्थितवती
अतिक्रोधान्धापि स्मरभरसमाभुग्नहृदया
पयोधेः पुत्रीयं पितृजनितदर्पेव वलते ६४

स्वरूप (सोपहासम्) अहो मानवैद ध्यमस्याः

श्रीकृष्णचैतन्य स्वरूप कीदृश प्रणयकोपवैद ·यम्

स्वरूप या यादृशी तस्या खलु तथाविध वैद ध्यम्

श्रीकृष्णचैतन्य तथापि शृणुमः

स्वरूप कदाचित् कृतापराधे प्रणयिनि श्रीव्रजराजकिशोरे सविध मागत्य समुचितं व्याहरति सति

किं पादा मुपैषि नास्मि कुपिता नैवापराद्धो भवा
न्निर्हेतुर्न हि ज यते कृतधिया कोपोऽपराधोऽथवा
योग्या एव हि भो यता दधति ते तत्किं मयाऽयो यया
तेन द्यावधि गोकुलेन्द्रतनय स्वाच्छन्द्यमेवास्तु ते ६५

इद कोपवैद ध्यम् प्रकारान्तर च

दूरादुत्थितमन्तिक मयि गते पीठ करेणापि त
स्मित । भाषिणि भाषित मृदुसुधानि·स्यन्दि म दं वच
आरूढेऽर्धमथासन प्रकटितो हर्षस्तयाश्लिष्यति
प्रत्याश्लिष्टमव मयैव मनसो वाम्य तयावि कृतम् ६६

---

१ यानविशेष

श्रीकृष्णचैतन्य पूर्वतोऽपि सुरसमिदम्

श्रीवास (सपरिहासम्) गोपाल लनाना कैतादृशमैश्वर्यम् ऐश्वर्यं हि मदहेतुः

अस्या' पश्यत भो मदस्य महिमा द सीकुलेनेश्वरी
गर्वोत्सेकमदोद्धुरेण यदमी द्ध कटीरोधसि
मुख्या एव जगत्पते' परिजना त्येकमाकर्षता
पात्यन्ते स्म निजेश्वरीपदपुर प्र प य चैरा इव ६

भृत्यापराधे स्वामिनो द ड इत्येव श्रुतम् द तु तद्विपरीतमेवेत्यहो तम्

(श्रीवास प्रति) भो पण्डित पश्य पश्य तव देव्य वैद ध्यम्

अचेतनस्यास्य रथस्य को वा म तु' कथ ताड्यत एष भृत्यै
यास्या यदूरेऽहमितीश्वरेण प्रोक्ते कथ वाशमि दीर्घकोप ६८

श्रीवास. स्वामिन् ईश्वर्या हीयमेव रीति

श्रीकृष्णचैतन्य श्रीवास नारदत्वेन भवान् द्वारकाविलासप्रिय एव तेन तुभ्यमैश्वयाश एव रोचते स्वरूपस्य वृ दावनप्रियत त्तथावि धान दवैद ध्याश एव प्रेय न्

अद्वैत भगवन्

भवत्पदाम्भोरुहयोरनुग्रहादसादृशामीन्शमीदृश महत्
बभूव सौभाग्यमहोमहोत्सवा मूर्ता इवामी विविशुर्दृशो पथि ६९

श्रीकृष्णचैतन्य किं ते भूयः प्रियमुपकरोमि

अद्वैत किं भूयः प्रियमुपकरिष्यसि

हेलाखेलायितेनातनि कलिमथन ख्यापितो भक्तियोगो
व्यक्तं तत्रापि नीतः परमसुनिभृतः प्रेमन मा पदार्थ
।पि ।पि प्रकीर्णा पुरुतरसुभावुका भावुकाना
तत्रा याभीरन री कुटमणिमहाभावविद्यानवद्या ७

असाकं तु

धर्मार्थकामेषु परैव कुत्सा लिप्सा न मोक्षस्य च कर्हिचिन्न
एभि समस्तैस्तव देव लोकैर्लोकान्तरेऽप्यस्तु सहैव वासः १

श्रीकृष्णचैतन्य एवमेव

वृ दारण्या तरस्थ सरसविलसितेनात्मनात्मानमुच्चै
रान दस्यन्दबन्दीकृतमनसमुरीकृत्य नित्यप्रमोद.
वृन्दारण्यैकनि । स्वरुचिसमतनूःकायथि यामि यु मा
नित्येवास्तेऽवशिष्ट किमपि मम महत्कर्म तच्चातनि ये ७२

अपिच

दास्ये केचन केचन प्रणयिनः सख्ये त एवोभये
र धाम धवनि या कतिपये श्रीद्वारकाधीशितु.
सख्य दावुभयत्र केचन परे ये वावतारा तरे
मय्याबद्धहृदोऽखिलान्वितनवै वृ दावनासङ्गिनः ७३

द्वै तथास्तु

निजेच्छया प्रापय यद्यदेव स्थला तर नो वपुर तर वा
तवैतदाश्चर्यचरित्रमेव जातिस्मरा एव चिरं स्मराम. ७

तथा पीदमस्तु

आकल्प कवयन्तु नाम कवयो यु मद्विलासावलीं
तामेवाभिनय तु नर्तकगणा श्रृ ण्व तु पश्य तु ताम्
न्तो मत्सरता त्यजन्तु कुजना स तोषव तः सदा
स तु क्षोणिभुजो भवच्चरणयोर्भक्त्य प्रजा पान्तु च ७५

गवान् तथैवास्तु (नि । ता सर्वे)

इति चैतन्यच द्रोदये महमहो सवो नाम दशमोऽङ्क

यस्योच्छि प्रसाद दयमजनि मम प्रौढिमा काव्यरूपी
ाग्देव्या य ता ं त इह मयोत्कीर्त्य तस्यावतारम्

यत्कर्तव्य मयैतत्कृ मिह सुधियो येऽनुरज्यन्ति तेऽमी
श्रृ वन्त्वन्यान्नमामश्चरितमिदममी कल्पित नो विदन्तु
श्रीचै न्यकथा यथामति यथादृष्ट यथाकर्णितं
जघ्रन्थे कियता तदीयकृपया बालेन येय मया
ए । तत्प्रियमण्डले शिव शिव स्मृत्येकशेष गते
को जानातु शृणोतु कस्तदनया कृष्ण' स्वय प्रीयताम् २
दृष्टा भागवताः कृप प्युपगता तेषा स्थित तेषु च
ज्ञात वस्तु विनिश्चित च कियता प्रेम्णापि तत्र सितम्
जीवद्भिर्न मृत मृतैर्यदि पुनर्मर्तव्यमस्माद्भिवै
रुत्पद्यैव न किं मृत बत विधे रामाय तुभ्यं नम ३
शाके चतुर्दशशते रविवाजियुक्ते
गौरो हरिर्धरणिम डल आविरासीत्
तस्मिँश्चतुर्नवतिभाजि तदीयलीला
ग्र थोऽयमाविरभवत्कतमस्य वक्त्रात् ४

समाप्तमिद चैतन्यचन्द्रोदय नाम नाटकम्

चैतन्यचन्द्रोदयनाटकस्थश्लोकानां मातृकावर्णक्रमेणानुक्रमणी

	पृ	श्लो
अकस्मादुन्मी न्नव	३९	२६
अकृष्ण कृष्णत्व व्रजितु	५५	३
अग्रतोऽस्य विरलायते जन	१९१	८
अग्रे निधाय भगवज्जननीं	९७	२६
अचेतनस्यास्य रथस्य	२ ५	६८
अञ्जली मृगदृशो	५२	५१
त्युक्तिरेषा तव साव	१३९	ं
अथापि ते देवपदाम्बुज	१११	
थो अविच्छिन्नशुभप्रवा॥	१७	१३
अदशनायानपि नीचजातान्	१८७	२
अद्याय मे समजनि महा	१५४	४
अद्यास्माक सफलमभवत्	१७७	३८
अद्या ध्य गतमेव नो नयनयो	९७	२५
अद्वैतचैतन्यदृढो	१८७	८
अद्वैतप्रमुखा पतन्ति	१६	४७
अद्वैतमग्रे विनिधाय	१ ७	९
अद्वैतमापादयदीशवेश	४६	१
अद्वैतवीथीपथिकैरुपास्य	१४५	२२
अद्वैताचार्यवर्यो भगव	८	१८
द्वैतावैरखि हृदा	१५७	४७
अद्वैतेन्दै हृदयजनितो	१५३	५६
अद्वैतोपायनमिद	१८४	५
अद्वैतो वेशमात्रेण	४५	११
अनवसरतामभ्यायाते	१९१	१९
अनसूयासमभाव	४७	५
अनार्यसौन्दर्यमाधुर्यधुर्य	५२	२१
अनु दनप्रक्षालन	११७	३
अनुवनमनुकुञ्ज वीक्ष्य	१७४	५६
अन्तभ वविदामुदार		५१
अ त प्रसादयति शोधयता	२७	१५

	पृ	श्लो
अन्योत्कर्षासहत्वान्मम	१५	४७
अन्योन्येक्षणरागरञ्जित	१ ३	२
अन्योन्याभिमुखस्थितौ	१९	१
अप था पन्था वा न भवति	८८	४
अभून्न चेष्टा मम राज्य	४७	२७
अभ्यासाद्य उपाधिजात्यनु	२४	४
अभ्रंलिहो पि जगता	७	१७
अमूतत्व तत्व यदि भगवत	१४४	२
अमूत परमात्मा च	१ ०	५९
अमूर्तमूतयोर्भेदो	१२ ०	४
अम्भ स्य दै स्तिमितवपुष	९१	१२
अयमेष हशा रसायन	१५९	३
अय नैवाद्वैतो बत न	५४	३६
लौकिकानामपि	१४३	१५
अलौकिकाल्लौकिकमेव	६८	५८
अलौकिकीतो पि च	३	१८
अलौकिकीत किल	५	२२
अलौकिके वस्तुनि	२३	६४
अवगाहि अउण मग्गो	५	४१
अवतरति जगत्यामीश्वरे	९	१५
अविरलजनसङ्घो	१८९	१४
असे निधाय महतीं रणयन्	५१	२८
अष्टादशैव यामा	१५	४५
स्ताचलोदरमहीधरयो	१९४	२७
स्थानेऽपि प्रथयति कृपा	१६ ०	१
अस्माद्विभो हिरुपेत्य	४१	२३
अस्मिन्नेवहि भगवति	८५	४
अस्याप्रजस्त्वकृतदार	९	२५
अस्या पश्यत भो मदस्य	२ ५	५७
अहं का ता का तस्त्वामति	१३१	१५

	पृ	श्लो
ाह हरे तव पादैकमूल	२१	५६
अहो देवर्षिधन्यो यं	५२	२९
अहोरसकलावतो भगवतो	१४	९
ाहो सो य नी ाच	३	५
आकल्प कवयन्तु नाम	२ ६	७५
आकस्मिको नु विधिना	१३१	१८
आकारादपि भेतव्यं	१४५	२४
ाकुञ्चनाकु कफोणि	१ ४	१
आक्षेपो पि म ानसौ	६	६
आगतश्च सहसा स एकको	१७२	१७
आगत्य स खभवन	११	३
आच र्यरत्नहरिदास	८	१
आचार्यं यदुनन्दन सुमधुर	१८	३
आत्मारामा किमपि दधते	८	५
आत्मारामाश्च मुनयो	४९	२१
आनन्दकन्दलितमस्य	१९२	२३
आनन्द किमु मूर्त एव	६	
आनन्दानुभवैकस धन	१४४	
आन दाम्बुनिधेन वेद्मि	२	५२
आन दमूर्तिरमृतद्रव	४२	१
आनन्दवैवश्यमिदं महा	८	७
आ न्द सहजो भवे दि	१६	४६
ा न्दहु रगभीरघो ो	१५२	३४
आनन्दो द्विविध प्रोक्तो	१२	३
आनन्दोन्मादलुप्तान्त	५२	३
आ दो पि च मूर्तो	३६	२४
आनीतो राजधान्या पथि	१६६	५
आपामरं ाणिन उद्धिधीर्षो	१६५	४
आयातो थ रथोत्सवस्य	१५	४५
आयात पु ोत्तमस्य समये	१ ८	१
आरम्भ ए वयसो	१	३
ाछादयन्नक्षि जग ना ा	४	५

	पृ	श्लो
आविर्भावादवधि स निजा	१७३	१९
आशापाशद्विगुणवलितै	९१	१
आश्चर्यं प्रागहह नहनं	३	
आश्चर्यं य क दो	४	६
आसन्ने रथविजयेऽखिले	४६	२६
आहायधैर्यं क्रियते बहियेत्	८	२१
इतश्चेत्पश्येय भवति	१९	४२
इति प्रियोक्त्या मधुराद्रया	१५४	३९
इत्थमम्बुदविकस्वरस्वर	१२	६
इमे चैतन्यदेवस्य	१८९	१२
इयमपि लितैव	५	४४
ह ग्रामे को व स्थगयतु	८	१६
ईशो पि स्य त्प्रकृतिमधुर	९३	१६
इश्वरपुरीनिषेवणरत	१४२	१२
इश्वरो येन पूर्णेऽपि	१५६	४२
उ रु स्तपोभि	११	३३
उज्जव ाद्भुतशमाश्च हसश्च	४४	१
उत्क ठाभयतर्कयो	१५८	५२
उत ठा किमु चारुकारु	५९	४६
उत्क्षिप्त किमयं दिवा दिन	१ ६	१५
उत्तीर्णोऽद्य भवाब्धि	९६	२४
उत्थ य म दमुपविश्य	२	५६
उत्सर्पदपणसहस्र	१९८	४२
उ ारितं शमदम दि	२६	
उद्दामताण्डवविधौ	२	४९
उन्माद ानन्दकृतो हि	८९	८
उन्मील्य दृशौ पश्यति	९	९
उल्लङ्घ्य किंचिदुदया		१४
ए ो विवेकनामा तनयो	४३	४
एतत्स्वर्णसरोरुहं तदुपरि	६७	६४
एतावत्यपि दुर्गमे जन	९६	२३
एता समास्थाय परात्म	८	

	श्लो	
औत्क ठ्यैकपुर सरा	१ ६	३५
एते ब्रह्मक्रम डलोरिव	१४	४
क एष नि सा वस	१९३	२६
कठिनतरतपस्यो ृम्भ	२१	५८
कति न विहितं स्तोत्र काकु	१२४	२
कदासौ द्रष्टव्य स खलु	१३९	८
कनकपरिघदीघबाहु	१३३	१६
कन्यका सरसनीरसभावा	४४	६
कलौ न राजञ्जगता	६	
कस्त्व भो ननु माधव	६७	५५
काञ्चनाञ्चलमरीचिवीचिभि	१२७	४
कामादयो ये षडमी	१	२७
का विद्या हरिभक्तिरेव	१२८	८
ा ान भक्तियोग	१२३	४४
कालेन वृ दावनकेलि	१७६	५७
काशीश्वर क्षपितलोक	१९७	४१
काशीश्वरो जनि बहि	१९९	४६
कि गेय व्रजकेलिकम	१२९	१
किं गोप्यते भवद्भि स	८५	३८
किं तत्रास्ति किमन्यत	८६	४२
किं पादा तमुपैषि नासि	२ ४	६५
कुञ्जसीमनि दापि यदृच्छा	१७४	२४
कुत इयमस्या स्फूति	२	६
कुरुष्व सुरभीरप ल	३	३५
कुलीनम्र मीणा अपि च	१६१	२
कूपात्केऽपि समुद्धरन्ति	१९६	३५
कृषिर्भूवाचक श दो	१३४	२२
कृष्ण कृष्ण जय कृष्ण कृष्ण	१२	५
कृष्णपक्षेऽनुदिवस	६	९
कृष्णस्वरूप चैतन्य	८६	४१
केचिद्वौरगिरा मनोज्ञ	१९६	३६
केय लीला व्यरचि भवता	९५	२१

	श्लो	
को राजन्निन्द्रियवान्	१५९	५४
क्षणमुत्सहते सृगेन्द्रकल्पं	२	५
क्षणात्प्रदीपावलय समन्ता	११६	२९
क्षेमन्ते राघव ननु शिव	१५३	३८
क्षोभ क्षोणीमृगास्या	१९	३८
क्वचन च यमुनावनान्त	१७२	२
क्व च ि ग्धश्याम	८४	३५
क्वापि वत्स कु मुचलपुच्छ	१७४	२३
क्वाह दरिद्र पापीयान्	२६	३
खण ान दा रसा सर्वे	४४	९
गच्छत्येष जगत्पती रथ	२	५
गतो य मो यामावहह	९	१९
गत स कालो मम साप्रतं	७	१२
गभीरैर्हुङ्कारैनिजजन	६	९
गुण्डिचा गृहमवस्थित	२ २	५८
गृहीतो यं वेशो यदिह	१	४
गृहीत्वा जरतीभाव	५	२३
गोलोक दवतारि ो स्मि	१	५
गौडक्षोणा जयति कतमा	६	१२
गौडाख्यैरथ कर्षिभिजन	५७	४८
गौडेन्द्रस्य सभाविभूषण	१ ५	३३
गौर कृष्ण इति स्वयं	१९२	२४
गौरत्विषा कपिशयन्	१६२	३
गङ्गाद्वारगयाप्रयागमथुरा	२५	
ग्र मे ग्रामे पद्र पटिनो	१ १	६
पयति हृदय मे	१	२६
चन्द्रशेखर इति प्रथितस्य	१७५	३
चारुकारुणि मारुचिराङ्गं	११३	२३
चिदानन्दभानो सदा	९	१
चूडातियोगादरुणेन	९२	१३
जगन्नाथद्वारादपि	१	५
जयति कालतना शै	१४	

	पृ	श्लो
जयति जननिवासो	४७	१५
जातैव तस्य किल सत्य	१४	२९
जानूत्क्षेपभुजावधूनन	१९३	२५
जायमान पूर्णिमाया		१५
जिह्वाग्रेण ललाटच द्र	२५	६
तत्कालीनकवाटवाट	१६	२
तत्रैव दैववशत	११	३१
तदानीमस्माकं समजनि	१३८	
तन्मात्रपुत्र बत सा तदेक	७९	१८
तप्तानि भूरीणि तपासि	२१	५७
तमपि परमदीनोद्ध टि	१६७	८
तमेत्य पश्येत्यनुरागपूर्व	१७५	३१
तव प्रीत्या याहीत्यभिलषति	१	३
तास्ता कीर्तनतूत्यकौतुक	८४	३६
तीर्थद्वय यदपि तुल्यमिद	१७७	३९
तीर्थेष्वमीषु सकलेषु	१ ६	२४
तुङ्ग दृङ्गयुवसङ्गतफुल्ल	११३	२२
त सनातनमपागतमक्ष्णो	१७६	३४
त्यक्ता न किमु या सीति	९	२
दक्षिणं स्फुरति मे विलोचन	१ ७	१८
द डवद्भुवि निपत्य ववन्दे	१ ४	९
द भैकमात्र थना	१४३	१७
दास्ये केचन केचन	२ ६	७३
दिशि विदिशि दशा सरोज	७६	१
दीपाभावघना धकार	११६	२८
दुर्ग बध्न ति वंशैर्ह तर	१७१	१५
दुवारदैत्यघटया घटिते	७५	६
दुर्वासनाविषविषादहरे	२	५४
दूरादुत्थितमन्तिक मयि	२ ४	६५
दृष्ट मया प्रथममस्य	१४२	१३
दृष्ट सर्वमिदं मनोवचनयो	२६	११
ष्ट्वा भागवता कृपा	२	३

	पृ	श्लो
देवोचितं च पारधापित	९३	१५
द्वावेव पूर्णकरु ौ	११३	२५
द्वे ब्रह्मणी तु विज्ञेये	१२२	४१
धर्मार्थकामेषु परैव	२ ६	७१
धृतफण इव भोगी	१३१	१६
धैर्यं वंसी परिणति	१४	४१
यानाभ्यासकृता स्फूर्ति	४	३
"यान्त विधूय किरणैरुदितस्य	१४६	२५
न गच्छ पथि केनापि	८२	३
न जातिशीलाश्रमधर्म	८१	१९
न भाषते नेक्षते च	१५२	४२
नर०ारघुन दनप्रधाना	१६१	
नर्तित्वा क्षणमेव	१९	३
नवकुवलयदामश्याम गे	४१	३३
नवजलधरधामा	५५	३९
नवद्वीपे नासीदहह	२९	१६
नवद्वीपे यादृक्समजनि	९४	१८
न शौच नो सत्यं न च	२५	१
नाना लीला,रसवशतया	१२	३२
न यो प्युपाय प्रियदर्शनस्य	१९१	२१
नापराध्यति जगज्जननीय	२२	६१
नामैकमात्रं वपुरादधाना	४५	२
नाम्नैव मे लमसि किं	७३	३
नाथ सुखापो भगवान्	२	५५
नारायणस्यैष पुरा	१	२९
नालोक्यते तव मुखं	८	२४
नास्मादृशस्तव पदाम्बुज	८	२५
नाहारोऽद्य दिनत्रयं न च	८८	६
निजेच्छया प्रापय यद्यदेव	२ ६	४
नित्यान दस्त्वकथयदिद	८७	४३
नित्यो यद्य यह बलव न्	१३	३५
निधिषु कुमुदपद्म	१	१